वीरराघवाचार्यविरचितः

सच्चरित्रसुधानिधिः

SACCARITRA SUDHĀNIDHIḤ

By

Vīrarāghavācāryaḥ

संपादकः

डा. के. इ. गोविन्दन्

दर्शनसंकायप्रमुखः

राष्ट्रियसंस्कृतविद्यापीठम्

मानितविश्वविद्यालयः

तिरुपति (आ.प्र.)

वीरराघवाचार्यविरचितः

सच्चरित्रसुधानिधिः

संपादकः
डा. के. इ. गोविन्दन्
दर्शनसंकायप्रमुखः
राष्ट्रियसंस्कृतविद्यापीठम्
मानितविश्वविद्यालयः
तिरुपति (आ.प्र.)

प्रकाशनस्थलम्
येङ्कटनाथनिर्कतनम
६-८-११३९. एन.जि.ओस्-कालनी
श्रीनिवासनगरम्
तिरुपति - ५१७५०७

तिरुमलतिरुपतिदेवस्थानद्रव्यसहायेन प्रकाशितम्
प्रथमसंस्करणम् - 1994

श्रीमारुति लेसरफिण्टर्स,
१७४, पीटरस् रोड्,
रायपेटा, मद्रास - ६०० ०१४.

SACCARITRA SUDHĀNIDHIḤ

By

Vīrarāghavācāryaḥ

Edited by

Dr. K.E. GOVINDAN,

Dean, Darśana Faculty

RASHTRIYA SANSKRIT VIDYAPEETHAM,

(DEEMED UNIVERSITY)

TIRUPATI (A.P.)

Publisher :

VENKATANATHA NIKETANAM

6-8-113, N.G.O'S Colony,

Srinivasa Nagar,

TIRUPATI - 517 507.

This book has been published
with the financial assistance of
Tirumala Tirupati Devasthanam, Tirupati.

First Edition 1994

Lasertypesetting at :
Sri Maruthy Laser Printers, 174, Peters Road, Royapettah, Madras - 600 014
✆ : 8522656, 8524256

सच्चरित्रसुधानिधिग्रन्थविषयानुक्रमणिका

गुरुपरम्परानुसन्धानम्	1	भगवत्संनिधावस्पृश्यस्पर्शदोषाभावः	81
एतद्ग्रन्थप्रयोजनम्	2	क्षौराभ्यङ्गविधिः	81
एतद्ग्रन्थोक्तविषयानुक्रमः	3	धात्रीस्नानमृत्तिकास्नानविधिः	82
परिभाषा	4	समुद्रस्नानविधिः	82
इन्द्रियादिशुद्धिः	7	माघस्नानविधिः	84
शुभगुणवर्णनम्	9	ग्रहणस्नानादिविधिः	84
शुभगुणलक्षणानि	10	संक्रान्तिपुण्यकालादिनिर्णयः	85
अष्टकालपञ्चकालविभागः	11	नदीनां रजोदोषः	85
ब्राह्ममुहूर्तकर्तव्यम्	12	माध्याह्निकस्नानविधिः	86
मलमूत्रोत्सर्जनविधिः	13	माध्याह्निकविधिः	87
आचमनविधिः	16	इज्याकालभगवदाराधनक्रमः	88
आचमननिमित्तानि	18	वैश्वदेवविधिः	95
दन्तधावनविधिः	20	पञ्चमहायज्ञविधानम्	97
स्नानविधिः	22	भोजनविधिः	99
पवित्रलक्षणम्	25	भगवन्निवेदनार्हवस्तूनि	104
संकल्पक्रमः	26	आश्रयदुष्टानि	108
प्रातस्नानविधिः	26	निमित्तदुष्टानि	112
वस्त्रलक्षणम्	30	क्रियादुष्टानि	114
स्नानभेदाः	30	संसर्गदुष्टानि	114
पूर्वाचार्योक्तस्नानविधिः	32	जातिदुष्टानि	115
ऊर्ध्वपुण्ड्रविधिः	34	स्वाध्यायविधिः	116
सन्ध्यावन्दनविधिः	36	श्रीमद्रामायणस्य ऋषिछन्दोदेवतादयः	117
जपविधिः	40	ताम्बूलचर्वणम्	118
प्राणायामविधिः	40	सायंसन्ध्याविधिः	118
गायत्रीजपनियमः	50	प्रदोषादिषु जपसंकोचः	119
जपोपस्थानविधिः	53	सायं सन्ध्यानन्तरकृत्यानि	120
मूलमन्त्रजपः	54	योगविधिः	121
भगवत्सेवाविधिः	54	यमनियमादिलक्षणानि	122
भगवदपचाराः	56	शयनस्त्रीसंगमादिक्रमः	123
अभिवादनविधिः	58	स्त्रीधर्माः	126
औपासनविधिः	60	रजस्वलानियमाः	134
लौकिकाग्निः	63	वितन्तुनियमाः	136
ब्रह्मयज्ञविधिः	66	ग्रन्थोपसंहारः	138
अनध्यायप्रदोषनिर्णयः	69	सच्चरित्रसुधानिधिस्थश्लोकार्धानुक्रमणिका	140
अभिगमनाराधनक्रमः	70	एतद्ग्रन्थोपात्तमन्त्राणां सूची	178
उपादानविधिः	71	एतद्ग्रन्थोपात्तकर्तॄणां सूची	179
पुष्पतुलसीदर्भाद्याहरणविधिः	71	एतद्ग्रन्थोपात्तग्रन्थानां सूची	179
द्रव्यार्जनप्रकारः	72		
नैमित्तिकस्नानादिनिर्णयः	76		

पायादपायात् वृषशैलनाथः

श्रीमन्नैध्रुववीरराघवार्येण विरचितः स्मृतिसंग्रहापराभिधः सच्चरित्र-सुधानिधिग्रन्थः देवनागरिलिप्यां संमुद्रय प्रकाश्यते । प्रकृतग्रन्थकर्ता आत्मानं शतक्रतुश्रीनिवासाचार्यशिष्यत्वेन, तदनु तदाज्ञया प्रकृतग्रन्थनिर्माणं करोमिति च प्रतिज्ञाय, अन्येष्वाह्निकग्रन्थेष्वनुक्तान् अनध्यायनिर्णय- समद्रस्नानादि-विधीन् अनेकान् विषयान् सप्रमाणं निरूपयति । प्रकृतग्रन्थ- प्रकाशने मत्पितृचरणा एव प्रेरका आसन् ।

एतद्ग्रन्थप्रकाशनाय चिरादर्थापेक्षी समयं प्रतीक्षमाणोऽहं तिरुमल-तिरुपति - देवस्थानाधिकारिणः संप्रार्थ्य ततः लब्धधनः मुद्रापयितुममुं ग्रन्थं अस्मत्प्रियसुहृदे **कलाभारती** प्रकाशकाय **लक्ष्मीनारायणाय पञ्चसहस्रं रूप्यकाणि** च वर्षद्वयात् प्राक् दत्तवान् । हन्त विश्वासघातकः सः तद्धनं स्वीकृत्य पलायितः । अद्य यावत् न दृग्गोचरो भवति । तिरुमल-तिरुपतिदेवस्थानाधिकारिणः समुचितसमये प्रकृतग्रन्थं मुद्राप्य न समर्पितवानहमिति मह्यं मासद्वयाभ्यन्तरे यदि मुद्राप्य न समर्प्यते तर्हि प्रकृतग्रन्थमुद्रणाय दत्तानुमतिः निरस्ता भविष्यति इत्यसूचयन् । तेन नितरां भीतः कथमपि उक्तसमये समर्पणीयं मुद्राप्येति मारुतिमुद्राणलये दत्वा कार्यं समापितवान् । समयाभावात् विस्तृतभूमिकादिलेखनं कर्तव्यमित्यभिलषतापि नालेखीति क्षन्तव्योऽहं जनः । अस्य ग्रन्थस्य मूलमातृकादानेन मामनुगृहीतवद्भ्यः मन्मातुलेभ्य : गोष्ठीपुराभिजनेभ्य : मीमांसाद्वयविद्भ्यः पाञ्चरात्रागमममर्मज्ञेभ्यः रामानुजाचार्येभ्यः, प्रकृतग्रन्थमुद्रापणे द्रव्यं दत्तवद्भ्यः तिरुमल-तिरुपति-देवस्थानाधिकारिभ्यः अनन्तान् प्रणामान् विनिवेद्य, मारुतिमुद्राणालयाधिकारिभ्यः धन्यवादांश्च निवेदयामि ।

भगवतोऽनुग्रहे सति विस्तृतभूमिकालेखनपुरस्सरं सकलजनोपकारभूतं ग्रन्थरत्नमिदं पुनर्मुद्रापयितुमभिलषामि ।

भव-शुक्ल सप्तमी
11.09.1994

इत्थं सुधीजनविधेयः
के.इ. गोविन्दन्

॥ श्रीलक्ष्मीनृसिंहपरब्रह्मणे नमः ॥

श्रीमद्वीरराघवाचार्यविरचितः

सच्चरित्रसुधानिधिनामा स्मृतिसंग्रहः
गुरुपरम्परानुसन्धानम्

श्रीशं श्रियं च सेनेशं शठारिं नाथयोगिनम् ।
पद्माक्षं राममिश्रं च यामुनं च मुनिं ततः ॥ १ ॥

पूर्णं रामानुजमुनिं प्रणतार्तिहरं तथा ।
रामानुजं रङ्गराजं वादिहंसाम्बुदं गुरुम् ॥ २ ॥

वेदान्ताचार्यतत्पुत्रौ प्रणमामि पुनः पुनः ।
ब्रह्मतन्त्रस्वतन्त्रार्यं श्रीमद्वरददेशिकम् ॥ ३ ॥

आद्यं शठारियोगीन्द्रं नारायणमुनिं ततः ।
पराङ्कुशश्रीनिवासशठजिद्योगिपुङ्गवान् ॥ ४ ॥

पराङ्कुशशठारातिपराङ्कुशमुनीश्वरान् ।
नारायणशठारातिश्रीनिवासमुनीश्वरान् ॥ ५ ॥

श्रीमन्नारायणमुनिं श्रीनिवासमुनीश्वरम् ।
अहोबिलनृसिंहाद्यान् गौरवान्नौमि देशिकान् ॥ ६ ॥

ससीतं सानुजं रामं प्रणमामि सहस्रशः ।
यस्य स्मरणमात्रेण पलायन्ते महारयः ॥ ७ ॥

वागीश्वरं हयग्रीवं प्रणमामि सहस्रशः ।
गङ्गाप्रवाहवद्यस्य स्मरणाद्वाग्विजृम्भते ॥ ८ ॥

वेदान्ताचार्यमनघं प्रणमामि सहस्रशः ।
यदाश्रितानां स्वपदं ददात्येव श्रियः पतिः ॥ ९ ॥

श्रीनिवासमुनिश्रेष्ठं प्रणमामि सहस्रशः ।
रामानुजावतारं यं प्रवदन्ति महीसुराः ॥ १० ॥

शतक्रतुविधिस्तव्यं चतुर्वेदविहारिणम् ।
श्रीनिवासगुरुं सीतानायकं च नमाम्यहम् ॥ ११ ॥

श्रीमच्छ्रीनिधिदेशिकस्य चतुराम्नायस्य दिव्याज्ञया
कर्तुं सच्चरिताब्धिमध्वरशतानुष्ठाननिष्ठाजुषः ।
मीमांसाद्वयवल्लभश्च बुधराट् श्रीश्रीनिवासस्सुधी-
स्संयक्साहसकारिणो मम तरिस्स्यात् कृष्णविद्वन्मणिः ॥ १२ ॥

चतुराम्नाय षट्सूत्री रहस्यार्थोपदेशिनः ।
श्रीवासदेशिकस्यान्ते मेधा कस्य न जृम्भते ॥ १३ ॥

श्रीनिवासमहामुनिं वरददेशिकं जनकात्मजा
राघवौ पितरौ स्वकौ बहु संप्रणम्य जगत्प्रभू ॥
वीरराघवनामवानिह सनैध्रुवः कुरुतेऽधुना
सच्चरित्रसुधानिधिं रघुवीरचोदित आदरात् ॥ १४ ॥

एतद्ग्रन्थप्रयोजनम्

आचाराणामपूर्णोक्तोर्मनुबोधायनादिभिः ।
स्मृतिरत्नाकरादीनामत्यन्तं विस्तृतत्वतः ॥ १५ ॥

तत्र तत्रोदितानर्थान् सर्वानेकत्र वीक्षितुम् ।
क्रियतेऽद्यायमारम्भस्तत्प्रीणातु रघूद्वहः ॥ १६ ॥

धर्मशास्त्राणि सर्वाणि ये वीक्षितुमक्षमाः ।
पश्यन्तु साधवः कृत्स्नं सच्चरित्रसुधानिधिम् ॥ १७ ॥

यथैव वेदाध्ययनं धर्मशास्त्रमिदं तथा ।
अध्येतव्यं प्रयत्नेन नियतं पापभीरुणा ॥ १८ ॥

श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते ।
एकेन हीनः काणः स्याद्द्वाभ्यामन्धः प्रकीर्तितः ॥ १९ ॥

अधीत्य चतुरो वेदान् सषडङ्गपदक्रमान् ।
स्मृतिहीना न शोभन्ते चन्द्रहीनेव शर्वरी ॥ २० ॥

धर्म्यं यशस्यमायुष्यं पुण्यं स्वर्ग्यं तथैव च ।
धारणाद्धर्मशास्त्रस्य ब्रह्मलोकमवाप्नुयात् ॥ २१ ॥

एवं मनुसुराचार्यपराशरयमादिभिः ।
धारणं धर्मशास्त्राणां प्रशंसितमनेकधा ॥ २२ ॥

तस्माद्विस्तरभीरूणां दिदृक्षूणां बहु स्मृतिः ।
उपादेयोऽयमार्याणां सच्चरित्रसुधानिधिः ॥ २३ ॥

एतद्ग्रन्थोक्तविषयानुक्रमः

प्रोच्यतेऽनुक्रमादस्मिन् सच्चरित्रसुधानिधौ ।
परिभाषेन्द्रियादीनां संशुद्धीर्गुणवर्णनम् ॥ २४ ॥

तल्लक्षणान्यष्टकालपञ्चकालविभागता ।
ब्राह्मे मुहूर्ते कर्तव्यविण्मूत्रोत्सर्गशौचयोः ॥ २५ ॥

विधिराचमनस्यापि निमित्तान्यथ तस्य च ।
दन्तशुद्धिस्नानविधिरूर्ध्वपुण्ड्रविधिस्तथा ॥ २६ ॥

ततस्सन्ध्योपासनस्य जपोपस्थानयोर्विधिः ।
रामसेवाविधिरथाप्याचाराणां निरूपणम् ॥ २७ ॥

ततोऽभिवादनविधिस्ततोऽभ्युक्षणहोमयोः ।
ब्रह्मयज्ञाध्ययनयोरुपादानविधिस्तथा ॥ २८ ॥

नैमित्तिकस्नानविधिः क्षौराभ्यङ्गविधिस्ततः ।
धात्रीमृत्सागरस्नानमाघस्नानविधिस्ततः ॥ २९ ॥

स्नानं ग्रहणसंक्रान्त्योपरागानां रजस्तथा ।
माध्याह्निकस्नानविधिर्माध्याह्निकजपक्रमः ॥ ३० ॥

इज्याविधिर्वैश्वदेवबलिकर्मविधिस्तथा ।
पञ्चयज्ञातिथ्यविधिर्भिक्षादानविधिस्ततः ॥ ३१ ॥

भोजनस्यापि नियमो भक्ष्यवस्तुविधिस्तथा ।
कालाश्रयनिमित्तैश्च क्रियासंसर्गजातिभिः ॥ ३२ ॥

दुष्टान्नव्यञ्जनविधिस्स्वाध्यायस्य विधिस्ततः ।
ताम्बूलचर्वणविधिस्सायं सन्ध्याविधिस्ततः ॥ ३३ ॥

प्रदोषजपसंकोचविधिरौपासनस्य च ।
श्रीरामेज्यावैश्वदेवबलिभुक्तिविधिस्ततः ॥ ३४ ॥

स्वाध्याययोगशयनस्त्रीसंगानां विधिस्ततः ।
ततस्त्रीणां नित्यकृत्यं स्त्रीधर्मस्तदनन्तरम् ॥ ३५ ॥

रजस्वलानां नियमो गर्भिणीनियमस्ततः ।
विधवानां च धर्मोऽत्र क्रमेण प्रोच्यते मया ॥ ३६ ॥

प्रमाणवचनान्येषां स्मृतिरत्नाकरादिषु ।
सन्ति तत्र विपश्चिद्भिः द्रष्टव्यानि दिदृक्षुभिः ॥ ३७ ॥

मया तदर्थान् संगृह्य ग्रन्थविस्तरभीरुणा ।
क्रियते संग्रहेणैव सच्चरित्रसुधानिधिः ॥ ३८ ॥

दोषान् हित्वाऽभ्यसूयादीन् मयोक्तं स्मृतिसंग्रहम् ।
विद्वांसस्सुधियो नित्यं पश्यन्तु गतमत्सराः ॥ ३९ ॥

सीताधिनाथकृपयैव मया कृतोऽसौ
श्रीरामदत्तमतिना स्मृतिसंग्रहोऽद्य ।
अज्ञस्य भक्तिरहितस्य ममाल्पबुद्धेः
शक्तिः स्मृतिप्रणयने कथमन्यथा स्यात् ॥ ४० ॥

परिभाषा

तत्र तत्रोपयोगार्थं परिभाषाऽत्र वर्ण्यते ।
नोक्तो हस्तो यत्र तत्र दक्षिणः परिकीर्तितः ॥ ४१ ॥

यत्र दिङ्नियमो नोक्तः प्राची तत्रोत्तराथ वा ।
तयोरुपाधावैशानी जुहोतीत्यत्र वै घृतम् ॥ ४२ ॥

संख्यानुक्तौ सहस्रं स्याज्जपहोमादिकर्मसु ।
शतं वा दश वा गव्यं द्रव्यं ग्राह्यं घृतादिकम् ॥ ४३ ॥

गव्याभावे माहिषं स्यादाज्यं तैलमथापि वा ।
आसीन एव कुर्वीत नोक्ते यत्रासनस्थिती ॥ ४४ ॥

कालात्पूर्वं कृतं कर्म पुनः काले समाचरेत् ।
अननुष्ठितमेव स्यात् कालेऽतीते कृतं यदि ॥ ४५ ॥
प्रधानाकरणे कर्म साङ्गं कर्तव्यमादितः ।
न कार्याण्यङ्गनाशे स्युरङ्गीवाङ्गानि वा पुनः ॥ ४६ ॥
आरब्धं कर्म चेन्मध्ये मोहेन कृतमन्यथा ।
स्खलनं यत्र संभूतं तदारभ्य समापयेत् ॥ ४७ ॥
अतीते मुख्यकाले तु गौणकालोऽपि तत्समः ।
मुख्यकालो गरीयान् स्यात् मुख्ययोर्द्रव्यकालयोः ॥ ४८ ॥
तन्मुख्यकाले द्रव्येण गौणेनापि क्रियाश्चरेत् ।
मुख्यद्रव्याशया धीमान्मुख्यकालं न लङ्घयेत् ॥ ४९ ॥
गौणेन कर्माण्यारब्धे द्रव्येण यदि लभ्यते ।
मुख्यद्रव्यं तु तत्त्यक्त्वा गौणेनैव समापयेत् ॥ ५० ॥
मुख्यद्रव्यमुपात्तं यत्तद्विनष्टं यदा तदा ।
ग्राह्यमन्यन्मुख्यमेव गौणं वा तदसंभवे ॥ ५१ ॥

मुख्यद्रव्योपमं गौणं ग्राह्यं गौणोपमं न तु ।
कर्माक्षममपि द्रव्यं मुख्यमेवोत्तमं विदुः ॥ ५२ ॥

कर्मक्षममपि द्रव्यं न ग्राह्यं गौणमेव हि ।
द्रव्यं तत्तत्समं कार्यं रूपैर्वर्णैरथापि वा ॥ ५३ ॥

क्षीरैः पुष्पैः फलैर्गन्धैस्संग्राह्यमथवा रसैः ।
पूर्वैः पूर्वैस्समालाभे समं ग्राह्यं परैः परैः ॥ ५४ ॥

होमद्रव्येष्वलब्धेषु घृतेन जुहुयात् द्विजः ।
अज्ञाता यदि मन्त्राः स्युर्जपहोमार्चनादिषु ॥ ५५ ॥

तिस्रो व्याहृतयस्तत्र मन्त्रः स्यात्प्रणवोऽपि वा ।
मन्त्रस्य देवताऽज्ञाने देवता स्यात्प्रजापतिः ॥ ५६ ॥

स्वकाले क्रियमाणानामङ्गानि स्युश्च कर्मणाम् ।
अकाले क्रियमाणानां नाङ्गान्यङ्गञ्चैव कर्मणाम् ॥ ५७ ॥

बह्वल्पं वा स्वगृह्ये यत्प्रोक्तं कर्तव्यमेव तत् ।
न्यूनता तत्र यद्यस्ति तदा ग्राह्यं परोदितम् ॥ ५८ ॥

स्वसूत्राविध्यलब्धो तु ग्राह्यं बोधायनोदितम् ।
विण्मूत्रोत्सर्जनं दन्तधावनं प्रोक्षणं तथा ॥ ५९ ॥

तर्पणाचमने कुर्यात् कुक्कुटासनसंस्थितः ।
स्नानभोजनपानानि मैथुनं दन्तधावनम् ॥ ६० ॥

क्रीडामुद्वर्तनं निद्रां वर्जयेद्देवतालये ।
विण्मूत्रोत्सर्जने दन्तधावने मैथुने तथा ॥ ६१ ॥

स्नानहोमजपाद्येषु मौनं कर्म समाचरेत् ।
*उपवीतं सदा धार्यं श्रौतस्मार्तादिकर्मसु ॥ ६२ ॥

तर्पणे वन्दने श्राद्धे कट्यामेव तु धारयेत् ।
आदौ क्रियाणामन्ते च प्रणम्य गुरुतद्गुरून् ॥ ६३ ॥

लक्ष्मीवल्लभपर्यन्तान् सेनेशं श्रियमप्यथ ।
उक्त्वा मन्त्रं कृतं चेति बलमन्त्रं ततः परम् ॥ ६४ ॥

पश्चाद्यं स्वशेषेति गद्यं वा भगवानिति ।
कीर्तयेत्परमैकान्ती पञ्चकालक्रियादिकः ॥ ६५ ॥

बलमन्त्रं विना तं च तच्चान्ते परिकीर्तयेत् ।
स्नानहोमजपादीनामन्येषामपि कर्मणाम् ॥ ६६ ॥

आद्यंतयोः कृतं चेति विना तं तच्च कीर्तयेत् ।
यथोपदेशं कार्याणि संप्रदायानुसारतः ॥ ६७ ॥

स्नानाभिगमनादीनि सर्वकर्माणि च द्विजैः ।
द्विविधानामिन्द्रियाणां मनोबुद्ध्योश्च वर्ष्मणाम् ॥ ६८ ॥

द्रव्यदेशक्रियाणां या शुद्धिः साऽऽचार उच्यते ।

इति सच्चरित्रसुधानिधौ परिभाषा

---

* उपवीतवद्वासोविन्यासविशेष उपवीतम्

इन्द्रियादिशुद्धिः

भगवद्गुरुविप्राणां निन्दां चासत्यभाषणम् ॥ ६९ ॥

अशृण्वन् तामसं शास्त्रं यच्चान्यदपि निन्दितम् ।
माहात्म्यं स्तोत्रनामानि पद्माकान्तस्य सर्वदा ॥ ७० ॥

संशृण्वन् सात्त्विकं शास्त्रं श्रोत्रं शुद्धमुदाहृतम् ।
परस्त्रीपतितादीनामङ्गस्पर्शनवर्जिता ॥ ७१ ॥

जाह्नव्यादिमहातीर्थस्नाननिर्धूतकल्मषा ।
वैष्णवालिङ्गनप्राप्तपरमानन्दनिर्भरा ॥ ७२ ॥

अलोलुपा चन्दनादौ त्वक्शुद्धा परिकीर्तिता ।
पाषण्डपतितान्यस्त्रीमलमूत्रादिवीक्षणे ॥ ७३ ॥

पराङ्मुखी भागवतालोकनादिस्पृहान्विता ।
रमारमणपादादिचूडान्ताङ्गेक्षणोद्यता ॥ ७४ ॥

अरूक्षार्येषु सततं शुद्धा दृष्टिरुदाहृता ।
कालाश्रयनिमित्तैश्च क्रियासंसर्गजातिभिः ॥ ७५ ॥

दुष्टमन्नमनिच्छन्ती परमापत्स्वपि क्वचित् ।
यज्ञशिष्टं हृषीकेशविनिवेदितमन्वहम् ॥ ७६ ॥

स्वीकुर्वन्ती यथाकालं जिह्वाशुद्धोदिता बुधैः ।
मद्यमांसमलादीनां गन्धाघ्राणविवर्जनम् ॥ ७७ ॥

तुलसीकुसुमादीनां लक्ष्मीपतिपदाब्जयोः ।
समर्पितानामाघ्राणं घ्राणशुद्धिरुदाहृता ॥ ७८ ॥

परापवादा पारुष्यं पैशुन्यमतिवादताम् ।
असच्छास्त्रस्य पठनमसद्भिस्सह भाषणम् ॥ ७९ ॥

वर्जयित्वैवमादीनि भगवन्नामकीर्तनम् ।
वेदसच्छास्त्रपठनं सदा मधुरभाषणम् ॥ ८० ॥

एवमादीनि कुर्वन्ती वाक्शुद्धा समुदाहृता ।
परदारपरद्रव्यस्पर्शबालादिताडने ॥ ८१ ॥

हित्वा वृथा तृणच्छेदमन्यच्चापि विगर्हितम् ।
दिव्यालङ्कारकरणे कुशलः कमलापतेः ॥ ८२ ॥

संमार्जनादिकृद्धाम्नि शुद्धः पाणिरुदाहृतः ।
भगवन्मन्दिराचार्याद्याभिमुख्यप्रसारणम् ॥ ८३ ॥

धावनं भूमिघातं च हित्वान्यदपि निन्दितम् ।
तीर्थयात्रोत्सवाद्यर्थं संचरिष्णु मृदुक्रमम् ॥ ८४ ॥

महत्करस्पर्शहीनं शुद्धं पादद्वयं मतम् ।
सतां समीपेऽधो वायुविसर्जनविवर्जितः ॥ ८५ ॥

सर्वदा वाससाच्छन्नः पायुश्शुद्ध उदाहृतः ।
अन्ययोषित्स्वकाले वा यद्युल्बणविवर्जितम् ॥ ८६ ॥

ऋतुगामि स्वस्त्रियां चेदुपस्थं शुद्धमुच्यते ।
परहिंसाद्रव्ययोषिद्द्वेषवैरानुचिन्तनम् ॥ ८७ ॥

असद्विषयसन्तुष्टमलभ्यार्थानुचिन्तनम् ।
अन्यच्च निन्दितं त्यक्त्वा हृषीकदमकं सदा ॥ ८८ ॥

श्रीपतिध्यानविमलं मनश्शुद्धमुदाहृतम् ।
श्रीपतिस्सर्वदोपास्यो भोगमोक्षेच्छुभिर्जनैः ॥ ८९ ॥

अन्ये ब्रह्मादयो देवा नोपास्यास्तु मुमुक्षुभिः ।
महाभागवतास्सेव्या स्वच्छास्त्रं तदुदीरितम् ॥ ९० ॥

इति विज्ञाय तत्त्वार्थं सदाचार्योपदेशतः ।
शुष्कतार्किकचार्वाकनास्तिकप्रमुखैर्जनैः ॥ ९१ ॥

अभेद्यासु दृढा नित्यं बुद्धिः शुद्धोदिता बुधैः ।
तिलामलकविष्टाद्यैस्तैलाभ्यङ्गनिमज्जनैः ॥ ९२ ॥

मलमूत्रादिशौचेन शास्त्रोक्तविधिना मृदा ।
नासिकाकर्णनेत्रादिमलनिर्हरणेन च ॥ ९३ ॥

नैर्मल्यं यच्छरीरे सा देहशुद्धिरुदाहृता ।
सत्त्वादिगुणभेदेन त्रिविधं द्रव्यमुच्यते ॥ ९४ ॥

तत्रैकैकं बहुविधं द्रव्यं ज्ञेयं मनीषिभिः ।
द्रव्येष्वेतेषु संशुद्धं सात्त्विकं द्रव्यमुच्यते ॥ ९५ ॥

धार्मिकाधिष्ठितो राज्ञा धार्मिकेणाभिपालितः ।
म्लेच्छपाषण्डपतितसिंहव्याघ्रादिवर्जितः ॥ ९६ ॥

दिव्यापगादेवखातशिखिसारङ्गसंयुतः ।
आसन्नो यो जलैः पुष्पतुलसीसमिदादिभिः ॥ ९७ ॥

युक्तश्च तृणकाष्ठाद्यैर्देशः शुद्ध उदाहृतः ।
इत्यादिगुणसंयुक्ते दृष्टिरम्ये मनोहरे ॥ ९८ ॥

गोशकृत्सलिलालिप्ते देशे जनविवर्जिते ।
यत्कर्म क्रियते हीननरवीक्षणवर्जितम् ॥ ९९ ॥

लक्ष्मीपतिपदाम्भोजसन्ततध्यानसंयुतम् ।
संकल्पपूर्वमारब्धं सात्त्विकत्यागसंयुतम् ॥ १०० ॥

विशुद्धं कर्म विज्ञेयं श्रीशायान्ते समर्पितम् ।

शुभगुणवर्णनम्

शुद्धिरुक्तेन्द्रियादीनां प्रोच्यन्तेऽथ गुणाश्शुभाः ॥ १०१ ॥

विद्याऽनसूयाकार्पण्यमक्रोधस्सत्यभाषणम् ।
सतां पूजा दयाक्षान्तिरसन्तोषोऽस्तेयमार्जवम् ॥ १०२ ॥

ज्ञानं ध्यानं तपश्शौचमस्पृहेन्द्रियनिग्रहः ।
ह्रीर्मङ्गलमनायासो धृतिर्दानं शमो दमः ॥ १०३ ॥

अहिंसाऽध्ययनं यज्ञः प्रोक्ता एते गुणाश्शुभाः ।

शुभगुणलक्षणानि

उच्यन्ते लक्षणान्येषां विद्याऽऽत्मज्ञानमुच्यते ॥ १०४ ॥
गुणेषु दोषाकथनमनसूयोच्यते बुधैः ।
दरिद्रेणापि यत्किंचिदहन्यहनि दीयते ॥ १०५ ॥

सत्पात्रेषु विना दैन्यमकार्पण्यं तदुच्यते ।
निकृष्टेऽपि जने स्वस्माच्छपति घ्नति वा बहु ॥ १०६ ॥

क्रोधाभावोऽपि बलिनः सोऽक्रोधः प्रोच्यते बुधैः ।
भूतप्रियहितं सत्यं यथार्थकथनं मृदु ॥ १०७ ॥

गृहागतानां गृहिभिर्या पूजा क्रियते मुदा ।
महाभागवतानां सा सतां पूजा प्रकीर्तिता ॥ १०८ ॥

सर्वभूतहितैषित्वं सर्वदा प्रोच्यते दया ।
क्षान्तिर्द्वन्द्वसहिष्णुत्वं सन्तोषो विषयास्पृहा ॥ १०९ ॥

अदत्तस्यानुपादानमस्तेयं परिकीर्तितम् ।
आर्जवं समचित्तत्वं ज्ञानं तत्त्वार्थचिन्तनम् ॥ ११० ॥

विषयेभ्यस्समाहृत्य मनोहृत्पद्मसंस्थिते ।
श्रीभूमिरमणे तस्य स्थापनं ध्यानमुच्यते ॥ १११ ॥

तपस्स्वधर्माचरणमुपवासश्च कालतः ।
अभक्षणमभक्ष्याणामसंसर्गश्च निन्दितैः ॥ ११२ ॥

असाङ्कर्यं स्वधर्मे च संस्थितिश्शौचमुच्यते ।
द्रव्येणाक्लेशागतेन संतुष्टिर्येन केनचित् ॥ ११३ ॥

परद्रव्येष्वनिच्छा या साऽस्पृहा परिकीर्तिता ।
यौवने सत्सु विषयेष्वासक्तिर्न भवेद्यदि ॥ ११४ ॥

इन्द्रियाणां निग्रहस्सः ह्रीरकार्यनिवर्तनम् ।
प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् ॥ ११५ ॥

शास्त्रोक्तविधिना यत्तन्मङ्गलं प्रोच्यते बुधैः ।
अनायासः शुभे कर्मण्यायासाभाव ईरितः ॥ १६ ॥

धृतिस्स्वधर्मकरणे बुद्धेर्दार्ढ्यं विदुर्बुधाः ।
दीयते पुण्यकालेषु यत्तद्दानमुदीरितम् ॥ ११७ ॥

शमश्चित्तस्य शान्तिःस्यात्तस्यैव दमनं दमः ।
यूकमत्कुणमुख्यानां शरीरं तुदतामपि ॥ ११८ ॥

द्रोहं यदि न कुर्वीत साऽहिंसा परिकीर्तिता ।
दिने दिने ब्रह्मयज्ञस्वाध्यायोऽध्ययनं स्मृतम् ॥ ११९ ॥

यज्ञ इत्युच्यते पञ्चमहायज्ञा दिने दिने ।
उक्ता गुणा अप्युक्तानि सम्यक्तल्लक्षणानि च ॥ १२० ॥

ब्राह्मान्मुहूर्तादारभ्य कर्म कर्तव्यमुच्यते ।

अष्टकालपञ्चकालविभागः

दिवसस्याष्टधा भागो दक्षादिभिरुदाहृतः ॥ १२१ ॥

स्नानादिब्रह्मयज्ञान्तं तत्राद्ये समुदाहृतम् ।
वेदाभ्यासो द्वितीये तु तृतीयेऽर्थार्जनं स्मृतम् ॥ १२२ ॥

स्नानादिदेवपूजान्तं चतुर्थे समुदाहृतम् ।
पञ्चमे वैश्वदेवादिभोजनान्तमुदाहृतम् ॥ १२३ ॥

इतिहासपुराणादिपाठस्सप्तमषष्ठयोः ।
अष्टमे लौकिकं कार्यं क्रम एवमुदीरितः ॥ १२४ ॥

शाण्डिल्यादिभिरन्यैस्तु पञ्चकालपरायणैः ।
अच्छिद्रपञ्चकालत्वं प्रशस्तमिति वर्णितम् ॥ १२५ ॥

आदौ तत्राभिगमनमुपादानमनन्तरम् ।
इज्यास्वाध्याययोगाश्च क्रमेण समुदाहृताः ॥ १२६ ॥

ब्राह्मान्मुहूर्तादारभ्य प्रोच्यते पञ्चकालता ।
ब्राह्मे मुहूर्ते कर्तव्यं कर्मात्र प्रतिपाद्यते ॥ १२७ ॥

ब्राह्ममुहूर्तकर्तव्यम्

शर्वर्याश्चरमो यामो मुहूर्तो ब्राह्म ईरितः ।
अन्ये सूर्योदयात्पूर्वं त्रिमुहूर्तं विदुर्बुधाः ॥ १२८ ॥

निद्रां करोति यस्तत्र पादकृच्छ्रं समाचरेत् ।
तस्मात्तत्र त्यक्तनिद्र उत्थायातन्द्रितो द्विजः ॥ १२९ ॥

सप्तकृत्वो हरिरिति प्रोक्त्वाऽथ हरिरोमिति ।
ग्राहग्रस्ते प्रातरिति श्लोकानुक्त्वा प्रसन्नधीः ॥ १३० ॥

उत्थाय शयनात्पाणिपादप्रक्षालनपूर्वकम् ।
द्विराचम्याथवाऽशक्तौ दक्षिणं श्रवणं स्पृशेत् ॥ १३१ ॥

तस्मिन्तल्पे समासीनो जीवेशगुणचिन्तनम् ।
कृत्वा श्रीनिगमान्तार्यवङ्गीशोक्तप्रकारतः ॥ १३२ ॥

निर्विघ्नं धैर्यमाश्रित्य गुरुवन्दनपूर्वकम् ।
ध्यात्वा सीतापतिं तस्य नाम्नां संकीर्तनं चरेत् ॥ १३३ ॥

चतुर्णां द्वादशानां च दशानामपि च श्रियः ।
स्तोत्रैः स्तुत्वा तदीयैस्तां तद्गुणानपि कीर्तयेत् १३४ ॥

योगं समाप्य विधिवत्कृतं चेत्यादिमन्त्रतः ।
सामान्यतः पञ्चकालं ततोऽभिगमनं पृथक् ॥ १३५ ॥

संकल्प्य बलमन्त्रं च जपित्वा तदनन्तरम् ।
पद्यं स्वशेषभूतेनेत्यथवा भगवानिति ॥ १३६ ॥

गद्यं वाप्यनुसन्धाय दक्षिणं चरणं ततः ।
नमः क्षितिधरायेति मन्त्रेण प्रणवादिना ॥ १३७ ॥

विन्यस्य भूम्यां तदनु मन्त्राभ्यां प्रार्थयेच्च ताम् ।
समुद्रवसने देवि पर्वतस्तनमण्डिते ॥ १३८ ॥

विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ।
नमोऽस्तु प्रियदत्तायै तुभ्यं देवि वसुन्धरे ॥ १३९ ॥

त्वं माता सर्वलोकानां पादस्पर्शं क्षमस्व मे ।
इति संप्रार्थ्य धरणीं संप्रणम्य ततः परम् ॥ १४० ॥

मन्त्रैर्विष्णोः क्रमोऽसीति चतुर्भिश्चतुरः पदः ।
भूमौ निक्षिप्य तदनु ध्यायन्विष्णुं त्रिविक्रमम् ॥ १४१ ॥

बहिर्गत्वा केशवाय नम इत्यथ मन्त्रतः ।

मलमूत्रोत्सर्जनविधिः

उदीचीं प्रागुदीचीं वा प्राचीं वा नैर्ऋतिं तु वा ॥ १४२ ॥

शौचक्षमां दिशं गत्वा विण्मूत्रोत्सर्गहेतवे ।
मृदं तोयं च संस्थाप्य मलमूत्रे परित्यजेत् ॥ १४३ ॥

आखुकृष्टां हलोत्खातां कूलस्थां जन्तुदूषिताम् ।
शर्करामेध्यसंयुक्तां शौचशिष्टं परस्य च ॥ १४४ ॥

मृत्तिकामूषरान्मार्गाद्वल्मीकाज्जलमध्यतः ।
गृहाच्च सिकताः पांसून्कर्दमानपि नाहरेत् ॥ १४५ ॥

एताभ्योऽन्यां मृदं शुद्धां निक्षिप्य जलभाजनम् ।
उपानहौ दिवा धार्यौ समावर्तनसूत्रतः ॥ १४६ ॥

आश्वमेधिकहेयोक्त्या पादुका तु दिवा न हि ।
योगाभ्यासरतैश्चैव पाषण्डादिनिषिद्धजैः ॥ १४७ ॥

कृष्टं चेदिति सूत्रार्थाच्चर्मणां च निषेधतः ।
रात्रौ तु पादुका धार्या गृहस्थैस्त्रिभिरेव च ॥ १४८ ॥

सन्त्यक्तपादुकोपानद्विसृज्य सहचारिणम् ।
निवीतं ब्रह्मसूत्रं तु कर्णे विन्यस्य दक्षिणे ॥ १४९ ॥

प्रच्छाद्य वदनं घ्राणं मूर्धानमपि वाससा ।
अयाज्ञीयैस्तृणैश्शुष्कैः पर्णैर्वाऽच्छाद्य मेदिनीम् ॥ १५० ॥

मौनी दिवोदङ्मुखस्सन्नक्तं चेद्दक्षिणामुखः ।
मलं मूत्रं च विसृजेत् सन्ध्ययोस्तु यथा दिवा ॥ १५१ ॥

आपद्यशक्तौ स्त्रीविप्राद्याभिमुख्ये च दिग्भ्रमे ।
भये दिङ्नियमो नास्ति दिवा नक्तमपि क्वचित् ॥ १५२ ॥

देवालयजलाग्न्यर्कसोमगोविप्रतारकाः ।
पश्यन्दिशो योषितश्च न विण्मूत्रे परित्यजेत् ॥ १५३ ॥

आरामोद्यानसस्येषु श्मशानोष्मरभस्मसु ।
वल्मीकगिरिदर्भेषु गर्तक्षेत्रखलाध्वसु ॥ १५४ ॥

अमेध्यसिकताच्छायागुल्मचत्वरवारिषु ।
कृष्टे गोष्ठे वृक्षमूले तटाकाब्धिनदीतटे ॥ १५५ ॥

गोमये यज्ञशालायां परभूमौ च शाद्वले ।
गृहाङ्गणे च पाषाणे रन्ध्रे कीटादिजन्तुषु ॥ १५६ ॥

संनिधौ द्विजगोस्त्रीणां न विण्मूत्रे परित्यजेत् ।
दृष्टं चेत्स्वमलं सूर्यं पश्येद्गां ब्राह्मणं तु वा ॥ १५७ ॥

व्रीहित्रितयं क्रमश ऊर्ध्वाग्रं विदुरङ्गुलम् ।
षण्णवत्यङ्गुलं दण्डः क्रोशस्तद्द्विसहस्रकम् ॥ १५८ ॥

क्रोशाद्वा शतदण्डाद्वा परितो विष्णुमन्दिरात् ।
ज्ञानतोऽज्ञानतो वाऽपि विण्मूत्रे यः परित्यजेत् ॥ १५९ ॥

स विनाशं व्रजत्याशु भगवांश्च प्रकुप्यति ।
मूत्रे गर्ते च पतति यावन्मन्वन्तरं द्विजः ॥ १६० ॥

स्नानं कृत्वाऽऽर्द्रवसनो विण्मूत्रे विसृजेद्यदि ।
प्राणायामत्रयं कृत्वा पुनस्स्नानं समाचरेत् ॥ १६१ ॥

कृत्वा मूत्रं पुरीषं वा श्वादिस्पृष्टो यदा भवेत् ।
स्नात्वा सचेलं गायत्रीसहस्रजपतश्शुचिः ॥ १६२ ॥

तथा लशुनसंस्पृष्टः स्नानोपोषणतश्शुचिः ।
गृहीतोदकपात्रश्चेन्मलमूत्रे समुत्सृजेत् ॥ १६३ ॥

अरत्निमात्रादुदकाद्बहिरेव समाचरेत्।
नद्यादौ पुण्यतीर्थे च न तु शौचं समाचरेत्॥ १७५॥

अन्तर्जानुकरं सव्यं बहिर्जान्वितरं करम्।
कृत्वा मृदं दक्षिणेन गृहीत्वा पाणिना करे॥ १७६॥

सव्ये कृत्वा तेन गुदं मेहनं च विशोधयेत्।
गुदे पञ्चदश प्रोक्ता मृत्तिका द्वादशापि वा॥ १७७॥

षण्मेहने सव्यहस्ते मृद्देया चान्तरान्तरा।
यावन्नापैति मृल्लेपस्तावद्दक्षिणपाणिना॥ १७८॥

देयमम्भो न वारिस्थो गुदप्रक्षालनं चरेत्।
अन्तर्लिङ्गक्षालनेन यतेश्च ब्रह्मचारिणः॥ १७९॥

चान्द्रायणं निष्कृतिः स्यात् न दोषो गृहमेधिनाम्।
अर्धप्रसृतिमात्राद्यास्तदर्धा इतरा मृदः॥ १८०॥

त्रिपर्वमात्रा लिङ्गे स्युः पर्वमात्रास्तु वा मृदः।
पादयोर्हस्तयोश्चापि धात्रीफलसमा मृदः॥ १८१॥

सव्यहस्ते विंशतिः स्युः पादयोस्सप्त सप्त च।
मिलित्वा विंशतिः पाण्योस्ततो नखविशोधनम्॥ १८२॥

कृत्वा शौचं कृतं यत्र तद्देशं क्षालयेत्पुनः।
तिस्रो लिङ्गे मृदो देया एकैकान्तरमृत्तिकाः॥ १८३॥

पञ्च वामकरे पाण्योस्तिस्रो मूत्रस्य शुद्धये।
एका लिङ्गे करे वामे तिस्रो द्वे हस्तयोर्मृदः॥ १८४॥

रात्रौ मूत्रे शुचिश्शुक्लोत्सर्गे तद्द्विगुणं भवेत्।
पायूपस्थगतं शौचतोयं नाशुद्धिकृद् भवेत्॥ १८५॥

एवं शौचे मनस्तुष्टिः कृतेऽपि न भवेद्यदि।
पुनश्शौचं प्रकुर्वीत गन्धलेपक्षयेऽपि वा॥ १८६॥

विण्मूत्रयोर्यत्पूर्वं स्यात्तच्छौचं पूर्वमाचरेत् ।
विट्च्छौचं प्रथमं कुर्याद् भवेतां युगपद्यदि ॥ १८७ ॥

प्राक्कुर्याद्यदि विट्शौचं वामे पञ्चमृदः करे ।
दक्षोक्तविधिना कुर्यान्मूत्रशौचं समाहितः ॥ १८८ ॥

उपविष्टे तु विण्मूत्रोत्सर्जनार्थं न चेद् भवेत् ।
उक्तार्धशौचं सिकताशौचे तु द्विगुणं भवेत् ॥ १८९ ॥

विण्मूत्रोत्सर्जने स्वाङ्गे मलस्पर्शो भवेद्यदि ।
ऊर्वोस्सप्तमृदस्तिस्रः पादयोः पञ्च जङ्घयोः ॥ १९० ॥

कटिं प्रक्षाल्य मृत्तोयैर्वस्त्रमन्यच्च धारयेत् ।
प्रक्षाल्य जानुचरणौ हस्तावाकूर्परं तथा ॥ १९१ ॥

गण्डूषान् षट् द्विषट्कुर्यात्कुर्यान्मूत्रपुरीषयोः ।
वक्ष्यमाणेन विधिना द्विस्त्रिराचमनं चरेत् ॥ १९२ ॥

एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः ।
यतेश्चतुर्गुणं प्रोक्तं अर्धं स्यात्स्त्र्यनुपेतयोः ॥ १९३ ॥

अशक्तातुरभीतानां यथाशक्ति समीरितम् ।

आचमनविधिः

प्रक्षाल्य जानु वा जङ्घं पादावाकूर्परं करौ ॥ १९४ ॥

संमृज्य पादौ हस्तौ च प्राङ्मुखो वाप्युदङ्मुखः ।
अन्तर्जानुकरौ कृत्वा कुक्कुटासनसंस्थितः ॥ १९५ ॥

वामहस्तेन सलिलं स्पृशन् दक्षिणपाणिना ।
सम्यग्धृतपवित्रेण कुर्यादाचमनं सदा ॥ १९६ ॥

गोकर्णाकृतिहस्तेन गृहीत्वा देवतीर्थतः ।
तोयं तले तत्संस्थाप्यमुक्त्वाङ्गुष्ठकनिष्ठके ॥ १९७ ॥

ब्रह्मतीर्थेन निश्शब्दं माषमग्नजलं पिबेत् ।
तन्न्यूनमधिकं पीत्वा सुरापानसमं भवेत् ॥ १९८ ॥

देवादितीर्थानि

कनिष्ठातर्जन्यङ्गुष्ठमूलान्यग्रतले करे ।
ऋषिपित्रजदेवाग्नितीर्थानि स्युर्यथाक्रमम् ॥ १९९ ॥

ध्यायन् वेदत्रयं पीत्वा त्रिरम्ब्वोष्ठद्वयं ततः ।
ध्यायन्नथर्वेतिहासौ द्विरङ्गुष्ठस्य मूलतः ॥ २०० ॥

संमृज्याथ पुराणानि ध्यायन्नोष्ठद्वयं सकृत् ।
अङ्गुलीभिर्मध्यमाभिस्संस्पृष्ट्वा देवतीर्थतः ॥ २०१ ॥

ध्यायन्नम्न्यश्विविष्णूंश्च सव्यहस्तं पदद्वयम् ।
शिरश्च क्रमशः प्रोक्ष्य ततश्चन्द्रदिवाकरौ ॥ २०२॥

ध्यायन्ननामिकाङ्गुष्ठयोगेनाक्षिद्वयं स्पृशेत् ।
तर्जन्यङ्गुष्ठगुयोगेन ध्यायन्प्राणसमीरणौ ॥ २०३ ॥

संस्पृष्ट्वा नासिके पश्चात्कनिष्ठाङ्गुष्ठयोगतः ।
दिशश्च विदिशो ध्यायन् श्रावणे समुपस्पृशेत् ॥ २०४ ॥

ध्यायन्निन्द्रमुपेन्द्रं च मध्यमाङ्गुष्ठयोगतः ।
बाहुद्वयमुपस्पृश्य ततो ध्यायन्वसुन्धराम् ॥ २०५ ॥

अङ्गुष्ठाग्रेण वै नाभिं तलेन हृदयं ततः ।
ध्यायंस्तु परमात्मानं स्पृष्ट्वा ध्यायंस्ततस्त्रयीम् ॥ २०६ ॥

अङ्गुलीभिस्समस्ताभिः मूर्धानं समुपस्पृशेत् ।
प्रत्यङ्गमुदकस्पर्शं कृत्वान्ते वा जलं स्पृशेत् ॥ २०७ ॥

त्रिभिर्द्वादशभिर्विष्णोश्चतुर्भिरपि नामभिः ।
श्रीनाम्ना च चतुर्थ्यन्तैस्तदन्ते च नमोऽन्वितैः ॥ २०८ ॥

पानत्रयादिमूर्धान्तस्पर्शान्तं संयगाचरेत् ।
पैठीनसीरितश्चायमापस्तम्भेन चेरितः ॥ २०९ ॥

सद्भिराचरितश्चापि सम्यगाचमनक्रमः ।
प्रकारभेदा मुनिभिर्वर्णिता गौतमादिभिः ॥ २१० ॥

अङ्गोपस्पर्शने पाने देवता न स्मरेद्यदि ।
रुधिरेण मलेनापि भवेदाचमनं कृतम् ॥ २११ ॥

यथोपदेशं कर्तव्यं सद्भिराचमनादिकम् ।
विशिखः प्रावृतशिरास्तिष्ठन् जल्पन् हसन्नपि ॥ २१२ ॥

गृहीतपादुकोपानद्रथ्यास्थो घृतकञ्चुकः ।
अप्रक्षालितपादश्च शयानश्चान्यमानसः ॥ २१३ ॥

उदक्या सूतिकाव्रात्यभिषक्पतितदेवलान् ।
शूद्रान्त्यविड्वराहांश्च खरकाकाश्च कुक्कुटान् ॥ २१४ ॥

गर्दभानपि संपश्यन् शृण्वन्नप्यन्त्यभाषणम् ।
नाचामेज्जानुदघ्नाप्सु नैव दोषोऽस्ति तिष्ठतः ॥ २१५ ॥

पल्वलोदकमुष्णाम्भ एकहस्तेर्पितं परैः ।
सफेनबुद्बुदप्राणिकुणदुर्गन्धसंयुतम् ॥ २१६ ॥

हस्तक्षुब्धं पर्युषितं नखस्पृष्टं समृत्तिकम् ॥
एलादिद्रव्यसंयुक्तं भिन्नरन्ध्रविनिर्गतम् ॥ २१७ ॥

क्षारं छन्नं शौचशिष्टं वर्षधाराजलं तथा ।
देवाभिषिक्तं हेयं च त्यजेदाचमने जलम् ॥ २१८ ॥

पादशौचावशिष्टाम्बु किंचिन्निस्राव्य योजयेत् ।
पश्चान्मुखो यद्याचामेत् पुनराचमनं चरेत् ॥ २१९ ॥

यद्याचामेद्दक्षिणाभिमुखः स्नानं समाचरेत् ।

आचमननिमित्तानि

प्रक्षाल्य पादावुन्मृज्य जग्ध्वा सस्नेहमौषधम् ॥ २२० ॥

शिखाबन्धविमोक्षेश्रुमुक्त्वोक्त्वा पतितादिभिः ।
तर्तुकामाश्च तीर्थाम्भः आदावन्त्ये च कर्मणाम् ॥ २२१ ॥

अधोवायुविसर्गे च ब्रह्मसूत्रविपर्यये ।
नासामलं शोणितं च स्त्रियं गां पावकं द्विजम् ॥ २२२ ॥

केशं भूमिगतं स्वस्य स्पृष्ट्वा चाप्रयतं नरम् ।
उत्सार्य पक्षिणश्शून्यहस्तेनोक्त्वानृतं वचः ॥ २२३ ॥

आस्याम्बुबिन्दुपतने गुर्वादिभ्योऽभिवादने ।
कर्मकाले श्वशूद्रादीन् दृष्ट्वा च क्रोधहासयोः ॥ २२४ ॥

स्पृष्ट्वा मूषिकमार्जारावाक्रुश्याचमनं चरेत् ।
अशक्तौ सलिलाभावे दक्षिणं श्रवणं स्पृशेत् ॥ २२५ ॥

आर्द्रं सकृद्रां भूमिं वा शाद्वलान्योषधीस्तु वा ।
रथ्यां श्मशानमाक्रम्य चत्वरं च महापथम् ॥ २२६ ॥

स्पृष्ट्वा विलोमकावोष्ठावुक्त्वा निष्ठुरभाषणम् ।
क्षुत्वा सुप्त्वा च निष्ठीव्य वसनं परिधाय च ॥ २२७ ॥

भोजने प्रयतो वापि भक्ष्ये चाद्यन्तयोरपि ।
मूत्रे च द्विर्द्विराचामेत् त्रिः पुरीषे विसर्जिते ॥ २२८ ॥

दाने प्रतिग्रहे होमे जपे सन्ध्यासु चार्चने ।
बलिकर्मणि चाचामेदादौ द्विस्सकृदन्ततः ॥ २२९ ॥

स्नानखादनपानेषु सकृदादौ द्विरन्ततः ।
मधुपर्कस्य सोमस्य विष्णुपादोदकस्य च ॥ २३० ॥

फलमूलतिलेक्षूणां भक्षणे पत्रपुष्पयोः ।
गन्धद्रव्यस्य चान्यस्य नाद्यन्ताचमनं स्मृतम् ॥ २३१ ॥

शाकादिदन्तसंलग्नं न स्पृष्टं यदि जिह्वया ।
नाशुद्धिकृत्प्रच्युतं चेन्निष्ठीव्याचमनं चरेत् ॥ २३२ ॥

श्मश्रुवक्त्रगतं शुद्धं न हस्तेन स्पृशेद्यदि ।
स्पृष्टं स्याद्यदि तद्धस्तं प्रक्षाल्याचमनं चरेत् ॥ २३३ ॥

यदि भोजनशालायां परिवेषणकृज्जनः ।
गृहीत्वा तैजसं पात्रं उच्छिष्टं यदि संस्पृशेत् ॥ २३४ ॥

भूमौ निधाय तत्पात्रं आचम्य प्रोक्षयेत्तु तत् ।
गृहीतामलवस्त्रादिर्यद्युच्छिष्टो भवेत्तदा ॥ २३५ ॥

अनिधायैव तद्द्रव्यं आचम्य प्रचरेत्पुनः ।
गृहीतान्नो यदा मूत्रपुरीषोत्सर्जनं चरेत् ॥ २३६ ॥

तदा निधाय भूम्यां तच्छौचं कृत्वाङ्कसंस्थितम् ।
कृत्वा तदन्नमाचम्य त्यक्त्व ग्रासचतुष्टयम् ॥ २३७ ॥

दर्शयित्वा सवित्रे तत्प्रोक्ष्याद्यादथ शेषितम् ।
आपद्यन्नमनिक्षिप्य कुर्यात् शौचादि पूर्ववत् ॥ २३८ ॥

चोरव्याघ्रयुते मार्गे विपिने निर्जने निशि ।
गृहीतान्नः परित्यक्तमलमूत्रो न दुष्यति ॥ २३९ ॥

अभ्यङ्गे वमने क्षौरे मैथुने च कृतेह ततः ।
अनाचम्य मलं त्यक्त्वा त्रिरात्रमशुचिर्भवेत् ॥ २४० ॥

यदा यदा पादशौचमाचामश्च तदा तदा ।
यदा यदा चाचमनं पादशौचं तदा तदा ॥ २४१ ॥

दन्तधावनविधिः

द्विःकृत्वाऽऽचमनं वक्त्रं प्रक्षाल्य प्राङ्मुखः करौ ।
कृत्वाऽन्तर्जानुयतवागास्थितः कुक्कुटासनम् ॥ २४२ ॥

सन्त्यक्तपादुकोपानद्दन्तधावनमाचरेत् ।
गोष्ठे देवालये नद्यां श्मशाने चाशुचिस्थले ॥ २४३ ॥

सलिले यज्ञशालायां न कुर्याद्दन्तधावनम् ।
भोजनं भक्षणं पानं मैथुनं दन्तधावने ॥ २४४ ॥

क्षौरं च वेदाध्ययनं तैलाभ्यक्तशिरास्त्यजेत् ।
अभ्यङ्गे जलधिस्नाने मैथुने दन्तधावने ॥ २४५ ॥

तात्कालिकी तिथिः प्रोक्ता जनने मरणेऽपि च ।
कार्पासशाकबन्धूकक्रमुकाश्वत्थशाल्मलीन् ॥ २४६ ॥

कोविदारं करञ्जं च श्लेष्मातकविभीतकौ।
इङ्गुदीं तिन्दुकं दर्भान् वर्जयेत् दन्तधावने ॥ २४७॥

इष्टकालोष्टपाषाणवालुकाङ्गारभस्मभिः।
अङ्गुलीभिर्विनाङ्गुष्ठानामिके वा सदा नखैः ॥ २४८॥

न दन्तधावनं कुर्यात् स्नानं कृत्वा च नाचरेत्।
मधूकतालहिन्तालनालिकेरबृहद्वटान् ॥ २४९॥

कुशकाशपलाशांश्च खर्जूरं केतकीमपि
शिंशुपामपि यः कुर्यात् दन्तधावनकर्मणि ॥ २५०॥

तावद्भवति चण्डालो यावद्गङ्गां न पश्यति।
कषायतिक्तकटुकक्षीरिकण्टकवृक्षजैः ॥ २५१॥

काष्ठैः कुर्याद्दन्तशुद्धिमपामार्गशिरीषजै :।
चतुर्दश्यष्टमीषष्ठीनवमीप्रतिपत्सु च ॥ २५२॥

अर्कभार्गवभौमार्किवासरेषु त्रिजन्मसु।
पौर्णमास्यां व्यतीपाते दन्तकाष्ठं विवर्जयेत् ॥ २५३॥

अनिषिद्धैस्तृणै : पर्णैरेषु स्यात् दन्तधावनम्।
न कुर्यात्तैरपि श्राद्धदिवसे व्रतवासरे ॥ २५४॥

विधवाव्रतिनौ नैव कुर्यातां दन्तधावनम्।
आयुर्बलं यशोवर्च : प्रजां पशुवसूनि च ॥ २५५॥

ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते।
प्रक्षालितं दन्तकाष्ठमायुरित्यभिमन्त्र्य च ॥ २५६॥

वामाधो भागमारभ्य संविशोध्य प्रदक्षिणम्।
दन्ताद्विदार्य तं काष्ठं भागेनैकेन मार्जयेत् ॥ २५७॥

जिह्वां ततो द्वितीयेन प्रक्षाल्य शकले उभे।
परित्यज्य शुचौ देशे गण्डूषान् षोडशाचरेत् ॥ २५८॥

द्विराचामेन्निषिद्धेऽपि दिने जिह्वां तु मार्जयेत् ।
निषिद्धे दिवसे दन्तकाष्ठाभावेऽपि वा द्विजः ॥ २५९ ॥

कुर्यात् द्वादशगण्डूषानास्यशुद्धिस्ततो भवेत् ।
गण्डूषकाले तर्जन्या न कुर्यात् दन्तशोधनम् ॥ २६० ॥

न पिबेच्च तदा तोयं उभयं नरकप्रदम् ।
आसीन एव गण्डूषान् वामभागे सदाऽऽचरेत् ॥ २६१ ॥

स्नानविधिः

स्नानेन रूपं बलमायुरग्र्यं धैर्यं यशोवीर्यमरोगतां च ।
सौख्यं तपश्शौचमघक्षयं च प्राप्नोति धर्मं मनुजस्सुमेधाम् ॥ २६२ ॥

स्नानं सन्ध्या च होमोप्यभिगमनमुपादानमध्याह्नकृत्ये
रामेज्यावैश्वदेवो बलिहरणमथातिथ्यधर्मश्च भुक्तिः ।
पश्चात्स्वाध्यायसन्ध्ये रघुपतियजनं वैश्वदेवश्च योगः
कर्तव्यास्सद्भिरेते प्रतिदिनमनघैः श्रीशकैङ्कर्यबुद्ध्या ॥ २६३ ॥

शर्वर्यां मृतवत्सुप्तस्स्वेदलालाविदूषितः ।
विना स्नानमनर्हः स्यात् जपहोमादिकर्मसु ॥ २६४ ॥

नित्यं नैमित्तिकं काम्यं मलापहरणं तथा ।
क्रियास्नानं क्रियाङ्गं च स्नानं षड्विधमुच्यते ॥ २६५ ॥

नित्यं प्रातश्च मध्याह्ने प्रत्यवायश्रुतेः स्मृतम् ।
स्पृष्टास्यान्त्यश्वशूद्राद्यैस्स्नानं नैमित्तिकं भवेत् ॥ २६६ ॥

पुण्यस्नानादिकं काम्यं निष्कामस्य न तद्भवेत् ।
तैलामलकपिष्टाद्यैर्मलापहरणं भवेत् ॥ २६७ ॥

स्नानं गङ्गादितीर्थेषु क्रियास्नानमुदाहृतम् ।
जपहोमार्चनाङ्गं यत्तत्क्रियाङ्गमुदाहृतम् ॥ २६८ ॥

उद्धृताद्भूगतं श्रेष्ठं प्रवाहाम्बु ततोऽधिकम् ।
नद्यास्स्नानं ततः श्रेष्ठं पुण्यतीर्थं ततोऽधिकम् ॥ २६९ ॥

विष्ण्वालयसमीपस्थं तोयं पातकनाशनम् ।
यत्र भागवताः स्नान्ति तद्वै परमपावनम् ॥ २७० ॥

बहूदके विद्यमाने न स्नायादल्पवारिषु ।
नद्यां तु विद्यमानायां नान्यत्र स्नानमाचरेत् ॥ २७१ ॥

तटाकादौ तु न स्नायादन्यसृष्टेऽप्रतिष्ठिते ।
परकीयतटाकादौ दश सप्ताथ पञ्च वा ॥ २७२ ॥

मृत्पिण्डांश्चतुरस्त्रीन्वा स्नायादुद्धृत्य वारिषु ।
तटाककर्तुः पापानुगुणं संख्या विकल्पिता ॥ २७३ ॥

यद्यनुद्धृत्य मृत्पिण्डान्तत्र स्नानं समाचरेत् ।
तटाककर्तुर्यत्पापं तत्पापं प्राप्नुयान्नरः ॥ २७४ ॥

सर्वोद्देशेन तूत्सृष्टे मृत्पिण्डान्न समुद्धरेत् ।
अन्यायार्जितवित्तस्य तथा वार्धुषिकस्य च ॥ २७५ ॥

पतितस्य तटाकादौ स्नात्वा कृच्छ्रं समाचरेत् ।
अन्त्यैः कृततटाकादौ स्नात्वा पीत्वाप्यकामतः ॥ २७६ ॥

उपोष्यैकदिनं ब्रह्मकूर्चपानेन शुध्यति ।
स्नात्वा पीत्वा बुद्धिपूर्वं प्राजापत्येन शुध्यति ॥ २७७ ॥

न स्नायात्स्त्रीरोगिशूद्रपाषण्डपतितादिभिः ।
देवतान्तरसंसर्गसहितेऽपि जलाशये ॥ २७८ ॥

नरो नद्यां स्नानकाले नदीमन्यां न कीर्तयेत् ।
गङ्गां गोदावरीं चैव सर्वत्र परिकीर्तयेत् ॥ २७९ ॥

रात्रौ स्नायान्निमित्ते तु पूर्वपश्चिमयामयोः ।
अनुज्ञाप्य द्विजं स्नायादग्निं प्रज्वाल्य वा निशि ॥ २८० ॥

नित्येऽरुणोदयात्पश्चान्न तु मध्यमयामयोः ।
पुत्रजन्मविवाहोपरागबन्धुमृतिर्विना ॥ २८१ ॥

प्राङ्मुखोदङ्मुखो वापि रात्रौ मध्यमयामयोः ।
प्रत्यङ्मुखः प्राङ्मुखश्च पूर्वपश्चिमयामयोः ॥ २८२ ॥

दिवार्काभिमुखः स्नायात् प्रवाहाभिमुखस्सदा ।
नित्यं स्नातुमशक्तः चेत्कार्यमुष्णेन वारिणा ॥ २८३ ॥

श्राद्धे च जन्मनक्षत्रे मृते जन्मनि संक्रमे ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥ २८४ ॥

यदि स्नायात्तु मोहेन गोहत्या पापमाप्नुयात् ।
मत्स्यमज्जनवत्स्नानं विधिमन्त्रविवर्जितम् ॥ २८५ ॥

अज्ञातं च तटाकादि केनचित् क्षोभितं जलम् ।
नद्यां प्रथमवेगापः परिभ्रष्टाश्च तीरतः ॥ २८६ ॥

गत्वा प्रत्यागताश्चापः स्नानादौ परिवर्जयेत् ।
ग्रीष्मे शुष्यन्ति या नद्यः क्षुद्रनद्यश्च ताःस्मृताः ॥ २८७ ॥

तासां प्रवाहाभिनवो यदा समभवत्तदा ।
काले त्रिरात्रं न स्नायादकाले दशवासरम् ॥ २८८ ॥

नूतनाम्भसि न स्नायादकाले दशवासरम् ।
काले त्र्यहं पुराणं चेदल्पमम्भो नवाम्भसः ॥ २८९ ॥

काले काले च नो दोषा नवाम्भोल्पतरं यदि ।
स्नानसन्ध्यादिकं कर्म कर्तुं नातिक्रमेन्नदीम् ॥ २९० ॥

अस्नात्वानाचम्य वापि नदीं मार्गे न लङ्घयेत् ।
उत्सवावभृथे विष्णोर्यस्स्नायाद्विष्णुना सह ॥ २९१ ॥

स वैकुण्ठं व्रजेल्लोकं बहुपातक्यविध्रुवम् ।
अङ्गैर्न क्षोभयेत्तोयं चरणेन न ताडयेत् ॥ २९२ ॥

गण्डूषष्ठीवनं तोये शारीरं नोत्सृजेन्मलम् ।
नाचरेत्प्लावनक्रीडां न स्नायात् गुरुवारिणि ॥ २९३ ॥

मलापकर्षणं पृष्ठे न कुर्वीत परस्परम् ।
स्नानीयाद्यनुलेपं च न मृजेद्वाससा मुखम् ॥ २९४ ॥

शरीरं निर्मलीकृत्य तीरे तूद्धृतवारिणा ।
प्रक्षाल्य देशं तं स्नायादवगाह्य ततोऽम्भसि ॥ २९५ ॥

घटेनैव स्नानपाने सलिलं नखनिस्सृतम् ।
केशवस्त्रोदकं शूर्पवातस्संमार्जनीरजः ॥ २९६ ॥

खराजयोर्बिडालस्य पादपांसुकणास्तथा ।
छायानृदीपखट्वानां हन्ति पुण्यं पुराकृतम् ॥ २९७ ॥

न स्नायादातुरो जीर्णो माङ्गल्यं विनिवर्त्य च ।
श्मशानपार्श्वे चण्डालवाटिकायास्समीपतः ॥ २९८ ॥

विण्मूत्राभ्यां चोपरुद्धो वारितस्तीर्थरक्षकैः ।
अनुव्रज्य सुहृद्बन्धून् स्नायादप्यलङ्कृतः ॥ २९९ ॥

पूजाहोमजपध्यानश्राद्धानां स्नानदानयोः ।
ब्रह्मयज्ञस्य चादौ स्युः प्राणायामास्त्रयस्त्रयः ॥ ३०० ॥

अर्घ्यदानस्य सन्ध्याया आदौ च स्यात्सकृत्सकृत् ।

पवित्रलक्षणम्

सप्तभिर्वा चतुर्भिर्वा दर्भैर्द्वाभ्यामथापि वा ॥ ३०१ ॥

कृतं पवित्रं सन्धार्यं स्नानसन्ध्यादिकर्मसु ।
पुरतो वामहस्तेन धृत्वाऽग्रे दर्भयोरनु ॥ ३०२ ॥

अङ्गुष्ठं दक्षिणं दर्भमूलेनैव समन्वितम् ।
ऊर्ध्वं दक्षिणतर्जन्यां पौनःपुन्येन घर्षयेत् ॥ ३०३ ॥

घृष्टौ तौ द्विगुणीकृत्य प्रादक्षिण्येन मध्यतः ।
ज्ञानमुद्रामधः कृत्वा तारणे ग्रन्थिबन्धनम् ॥ ३०४ ॥

तर्जन्यङ्गुष्ठयोरग्रं योजितज्ञानमुद्रिका ।
द्व्यङ्गुलं वलयं तस्य ग्रन्थिरेकाङ्गुला भवेत् ॥ ३०५ ॥

चतुरङ्गुलमग्रं स्यात्पवित्रं शिष्टसंमतम् ।
पर्वणः प्रथमस्योर्ध्वमधोमध्यमपर्वणः ॥ ३०६ ॥

अनामिकायां हस्तस्य दक्षिणस्योभयोस्तु वा ।
देहे निक्षिप्तमन्यत्र दक्षिणश्रवणान्त्यजेत् ॥ ३०७ ॥

पवित्रकूर्चयोर्ग्रन्थिं त्यजेद्विप्रस्य भूतले ।
पवित्रकूर्चौ सग्रन्थी यदि भूमौ परित्यजेत् ॥ ३०८ ॥

उपवासत्रयं कुर्यादुपवासं प्रमादतः ।

संकल्पक्रमः

सपवित्रस्सदर्भो वा कर्माङ्गाचमनं चरेत् ३०९ ॥

सर्वेषां कर्मणामादावाचम्यासून्नियम्य च ।
धृत्वाञ्जलिं पवित्रं च प्रागग्रकुशसंस्थितः ॥ ३१० ॥

ध्यात्वा गुरूनिन्दिरेशं नत्वा सेनेशमादितः ।
हरिरोमिति चोच्चार्य त्रिगोविन्देति कीर्तयेत् ॥ ३११ ॥

ततःसव्येतरकरौ दक्षिणे दक्षिणोत्तरौ ।
निधाय जानुन्युत्तानाऽधोमुखौ दक्षिणाङ्गुलीः ॥ ३१२ ॥

अङ्गुष्ठरहितास्सव्यतर्जन्यङ्गुष्ठमध्यतः ।
विन्यस्य सव्यमङ्गुष्ठं दक्षिणाङ्गुष्ठचेष्टितम् ॥ ३१३ ॥

कृत्वा च तिथिवारादीनुक्त्वा भगवदाज्ञया ।
श्रीरामचन्द्रप्रीत्यर्थं विधिवाक्यानुसारतः ॥ ३१४ ॥

करिष्य एतत्कर्मेति संकल्पध्यानसंयुतम् ।
कृत्वा स्नानादिकं कर्म रामायान्ते समर्पयेत् ॥ ३१५ ॥

प्रातस्स्नानविधिः

संकल्पोक्तप्रकारेण प्रातस्स्नानं समाचरेत् ।
समस्तजगदाधार शङ्खचक्र गदाधर ॥ ३१६ ॥

देहि देव ममानुज्ञां युष्मत्तीर्थनिषेवणे ।
इत्यनुज्ञाप्य लक्ष्मीशं स्नानार्थं प्रविशेदपः ॥ ३१७॥

अप्रायत्यविनाशाय निर्मूलत्वाय चात्मनः ।
तृप्तये देवतादीनां त्रिर्निमज्जनमाचरेत् ॥ ३१८॥

अथोदुत्तममित्यादि जपेत्सूक्तं च वारुणम् ।
हिरण्यश्रृङ्गमित्यृग्भ्यामवगाह्य जले तदा ॥ ३१९॥

अभिषिच्य स्वमात्मानं सुमित्रा इति मन्त्रतः ।
दुर्मित्रा योऽस्मान्वयं चेति जलं त्रिर्निक्षिपेत्स्थले ॥ ३२०॥

हस्ताभ्यां तु ततः पश्चात् मन्त्रेणाथ नमोऽग्नये ।
इति प्रणम्य तीर्थाधिदैवतं कमलापतिम् ॥ ३२१॥

अमेध्यांशं स्थितं तोये यदपामिति मन्त्रतः ।
निरस्य दक्षिणे पार्श्वे पश्चादत्याशनादिति ॥ ३२२॥

ऋग्भ्यां त्रिस्तोयमालोड्य चतुरश्रं लिखेत्ततः ।
हस्तायामं तीर्थपीठं गङ्गामावाहयेत्ततः ॥ ३२३॥

आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि ।
एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ ३२४॥

इति मन्त्रेण चावाह्य गङ्गां तां प्रार्थयेत्ततः ।
विष्णुपादाब्जसंभूते गङ्गे त्रिपथगामिनि ॥ ३२५॥

धर्मद्रवेति विख्याते पापं मे हर जाह्नवि ।
विष्णुवामपदाङ्गुष्ठनखस्रोतविनिस्सृते ॥ ३२६॥

तद्भक्तिविघ्नरूपात्त्वं गङ्गे मां मोचयैनसः ।
मन्त्रेणानेन दत्वार्घ्यं तन्नामानि पठेत् ततः ॥ ३२७॥

नन्दिनी नलिनी सीता मालती च मलापहा ।
विष्णुपादाब्जसंभूता गङ्गा त्रिपथगामिनी ॥ ३२८॥

भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी ।
उक्त्वा द्वादशनामानि ततस्संप्रार्थयेन्नदीः ॥ ३२९ ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ ३३० ॥

इमं मे गङ्ग इत्युक्त्वा पुण्यतीर्थानि संस्मरेत् ।
पुष्कराद्यानि तीर्थानि गङ्गाद्यास्सरितस्तथा ॥ ३३१ ॥

आगच्छन्तु महाभागास्स्नानकाले सदा मम ।
निमज्जेत्सलिले चापो अस्मानित्यथ मन्त्रतः ॥ ३३२ ॥

आपोहिष्ठादिभिर्मन्त्रैः ततस्संप्रोक्षणं चरेत् ।
ततोऽघमर्षणं सूक्तं निमग्नस्सलिले जपेत् ॥ ३३३ ॥

ऋतं च सत्यं चेत्यादि षड्वाक्यमघमर्षणम् ।
अघमर्षणसूक्तस्याघमर्षण ऋषिस्स्मृतः ॥ ३३४ ॥

छन्दोऽनुष्टुब्भाववृत्तो देवता परिकीर्तिता ।
आवर्तयेत् द्वादशाष्टषट्त्रिवारं यथाबलम् ॥ ३३५ ॥

ध्यात्वा नारायणं तस्य पादाम्बुजविनिर्गताम् ।
स्वमूर्धनि त्रिपथगां निपतन्तीं विचिन्तयेत् ॥ ३३६ ॥

तया संक्षालितं ध्यायेत् बाह्यमाभ्यन्तरं मलम् ।
'यत्पृथिव्यां रजस्वे'ति गृहीत्वाञ्जलिना जलम् ॥ ३३७ ॥

अभिषिच्य शिरस्यार्द्रं ज्वलतीति तु पाणिना ।
आदाय सलिलं पीत्वा शिरसि प्रोक्षणं चरेत् ॥ ३३८ ॥

'अकार्यकारी'त्येताभ्यां पाणिना जलबिन्दुभिः ।
कृत्वाथाचमनं कुर्यात् देवर्षिपितृतर्पणम् ॥ ३३९ ॥

उपवीती निवीती च प्राचीनावीतवानपि ।
पूर्वोत्तरादक्षिणाशाऽभिमुखः स्वस्वतीर्थतः ॥ ३४० ॥

गोश्रृङ्गमात्रं सलिलं उद्धृत्य सलिले क्षिपेत् ।
नाभिमात्रे जले स्थित्वा गृहीत्वा स्वस्वतीर्थतः ॥ ३४१ ॥

'ऊर्जं वहन्ती' रित्येतं मन्त्रमुक्त्वा ततः परम् ।
अधो मुखेनाञ्जलिना त्रिःकृत्वाप्सु प्रदक्षिणम् ॥ ३४२ ॥

उच्चार्य त्रिस्तृप्यतेति सलिलं त्रिःस्थले क्षिपेत् ।
तद्देशं विशोधयेत्पूर्वं पश्चादपि च वारिणा ॥ ३४३ ॥

ततः स्थले पादमेकमेकं तोये निधाय च ।
आसीनोऽथ द्विराचम्य स्नानशाटीं निपीडयेत् ॥ ३४४ ॥

वस्त्रं चतुर्गुणीकृत्य गृहीत्वा तदधो दशाम् ।
सव्योत्तराभ्यां पाणिभ्यां निवीती पीडयेत् स्थले ॥ ३४५ ॥

ये के चास्मत्कुले जाता अपुत्रा गोत्रजा मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ ३४६ ॥

इति मन्त्रेण निष्पीड्य वस्त्रखण्डद्वयेन तु ।
शिरश्च देहं प्रत्येकमासीनः परिमार्जयेत् ॥ ३४७ ॥

प्रहृत्य मर्दयित्वा वा पाणिना सलिलेऽपि वा ।
गृहीतमपि वान्येन पादे संस्थापितं तु वा ॥ ३४८ ॥

त्रिगुणीकृत्य वा स्नानवस्त्रं पिष्पीडयेत् न तु ।
देवाः पिबन्ति केशाम्बु शरीराम्बु तथर्षयः ॥ ३४९ ॥

पिबन्ति पितरस्तद्वद्वस्त्रनिष्पीडनोदकम् ।
तस्मात् स्नातः सपद्येव न देहं परिमार्जयेत् ॥ ३५० ॥

चाण्डालं पतितं वापि स्नात्वा पश्येत् यदि द्विजः ।
स्नानशाट्या पाणिना वा शिरोऽङ्गं परिमार्जयेत् ॥ ३५१ ॥

आर्द्रं निष्पीडितं वस्त्रं यदि स्कन्धे विनिक्षिपेत् ।
ऊर्ध्वं तु यद्यनुद्धृत्य स्नानवस्त्रमधस्त्यजेत् ॥ ३५२ ॥

परित्यक्तां स्नानशाटीमनाचम्य यदि स्पृशेत् ।
सर्वेष्वेषु निमित्तेषु पुनस्स्नानं समाचरेत् ॥ ३५३ ॥

पुरो दक्षिणपार्श्वे च केशाम्ब्वमृतसंनिभम् ।
सव्यपार्श्वे पृष्ठतश्च तदेव सुरया समम् ॥ ३५४ ॥

'शुचीव' इति मन्त्रेण व्याहृतीभिस्तथाम्बरम् ।
संप्रोक्ष्य 'देवस्य त्वे'ति तदादाय विवस्वते ॥ ३५५ ॥

संदर्शयित्वोदुत्यमित्यावहन्तीति धारयेत् ।
परित्यजेत् स्नानशाटीमूर्ध्वमुद्धृत्य भूतले ॥ ३५६ ॥

जङ्घे पादौ मृज्जलाभ्यां प्रक्षाल्याकूर्परं करौ ।
द्विराचम्य स्नानशाट्यां दत्वा तिस्रो मृदस्ततः ॥ ३५७ ॥

विशोध्य तां विनिष्पीड्य पूर्ववन्मन्त्रवर्जितम् ।
वामप्रकोष्ठे निक्षिप्य द्विराचमनमाचरेत् ॥ ३५८ ॥

वस्त्रलक्षणम्

अधौतं करधौतं च कृष्णमन्यधृतं तथा ।
विनिर्मितं च चण्डालैः काषायं केशदूषितम् ॥ ३५९ ॥

सर्वरत्नं दशाहीनं भुग्नं वस्त्रं विवर्जयेत् ।
जीर्णं स्यूतं च मलिनं विभवे सति वर्जयेत् ॥ ३६० ॥

दशाहीनं तु कौपीनमन्तरा धारयेद्गृही ।
अधोवस्त्रं चोत्तरीयं व्यत्ययेन न धारयेत् ॥ ३६१ ॥

स्नानभेदाः

अघमर्षणदेवादितर्पणादिसमन्वितम् ।
स्नानं वारुणमाख्यातं स्नानं गौणमथोच्यते ॥ ३६२ ॥

गायत्रं कापिलं मान्त्रं मानसं च चतुर्विधम् ।
अशक्तौ वारुणस्नाने गौणस्नानं समाचरेत् ॥ ३६३ ॥

गायत्र्या दशवाराभिमन्त्रितेनाम्भसा शिरः ।
संप्रोक्षयेत् तथाङ्गानि स्नानं गायत्रमीरितम् ॥ ३६४ ॥

पादादिनाभिपर्यन्तं सम्यक्प्रक्षाल्य मृज्जलैः ।
वाससार्द्रेण सर्वाङ्गमार्जनं कापिलं स्मृतम् ॥ ३६५ ॥

'शन्नोदेवी' स्तथाऽपोवा इदं च द्रुपदादि च ।
आपोहीदं चेति मन्त्रैः प्रोक्षणं मान्त्रमीरितम् ॥ ३६६ ॥

पादयोर्मूर्ध्नि हृदये मूर्ध्नि वक्षसि पादयोः ।
हृदये पादयोर्मूर्ध्नि नवभिः प्रणवादिकैः ॥ ३६७ ॥

आपोहित्यादिभिर्मन्त्रैरिति संप्रोक्षयेत् क्रमात् ।
मन्त्रस्नानमिदं च स्यात् मान्त्रमन्यच्च गीयते ॥ ३६८ ॥

एतैर्नवभिरेवादौ पादयोर्मस्तके हृदि ।
पुनः पुनश्च संप्रोक्ष्य शिरस्युरसि पादयोः ॥ ३६९ ॥

द्विरर्धर्चैश्च संप्रोक्ष्य वक्षः पादशिरस्स्वथ ।
ऋग्भिः प्रोक्ष्याथ तिसृभिः सर्वाभिर्मस्तके पुनः ॥ ३७० ॥

संप्रोक्षयेच्च सर्वत्र वदेत् प्रणवपूर्वकम् ।
एतच्च मान्त्रमपरं मन्त्रस्नानं त्रिधा स्मृतम् ॥ ३७१ ॥

खस्थितं पुण्डरीकाक्षं मन्त्रमूर्तिं हरिं स्मरेत् ।
अनन्तादित्यसंकाशं वासुदेवं चतुर्भुजम् ॥ ३७२ ॥

शङ्खचक्रगदापद्मधारिणं वनमालिनम् ।
श्यामलं शान्तहृदयं प्रसन्नमुखपङ्कजम् ॥ ३७३ ॥

दिव्यचन्दनलिप्ताङ्गं चारुहासं शुभेक्षणम् ।
हारकेयूरमकुटकुण्डलैरुपशोभितम् ॥ ३७४ ॥

श्रीवत्सवक्षसं श्रीशमनन्तं गरुडध्वजम् ।
ध्वजवज्राङ्कुशाब्जारि शङ्खाङ्कितपदद्वयम् ॥ ३७५ ॥

तत्पादपद्मजां गङ्गां निपतन्तीं स्वमूर्धनि ।
चिन्तयेत् ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकां तनुम् ॥ ३७६ ॥

तया संक्षालितं ध्यायेत् बाह्यमाभ्यन्तरं मलम् ।
इत्युक्तं मानसं स्नानं सर्वस्नानादिकं परम् ॥ ३७७ ॥

स्नानान्यन्यानि चत्वारि सन्ति वायव्यपार्थिवे ।
सारस्वतं दिव्यमेषां प्रकारः कथ्यतेऽधुना ॥ ३७८ ॥

गोपादपांसून् सायाह्ने गोसावित्र्यभिमन्त्रितान् ।
गात्रेष्वालपयेदेतत्स्नानं वायव्यमीरितम् ॥ ३७९ ॥

यद्द्वादशोर्ध्वपुण्ड्राणां धारणं तत्तु पार्थिवम् ।
विद्वद्भिरुदितं यत्तत् स्नानं सारस्वतं स्मृतम् ॥ ३८० ॥

यदोत्तरायणे वर्षस्सातपः स्नाति चेत्तदा ।
वर्षधाराभिरेवेदं दिव्यस्नानमितीरितम् ॥ ३८१ ॥

नैतेषु गौणस्नानेषु देवर्षिपितृतर्पणम् ।
एवमुक्तस्स्नानविधिस्साङ्गो मनुभिरीरितः ॥ ३८२ ॥

पूर्वाचार्योक्तस्नानविधिः

विधिरन्योऽस्मदाचार्यैर्वर्णितः प्रोच्यतेऽधुना ।
आदाय मृत्तिकां शुद्धां स्नानं संकल्प्य तां ततः ॥ ३८३ ॥

अष्टाक्षरेणाभिमन्त्र्य शुचौ देशे निधाय च ।
द्विधा कृत्वाऽधिकं भागं एकमादाय तेन तु ॥ ३८४ ॥

शरीरमनुलिप्य त्रिर्निमज्याचम्य च त्रिधा ।
प्राणायामत्रयं कृत्वा ध्यात्वा देवं रमापतिम् ॥ ३८५ ॥

इतरं भागमादाय वामपाणितले त्रिधा ।
कृत्वा पृथक्ताः संप्रोक्ष्याष्टाक्षरेणाभिमन्त्र्य च ॥ ३८६ ॥

मूलस्थां मृदमादाय दशदिग्बन्धनं तया ।
अस्त्रमन्त्रेण कृत्वाऽन्यां मृत्तिकां मूलमन्त्रतः ॥ ३८७ ॥

कल्पयित्वा तीर्थपीठमुदकेऽग्रकरस्थिताम् ।
आलिप्य हस्ततलयोर्दर्शयित्वा विवस्वते ॥ ३८८ ॥

अङ्गमन्त्रैरस्त्रहीनैरालिप्याङ्गेषु पञ्चसु ।
आपादमस्तकं देहमनुलिप्य ततः करौ ॥ ३८९ ॥

प्रक्षाल्य भगवद्वामपादाङ्गुष्ठविनिस्सृताम् ।
गङ्गां प्रकल्पिते पीठे सलिलाञ्जलिना ततः ॥ ३९० ॥

आवाह्य मूलमन्त्रेणावाहयामीति मन्त्रतः ।
उदकाञ्जलिना तस्यै विष्णुवामेति मन्त्रतः ॥ ३९१ ॥

मूलमन्त्रेण दत्वाऽर्घ्यमादायाञ्जलिनोदकम् ।
आवर्त्याष्टाक्षरं मन्त्रं सप्तकृत्वोऽभिमन्त्र्य तत् ॥ ३९२ ॥

सप्तधा पञ्चधा वापि त्रिधा वा कुम्भमुद्रया ।
तेनाभिषिच्य शिरसि गृहीत्वा पाणिनोदकम् ॥ ३९३ ॥

त्रिः पञ्च सप्तकृत्वो वा मूलमन्त्रेण वैष्णवः ।
अभिमन्त्र्योदकं सर्वं पीत्वाऽचम्याथ मस्तके ॥ ३९४ ॥

पूर्वोक्तसंख्यया प्रोक्ष्य मूलेन मनुना ततः ।
जले निमग्नो भगवत्पादाब्जन्यस्तमस्तकः ॥ ३९५ ॥

यावच्छ्वासं मूलमन्त्रमावर्त्योन्मज्ज्य वाग्यतः ।
आदित्यान्तःस्थितं विष्णुं ध्यात्वा चोत्तीर्य भूतले ॥ ३९६ ॥

कौपीनाच्छादनं कृत्वा धौतवस्त्रोत्तरीयधृत् ।
मन्त्रस्नानादिभेदेषु शक्यं कृत्वा प्रयत्नतः ॥ ३९७ ॥

धृतोर्ध्वपुण्ड्रः कृत्वा च देवर्षिपितृतर्पणम् ।
अशक्तौ वारुणस्नाने गौणेऽदेवादितर्पणम् ॥ ३९८ ॥

उपास्य सन्ध्यां गायत्रीं जपित्वाऽष्टाक्षरं तथा ।
गायत्र्युपासनं कृत्वा मित्रोपस्थानमेव च ॥ ३९९ ॥

संतर्प्याधारशक्त्यादीन् देवर्षिपितृकानपि ।
पश्चात्समन्त्रकं स्नानशाटीं निष्पीड्य पूर्ववत् ॥ ४०० ॥

वामप्रकोष्टे निक्षिप्य द्विराचामेदिति क्रमः ।

ऊर्ध्वपुण्ड्रविधिः

यत्सच्चरित्ररक्षायामाचार्यैः प्रतिपादितम् ॥ ४०१ ॥

विधानादूर्ध्वपुण्ड्राणां तत्संगृह्याधुनोच्यते ।
उपवीतं शिखाबन्धं धारणं शङ्खचक्रयोः ॥ ४०२ ॥

पवित्रमूर्ध्वपुण्ड्रं च न त्याज्यं सर्वदा द्विजैः ।
वैष्णवानां द्वादशैव पुण्ड्राण्येकमथापि वा ॥ ४०३ ॥

अष्टौ षट्चतुरः पुण्ड्राननाचारात् न धारयेत् ।
द्विपुण्ड्रधारणे चिन्त्यं वचनं द्विजसत्तमैः ॥ ४०४ ॥

श्वेतेतरां मृत्तिकां चानामिकां च विनाङ्गुलीः ।
संस्थानमपि पुण्ड्राणां हरिपादाकृतिं विना ॥ ४०५ ॥

द्रव्याणि च विवर्ज्यानि विना श्वेतां च मृत्तिकाम् ।
न नखैर्विलिखेत् पुण्ड्राण्यन्येनापि न कारयेत् ॥ ४०६ ॥

शक्तौ दक्षिणहस्तस्य वामहस्तेन न स्पृशेत् ।
ऊर्ध्वपुण्ड्राणि धार्याणि हरिपादाकृतीनि च ॥ ४०७ ॥

स्फुटानि सान्तरालानि दृष्टिरम्याण्यृजूनि च ।
वल्मीके तुलसीमूले सिन्धुतीरे नदीतटे ॥ ४०८ ॥

पर्वते भगवत्क्षेत्रेष्वाहरेदेषु मृत्तिकाम् ।
ललाटे नासिकामूलमारभ्याकेशमायतम् ॥ ४०९ ॥

ऊर्ध्वं नाभेर्वक्षसोध उदरे त्वायतं भवेत् ।
कुक्षौ पृष्ठे तथा वक्षोभुजेष्वष्टाङ्गुलं भवेत् ॥ ४१० ॥

पञ्चेतराणां पुण्ड्राणां विस्तारस्त्र्यङ्गुलो भवेत् ।
गलस्थानां तु पुण्ड्राणां आयतं चतुरङ्गुलम् ॥ ४११ ॥

सप्तेतराणां पुण्ड्राणां विस्तारो द्व्यङ्गुलो भवेत् ।
ललाटकुक्षिवक्षस्सु कण्ठे कुक्षौ च दक्षिणे ॥ ४१२ ॥

दक्षिणे च भुजे कण्ठे कुक्षौ वामे तथा भुजे।
कण्ठे पृष्ठे त्रिके चैव क्रमात् पुण्ड्राणि धारयेत्॥ ४१३॥

एतानि केशवादीनां स्थानानि स्युरनुक्रमात्।
ध्यायेदेतेषु पुण्ड्रेषु तानेतान् स्वात्मगुप्तये॥ ४१४॥

हस्तौ प्रक्षाल्य संमृज्य वामपाणितले ततः।
अस्त्रमन्त्रेण हस्तेन दक्षिणेन विशोधिते॥ ४१५॥

प्रणवेन मृदं शुभ्रां निधाय सलिलेन ताम्।
गन्धद्वारामित्यनेन सिक्त्वा दशसु दिक्ष्वथ॥ ४१६॥

रक्षां कृत्वाऽस्त्रमन्त्रेण तर्जन्या प्रणवेन तु।
एकीकृत्य मृदं पश्चात् सलिलेन प्रदक्षिणम्॥ ४१७॥

अष्टाक्षरेणाभिमन्त्र्य लिखित्वा बीजमप्यथ।
नारसिंहं ततो मन्त्रं शतधारमितीरयन्॥ ४१८॥

तीर्थतोयं विनिक्षिप्य हरिपादाम्बुजं स्मरन्।
एकीकृत्य पुनस्तीर्थं मृदं चैव समन्ततः॥ ४१९॥

समूह्यैकां मृदं पश्चात् विष्णोर्नुकमिति ब्रुवन्।
पञ्चोपनिषदो मूलमन्त्रं च द्वादशाक्षरम्॥ ४२०॥

वैष्णवान् सहमन्त्रांश्च जपित्वा चाभिमन्त्र्य ताम्।
प्रथमं मूर्ध्नि विन्यस्य ललाटादिषु धारयेत्॥ ४२१॥

द्वादशाक्षरमन्त्रस्य प्रणवादि सबिन्दुकम्।
एकैकार्णं चतुश्चक्रं नमस्यामीत्यतः परम्॥ ४२२॥

श्लोकस्यैकैकमर्धं च क्रमेणोच्चार्य मृत्तिकाम्।
धारयेत् द्वादशाङ्गेषु ललाटादिषु संयतः॥ ४२३॥

पूर्वोक्तायामविस्तारप्रमाणसहितं द्विजः।
केशवादीन् तथा ध्यायन् तदर्थांश्च विचिन्तयन्॥ ४२४॥

द्वादशाक्षरशेषेण मृच्छेषं मूर्ध्नि धारयेत् ।
सुसंस्कृतं चाभिषिक्तं रमारमणपादयोः ॥ ४२५ ॥

पुण्ड्राणामन्तरालेषु निशाचूर्णं च धारयेत् ।
प्रणवाद्यैश्चतुर्थ्यन्तैर्नामभिः केशवादिभिः ॥ ४२६ ॥

नमोऽन्वितैरङ्गुलीभिर्न्यस्याङ्गुष्ठविवर्जितैः ।
पुण्ड्रेष्वञ्जलिना तानि प्रणमेच्च यथाक्रमम् ॥ ४२७ ॥

अशक्तौ मृदभावे वा पुण्ड्रमेकं यदा भवेत् ।
प्रणवेनोद्धृतासीति ललाटे धारयेत् तदा ॥ ४२८ ॥

समस्तसिद्धिप्राप्त्यर्थं श्रियै पुष्ट्यै च शान्तये ।
मुक्त्यर्थमपि पद्माक्षतुलसीमणिमालिकाम् ॥ ४२९ ॥

कण्ठे यो धारयेत्तस्य विनश्यत्युपपातकम् ।
विशेषेण श्राद्धहोमजपादिषु च धारयेत् ॥ ४३० ॥

यत्पवित्रोत्सवे विष्णोस्संस्कृतं धारितं च तत् ।
पवित्रं धारयेत् कण्ठे सर्वपापैः प्रमुच्यते ॥ ४३१ ॥

अथ सन्ध्यावन्दनविधिः

पवित्रपाणिराचम्य प्राणानायम्य वाग्यतः ।
प्रातस्सन्ध्यामुपासिष्य इति संकल्पयेत्ततः ॥ ४३२ ॥

आपोहिष्ठादिमन्त्राणां सिन्धुद्वीप ऋषिस्तथा ।
गायत्रीछन्द इत्युक्तं परमात्मा च देवता ॥ ४३३ ॥

शीर्षे न्यसेत् ऋषिं छन्दो जिह्वायां देवतां हृदि ।
न्यस्याङ्गुलीभिरङ्गुष्ठरहिताभिस्ततो वदेत् ॥ ४३४ ॥

विनियोगं प्रोक्षणादौ सर्वमन्त्रेष्विति क्रमः ।
न्यस्योक्त्वैवं शिरस्येव मन्त्रैः संप्रोक्षणं चरेत् ॥ ४३५ ॥

तोयं वामेन हस्तेन सर्वत्र प्रोक्षणे स्पृशेत् ।
प्रोक्षणं भोजनं होममर्चनं परिषेचनम् ॥ ४३६ ॥

बलिकर्म च दैवेन कुर्यात् तीर्थेन सर्वदा ।
प्रोक्षणं प्रणवेनैकं कृत्वा पश्चात् द्वितीयकम् ॥ ४३७ ॥

समस्ताभिर्व्याहृतिभिः गायत्र्या च तृतीयकम् ।
आपो हीत्यादिभिर्मन्त्रैः प्रोक्ष्य सप्तधा ॥ ४३८ ॥

यस्य क्षयायेत्येतेन प्रोक्ष्य पादद्वये ततः ।
शिरस्यापो जनयथेत्येतेन प्रोक्षयेत् पुनः ॥ ४३९ ॥

आपोहीत्यादिमन्त्राणां कुर्यात् प्रणवमादितः ।
समस्ताभिर्व्याहृतीभिः स्वात्मानं परिषिच्य च ॥ ४४० ॥

सूर्यश्चेत्यनुवाकस्य मुनिरग्निरुदाहृतः ।
उक्तं च छन्दो गायत्री देवता सूर्य ईरितः ॥ ४४१ ॥

सूर्यश्चापः पुनन्त्वग्निरित्येषां प्राशनत्रये ।
प्रोक्ता आचमने ये ये नियमास्ते समाः स्मृताः ॥ ४४२ ॥

क्रियाः प्रोक्षणपानाद्याः मन्त्रान्तेषु समाचरेत् ।
सूर्यश्च मेति मन्त्रेण पीत्वा वार्यभिमन्त्रितम् ॥ ४४३ ॥

तत आचम्य च दधिक्रावृण्ण इति मन्त्रतः ।
तत आपोहीति मन्त्रैः पूर्ववत्प्रोक्षणं चरेत् ॥ ४४४ ॥

दधिक्रावृण्ण इत्यस्य वामदेव ऋषिः स्मृतः ।
छन्दोऽनुष्टुप् समारव्यातं विश्वेदेवास्तु देवताः ॥ ४४५ ॥

पूर्ववत् परिषिच्याथ प्राणानायम्य चोत्थितः ।
अङ्गुष्ठतर्जनीयोगं तर्पणेऽर्घ्ये विवर्जयेत् ॥ ४४६ ॥

कृत्वा पादौ च संयुक्तावादायाञ्जलिनोदकम् ।
अभिमन्त्र्याथ गायत्र्या तारव्याहृतियुक्तया ॥ ४४७ ॥

आभ्रूमध्यं समुद्धृत्य रविमण्डलमध्यगम् ।
ध्यायन् लक्ष्मीपतिं तस्य पादाब्जेऽञ्जलिमुत्क्षिपन् ॥ ४४८ ॥

पार्ष्णिद्वयं समुद्धृत्य समर्प्यार्घ्यत्रयं ततः ।
आदित्याभिमुखोसावादित्यो ब्रह्मेति मन्त्रतः ॥ ४४९ ॥

तदर्थध्यानसहितं पूर्ववत् परिषेचयेत् ।
कृत्वा प्रदक्षिणं चोपविश्याचम्याद्भिरम्भसि ॥ ४५० ॥

तर्पयित्वा केशवादीन् द्वादशाऽऽचमनं चरेत् ।
प्रातः प्रतिदिनं सन्ध्यां गायत्रीरूपिणीं द्विजः ॥ ४५१ ॥

सावित्रीरूपिणीं मध्यन्दिने सायं सरस्वतीम् ।
उपास्य विधिवत् सर्वपापैर्मुक्तो भवेत् ध्रुवम् ॥ ४५२ ॥

सूर्योदयात् प्राग्घटिकाद्वयादारभ्य चोदयात् ।
सन्ध्या कार्या तु तत्रापि सत्सु भेषूत्तमः स्मृतः ॥ ४५३ ॥

आसायमारभ्यैकार्धयामात्काल उदाहृतः ।
माध्याह्निकस्य तत्रापि मध्याह्नस्तूत्तमः स्मृतः ॥ ४५४ ॥

अर्धमस्तमिते सूर्य आरभ्यातारकोदयात् ।
कालस्तु सायं सन्ध्यायास्तत्राप्यर्के स्थिते वरः ॥ ४५५ ॥

प्रागग्रेषु ततः स्थित्वा दर्भेषु प्राङ्मुखो द्विजः ।
प्राणायामत्रयं कृत्वा ध्यायेत् सन्ध्यां तु देवताम् ॥ ४५६ ॥

स्वपन्नस्तमयेऽनश्नन् मौन्यासीतारुणोदयात् ।
स्वपन् सूर्योदयेऽनश्नन् तिष्ठेन्मौनी दिवा द्विजः ॥ ४५७ ॥

आपस्तम्बेन मुनिना धर्मशास्त्र इतीरितम् ।
दिवोपवासः प्रातश्चेत् सायं नक्तमुपोषणम् ॥ ४५८ ॥

कालातिक्रमणे कार्यमिति बोधायनोदितम् ।
उपवासं नित्यकर्माऽतिक्रमे मनुरब्रवीत् ॥ ४५९ ॥

अर्घ्यप्रदानतः पूर्वमुदितेऽस्तमिते रवौ ।
गायत्र्यष्टशतं जप्यमित्यन्यत्र मुनीरितम् ॥ ४६० ॥

गायत्र्या अष्टसाहस्रं जपं कुर्यादनापदि ।
सन्ध्यातिक्रमणे प्रायश्चित्तं संवर्तचोदितम् ॥ ४६१ ॥

सन्ध्यातिक्रमणे कृच्छ्रं कुर्यादित्याह देवलः ।
यदापस्तम्बकथितं यच्च बोधायनोदितम् ॥ ४६२ ॥

अबुद्धिपूर्वे तज्ज्ञेयं बुद्धिपूर्वे मनूदितम् ।
अशक्तावुपवासस्य गायत्र्यष्टशतं जपः ॥ ४६३ ॥

गायत्र्यष्टसहस्रं तु विज्ञेयं तदनापदि ।
मासातिक्रमणे कृच्छ्रं प्राजापत्यमुदाहृतम् ॥ ४६४ ॥

स्मृतिरत्नाकरे संयग्व्यवस्थोक्तेति दृश्यते ।
सन्ध्यादिनित्यलोपे तु दिनमेकमभोजनम् ॥ ४६५ ॥

दिनद्वये त्रिरात्रं स्यात् कृच्छ्रार्धं तु दिनत्रये ।
दशाहे कृच्छ्रमेकं स्यादूर्ध्वं चान्द्रायणं चरेत् ॥ ४६६ ॥

चान्द्रायणं पराकं च मासादूर्ध्वं विधीयते ।
ततोऽप्येवं प्रकल्प्यं स्यात् व्यासस्य वचनं तथा ॥ ४६७ ॥

इति तत्रैव शङ्खस्य वचनं समुदाहृतम् ।
प्रातःकालेऽतिक्रमे स्यात् प्राणायामत्रयं स्मृतम् ॥ ४६८ ॥

संगवे द्विगुणं प्रोक्तं मध्याह्ने त्रिगुणं भवेत् ।
चतुर्गुणं चापराह्णे सायं षट्त्रिंशदीरितम् ॥ ४६९ ॥

प्राणानायम्य गायत्र्याद्यन्तव्याहृतियुक्तया ।
चतुरर्घ्यं तु दत्वाऽथ सन्ध्याकर्म समाचरेत् ॥ ४७० ॥

लोकोपकारके दक्षप्रोक्तमेतदुदीरितम् ।
प्रयोगपारिजाते तु संग्रहोक्तमितीरितम् ॥ ४७१ ॥

चतुर्थमर्घ्यमित्युक्तं स्मृतिमुक्ताफलेष्विदम् ।
रात्रौ कर्तव्यकर्माणि प्रमादादकृतानि चेत् ॥ ४७२ ॥

अहनि प्रथमे यामे तानि कुर्यादतन्द्रितः ।
दिवा कृत्यानि शर्वर्याः प्रथमे प्रहरे चरेत् ॥ ४७३ ॥

वर्जयित्वा पञ्च यज्ञान् कर्तव्यास्ते दिवैव हि ।
उक्तकाले यद्यनार्तास्सन्ध्यां नोपासते द्विजाः ।। ४७४ ।।

सूर्यहत्यां ततो गत्वा ते शूद्रसदृशाः स्मृताः ।
नार्द्रवासास्सदा कुर्यात् सन्ध्यामाचमनं जपम् ।। ४७५ ।।

कुर्यात् कदाचित् चेत् जानुदघ्नास्वप्सु स्थितश्चरेत् ।
सूतके त्वार्द्रवसनः आपोहीत्यादिकान् मनून् ।। ४७६ ।।

मनसोच्चार्य गायत्रीमुक्त्वा सन्ध्यात्रयेऽपि च ।
दत्वार्घ्यमपि गायत्रीं जपेदल्पं तु नेतरत् ।। ४७७ ।।

श्रीपाञ्चरात्ररक्षायां सूतके मृतकेऽपि च ।
अर्घ्यप्रदानकालेऽपि मनसोच्चारणं स्मृतम् ।। ४७८ ।।

जले यदा जपं कुर्यात् तदा तत्रैव संस्थितः ।
प्रदक्षिणनमस्कारौ विना कुर्यादुपस्थितिम् ।। ४७९ ।।

सावित्र्यादिक्रियास्सर्वा आदित्याभिमुखश्चरेत् ।
विष्ण्वालयसमीपे तु तमेवाभिमुखश्चरेत् ।। ४८० ।।

जपविधिः

अनन्तरं जपं कुर्यात् द्विराचम्य शुचिस्थले ।
प्रोक्षिते प्राङ्मुखः स्थित्वा प्रागग्रकुशसंस्कृते ।। ४८१ ।।

प्राणायामत्रयं कृत्वा न्यासध्यानसमन्वितम् ।
मुद्राः प्रदर्श्य गायत्रीं जपेदाभास्करोदयात् ।। ४८२ ।।

प्राणायामविधिः

प्राणायामस्यादितस्तु प्रकारः कथ्यतेऽधुना ।
कनिष्ठिकाऽनामिकाभ्यां संरुध्वा वामनासिकाम् ।। ४८३ ।।

विसृज्य बहिरन्तःस्थं वायुं दक्षिणनासया ।
संयङ्निरुध्याङ्गुष्ठेन दक्षिणां नासिकां ततः ।। ४८४ ।।

ध्यायन् विधिं रक्तवर्णं स्वनाभिकमलस्थितम् ।
सव्यनासिकया वायुमापूर्यान्तर्बहिस्थितम् ॥ ४८५ ॥

अङ्गुलीभिस्ताभिरेव संरुध्वा नासिकाद्वयम् ।
आस्यं बध्वा तथोष्ठाभ्यां न निर्गच्छेत् यथा मरुत् ॥ ४८६ ॥

नीलोत्पलाभं श्रीरामं ध्यायन् हृदयपङ्कजे ।
मनसा व्याहृतीस्सप्त पृथक् प्रणवपूर्वकाः ॥ ४८७ ॥

ओङ्कारमथ गायत्रीमुक्त्वाऽथो तच्छिरस्तथा ।
ललाटस्थं शिवं श्वेतं ध्यायन् दक्षिणनाशया ॥ ४८८ ॥

वायुं शनैश्शनैर्मुञ्चेत् तदा गात्रं न चालयेत् ।
प्राणायामो ध्यानहीनादुत्कृष्टो ध्यानसंयुतः ॥ ४८९ ॥

श्वासे निरुद्धे पवनो जायते पावकस्ततः ।
अग्नेरापोऽथ जायन्ते ततोऽन्तः शुध्यते त्रिभिः ॥ ४९० ॥

मानसं वाचिकं पापं कायिकं च विनश्यति ।
एकादशेन्द्रियाणां च दोषा नष्टा भवन्ति हि ॥ ४९१ ॥

प्रणवं व्याहृतीस्तिस्रो गायत्रीमपि च क्रमात् ।
आवर्तयेत् षट्कृत्वोऽयं प्राणायामो परः स्मृतः ॥ ४९२ ॥

प्रणवस्य व्याहृतीनां गायत्र्या शिःरसस्तथा ।
न्यस्यर्ष्यादीनथ ध्यात्वा प्राणायामांस्ततश्चरेत् ॥ ४९३ ॥

प्रणवस्य ऋषिर्ब्रह्मा गायत्री छन्द उच्यते ।
परमात्मा देवता स्यात् विनियोगः सुसंयमे ॥ ४९४ ॥

अमुममित्यङ्गुष्ठादि हृदयादिषु च न्यसेत् ॥ ४९४ १/२ ॥

विष्णुं भास्वत्किरीटाङ्गदवलयगलाकल्पहारोदराङ्घ्रि -
श्रोणीभूषासुवक्षोमणिमकरमहाकुण्डलैर्मण्डिताङ्गम् ।
हस्तोद्यच्छङ्खचक्राम्बुजगदममलं पीतकैशेयमाशा
विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥ ४९५ १/२ ॥

प्रणवप्रतिपाद्यस्य विष्णोर्ध्यानमितीरितम् ॥ ४९६ ॥

ऋष्योऽत्रिर्भृगुः कुत्सो वसिष्ठो गौतमः स्मृतः ।
काश्यपाङ्गिरसौ सप्त व्याहृतीनां क्रमात् स्मृताः ॥ ४९७ ॥

गायत्र्युष्णिगनुष्टुप् च बृहतीपङ्क्तिरेव च ।
त्रिष्टुप्जगत्यौ छन्दांसि प्रोक्तान्यासां यथाक्रमम् ॥ ४९८ ॥

अग्निवाय्वर्कवागीशवरुणेन्द्राश्च देवताः ।
विश्वेदेवाश्च चरणजङ्घाजानूदरेषु च ॥ ४९९ ॥

कण्ठे मुखे मस्तके च क्रमेण व्याहृतीर्न्यसेत् ।
ध्येयाः क्रमेण श्वेताभाश्यामापीता पिशाङ्गिनी ॥ ५०० ॥

लोहिता नीलवर्णा च सप्तमी कनकोज्ज्वला ।
स्वस्वोक्तवर्णतनवो रूपयौवनसंयुताः ॥ ५०१ ॥

क्षौमवस्त्रपरीधानास्सर्वाभरणभूषिताः ।
दिव्यचन्दनलिप्ताङ्गा दिव्यमाल्योपशोभिताः ॥ ५०२ ॥

सितोपवीतहृदयास्सपवित्रचतुष्कराः ।
उन्निद्रवदनाम्भोजप्रभामण्डलमण्डिताः ॥ ५०३ ॥

जटाकलापपूर्णेन्दुप्रभापूरतदिङ्मुखाः ।
अभयाक्षस्रगप्पात्रपरहस्तसरोरुहाः ॥ ५०४ ॥

एवं व्याहृतयस्सप्त ध्येया होमजपादिषु ।
विश्वामित्र ऋषिः प्रोक्तो गायत्रीछन्द ईरितम् ॥ ५०६ ॥

सविता देवता प्रोक्ता गायत्र्या न्यास उच्यते ।
पदद्वयं हृदि न्यस्य शिरस्येकं पदं ततः ॥ ५०७ ॥

पदद्वयं शिखायां च षष्ठं तु कवचे पदम् ।
पदत्रयं नयनयोरस्त्रार्थे चरमं पदम् ॥ ५०८ ॥

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै-
र्युक्तामिन्दुकलानिबद्धमकुटां तत्त्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशां शुभ्रं कपालं गुणं
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥ ५०९ ॥

गायत्री शिरसो ब्रह्मा छन्दोऽनुष्टुबुदाहृतम्।
परमात्मा देवता स्यात् तेन मन्त्रेण विग्रहे॥ ५१०॥

शिरः प्रभृति पादान्तं कराभ्यां व्यापकं न्यसेत्।
अर्कमण्डलमध्यस्थं सूर्यकोटिसमप्रभम्॥ ५११॥

ब्रह्मादिसेव्यपादाब्जं नौमि ब्रह्म रमासखम्।
एवं ध्यात्वा न्यासपूर्वं ततो मुद्राः प्रदर्शयेत्॥ ५१२॥

पद्मं च सुरभिर्योनिर्वाराही वासुदेविका।
आत्ममुद्रा ज्ञानमुद्रा सप्तमुद्राः प्रकीर्तिताः॥ ५१३॥

प्रणवस्य व्याहृतीनां गामन्त्र्याश्शिरसस्तथा।
न्यासं ध्यानं च कृत्वैवं प्राणानायम्य च त्रिधा॥ ५१४॥

एवमेव जपित्वादौ गायत्रीं दशधा ततः।
आवाहयेत्तामायातु वरदेत्यनुवाकतः॥ ५१५॥

एतस्यर्षिर्वामदेवश्छन्दोनुष्टुब्जगत्यपि।
गायत्री देवता च स्यादावाह्य रविमण्डले॥ ५१६॥

हृत्पद्मकर्णिकामध्ये रत्नसिंहासनेऽपि वा।
प्रातर्ध्यायामि गायत्रीं रविमण्डलमध्यगाम्॥ ५१७॥

ऋग्वेदमुच्चारयन्तीं रक्तवर्णां कुमारिकाम्।
अक्षमालाकरां ब्रह्म दैवत्यां हंसवाहनाम्॥ ५१८॥

मध्यन्दिने तु सावित्रीं रविमण्डलमध्यगाम्।
यजुर्वेदं व्याहरन्तीं श्वेतां शूलकरां शुभाम्॥ ५१९॥

युवतिं रुद्रदैवत्यां ध्यायामि वृषवाहनाम्।
सायं सरस्वतीं श्यामां रविमण्डलमध्यगाम्॥ ५२०॥

सामवेदं व्याहरन्तीं चक्रायुधकरां शुभाम्।
ध्यायामि विष्णुदैवत्यां वृद्धां गरुडवाहनाम्॥ ५२१॥

ध्यात्वैवं वेदजननीमासनादि समर्पयेत् ।
ददामि देव्यासनं ते पाद्यार्घ्याचमनानि च ॥ ५२२॥

स्नानं वस्त्रं चोपवीतं गन्धपुष्पं तथैव च ।
धूपं दीपं च नैवेद्यं ताम्बूलं च प्रदक्षिणम् ॥ ५२३॥

नमस्कारं चोपचारान् ददाम्येतांतु मानसान् ।
शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा ॥ ५२४॥

शिरांसि यस्याः श्वसनं छन्दो विवृतिरीरितम् ।
धर्मशास्त्राणि हृदयं बाहवो न्यायविस्तरा ः॥ ५२५॥

कैलासमलयावूरू यस्यावास ः पयोनिधि ः ।
यस्या नाभिः पुराणानि दिशः षडपि कुक्षय ः ॥ ५२६॥

विद्याविद्ये पुरः पश्चात् यस्याश्चाथर्वचेष्टितम् ।
ऋग्यजुस्सामचरणा नवग्रहविभूषणा ॥ ५२७॥

चन्द्र ः पयोधरौ सूर्यमाला वेदान्तमानसा ।
मेरुकर्णाग्निवदना चन्द्रास्या ब्रह्ममस्तका ॥ ५२८॥

वायुश्वासा रुद्रसखा कालमेघालका च सा ।
कमलानाथहृदया या सांख्यायनगोत्रजा ॥ ५२९॥

चतुर्भुजां त्रिचरणां षट्कुक्षिं पञ्चमस्तकाम् ।
तां जगद्रूपिणीं देवीं गायत्रीं प्रणमाम्यहम् ॥ ५३०॥

एवं ध्यात्वा समभ्यर्च्य मानसैरुपचारकैः।
स्तुत्वा च देवीं गायत्रीमृष्यादीन् विन्यसेत्ततः॥ ५३१॥

विश्वामित्रस्समस्ताया गायत्र्या ऋषिरीरितः ।
छन्दस्तु देवी गायत्री सविता देवता स्मृतः॥ ५३२॥

करयोरस्त्रमन्त्रेण शुद्धिं कृत्वा ततः परम् ।
गायत्र्या व्यापकं कृत्वा प्रणवेन करद्वये ॥ ५३३॥

प्रकोष्टान्तर्बहिश्चापि तलयोस्तलपृष्ठयोः।
पर्यायेण परामृश्य तलयोः प्रणवं न्यसेत् ॥ ५३४ ॥

अङ्गुष्ठयोस्तर्जनीभ्यां न्यस्य भूरित्यतः परम्।
अङ्गुष्ठाभ्यां भुव इति तर्जन्यो विन्यसेत्ततः॥ ५३५ ॥

सुवरित्यथ विन्यस्य मध्यमाङ्गुलिकाद्वये।
गायत्र्याः प्रथमं पादं न्यस्यानामिकयोस्ततः॥ ५३६ ॥

कनिष्ठकाद्वये पादं द्वितीयमथ विन्यसेत्।
तलयोः पृष्ठयोः पादं तृतीयमथ विन्यसेत् ॥ ५३७ ॥

भूरङ्गुष्ठाभ्यां नम इत्यादिभिः क्रमतो न्यसेत्।
अङ्गुष्ठयोस्तर्जनीभ्यां न्यस्य प्रणवमादितः ॥ ५३८॥

अष्टाङ्गुलीनां तदनु चतुर्विंशतिपर्वसु।
चतुर्विंशत्यक्षराणि सबिन्दूनि न्यसेत् क्रमात् ॥ ५३९॥

आरभ्य तर्जनीं वामां तर्जन्यां तु समापमेत्।
दक्षिणस्यामयं सृष्ठिन्यासः स्यात् ब्रह्मचारिणाम् ॥ ५४०॥

एतद्विपर्ययो न्यासस्संहारो योगिनां स्मृतः।
तर्जन्यादिकनिष्ठान्तं दक्षिणादि तु हस्तयो ः॥ ५४१॥

स्थितिन्यासो गृहस्थानां मूलमध्याग्रपर्वसु।
प्रणवादिनमोऽन्तं च न्यासं कुर्यात् यथाक्रमम् ॥ ५४२॥

अङ्गुष्ठयोस्तु गोविन्दं तर्जन्योस्तु महीधरम्।
हृषीकेशं मध्यमयोर्न्यस्यानामिकयोस्ततः ॥ ५४३ ॥

त्रिविक्रमं न्यस्य विष्णुं कनिष्ठाङ्गुलिकाद्वये।
माधवं करयोर्मध्ये न्यस्येदेकां पृथक् पृथक् ॥ ५४४ ॥

चतुर्थीं च नमश्चान्ते वदेत् प्रणवमादितः।
पादत्रयस्य गायत्र्या ऋषिश्छन्दश्च पूर्ववत् ॥ ५४५ ॥

ब्रह्माविष्णुर्गिरीशश्च देवताः स्युर्यथाक्रमम् ।
मूर्ध्नि नाभौ पादयोश्च न्यस्य पादत्रयं क्रमात् ॥ ५४६ ॥

शिरःप्रभृति पादान्तं कराभ्यां संस्पृशेत् ततः ।
पादयोर्जानुनोरूर्वोर्गुह्ये नाभौ च वक्षसि ॥ ५४७ ॥

कण्ठे मुखे भ्रुवोर्मध्ये मस्तके च क्रमात् न्यसेत् ।
पादादिसृष्टिन्यासोऽयं कर्तव्यो ब्रह्मचारिभिः ॥ ५४८ ॥

मूर्धाद्या चरणं न्यासः संहारो यतिसंमतः ।
पादाद्या नाभिमूर्धादिस्थितिन्यासं गृही चरेत् ॥ ५४९ ॥

तत्तन्न्यासक्रमेणाङ्गं गायत्र्याऽथ स्पृशेत्स सः ।
ओङ्कारमादावुच्चार्य ततो वर्णं तदादिकम् ॥ ५५० ॥

आत्मनोऽन्तं ततस्तत्त्वं नमश्चोक्त्वा न्यसेत् क्रमात् ।
भूतान्यथो तन्मन्त्राणि गन्धादीनीन्द्रियाणि च ॥ ५५१ ॥

उपस्थादीनि नासादीन्यथो मन उदाहृतम् ।
बुद्धिस्ततोऽहङ्कारोऽथाव्यक्तं तत्त्वान्यमूनि तु ॥ ५५२ ॥

पादयोर्जानुनोर्वक्षस्यास्ये मूर्ध्नि च नासयोः ।
जिह्वाक्षित्वक्छ्रोत्रगुह्यपाय्वङ्घ्रिषु करद्वये ॥ ५५३ ॥

आस्ये घ्राणे च जिह्वायां चक्षुस्त्वक्छ्रोत्रहृत्सु च ।
पुनश्च हृदये त्रीणि तत्त्वानि क्रमतो न्यसेत् ॥ ५५४ ॥

न्यस्याङ्गेष्विति तत्त्वानि षडङ्गन्यासमाचरेत् ।
ज्ञानाय हृदयायेति नमोऽन्तो हृन्मनुः स्मृतः ॥ ५५५ ॥

तथैश्वर्याय शिरसे स्वाहेति च शिरो मनुः ।
शिखामन्त्रः स्मृतः शक्त्यै शिखायै वौषडित्यपि ॥ ५५६ ॥

प्रोक्तः कवचमन्त्रोऽपि बलाय कवचाय हुम् ।
दृङ्मनुस्तेजसे नेत्रत्रयाय वषडित्यपि ॥ ५५७ ॥

वीर्यायास्त्राय फडिति तथाऽस्त्रमनुरीरितः ।
व्याहृतिं प्रथमामुक्त्वा प्रथमं हृन्मनुं ततः ॥ ५५८ ॥

अङ्गुलीभिश्चतसृभिः निरङ्गुष्ठं न्यसेत् हृदि ।
व्याहृतिं मध्यमामुक्त्वा शिरोमन्त्रं ततः परम् ॥ ५५९ ॥

पूर्वोक्ताभिस्त्वङ्गुलीभिः शिरो मध्ये न्यसेत् ततः ।
उच्चार्य व्याहृतिं त्वन्यां शिखामन्त्रं ततः परम् ॥ ५६० ॥

न्यसेदङ्गुष्ठशिरसा शिखामूले समुष्टिना ।
गायत्र्याः प्रथमं पादं बलायेति मनुं ततः ॥ ५६१ ॥

व्यत्यस्थाभ्यां कराभ्यां तु युगपद्दक्षिणोत्तरम् ।
भुजद्वयाग्रमारभ्य प्रकोष्ठावधि संस्पृशेत् ॥ ५६२ ॥

उक्त्वा द्वितीयं पादं च नेत्रमन्त्रं ततः परम् ।
अङ्गुलीभिर्मध्यमाभिः फालनेत्रं च संस्पृशेत् ॥ ४६३ ॥

पादं तृतीयमुक्त्वादावस्त्रमन्त्रेण संयुतम् ।
व्यत्यस्तहस्तयोस्तर्जन्यङ्गुष्ठाभ्यां भुजाग्रयोः ॥ ५६४ ॥

सशब्दं दिक्षु दशसु प्रागादिक्रमतो न्यसेत् ।
सर्वेष्वोङ्कारमादौ स्यात् सर्वमन्त्रेष्विति क्रमः ॥ ५६५ ॥

न्यस्योङ्कारं हृदि मुखे भूश्शीर्ष्णि भुव इत्यथ ।
कराभ्यां संस्पृशेत् मूर्धाद्या पादं सुवरित्यथ ॥ ५६६ ॥

योनिं च सुरभिं शङ्खं मुखमुद्रां च दर्शयेत् ।
चतुर्विंशतिमुद्राश्च ततस्संदर्शयेत् क्रमात् ॥ ५६७ ॥

सुमुखं संपुटं चैव विततं विस्तृतं ततः ।
द्विमुखं त्रिचतुः पञ्च षण्मुखाधोमुखान्यपि ॥ ५६८ ॥

व्यापकाञ्जलिकां मुद्रां शकटं तदनन्तरम् ।
यमपाशं च ग्रथितं सन्मुखोन्मुखमित्यपि ॥ ५६९ ॥

प्रलम्बं मुष्टिकं मत्स्यं कूर्मं वाराहमित्यपि ।
सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं ततः ॥ ५७० ॥

मुद्रास्संदर्शयित्वैवं ततो ध्यानं समाचरेत् ।
रश्मिज्वाला सहस्राढ्यं ध्यायेदादित्यमण्डलम् ॥ ५७१ ॥

तदन्तश्शीतलाभं तु शीतरश्मेस्तु मण्डलम् ।
तन्मध्ये मण्डलं वह्नेर्ज्वालामालासहस्रकम् ॥ ५७२ ॥

तस्य मध्ये रक्तपद्मं विलसत्कर्णिकान्वितम् ।
तस्य मध्ये सुखासीनं तप्तहाटकसंनिभम् ॥ ५७३ ॥

चतुरङ्गुलमात्रं च शुकवक्त्रनिभाम्बरम् ।
रक्तनेत्राम्बुजं रक्तपाणिपादनखान्वितम् ॥ ५७४ ॥

शङ्खचक्रगदापाणिं श्रीवत्साङ्कितवक्षसम् ।
किरीटहारकेयूरनूपुरैरुपशोभितम् ॥ ५७५ ॥

विलसद्वनमालाश्रीतुलसीकौस्तुभोज्ज्वलम् ।
प्रसन्नवदनं रक्तकुण्डलद्वयमण्डितम् ॥ ५७६ ॥

अनर्घरत्नखचितसर्वाभरणभूषितम् ।
एवं ध्यात्वा रमानाथं गायत्र्यर्थं विचिन्तयेत् ॥ ५७७ ॥

सर्वभूतोत्पादकत्वमुक्तं सवितृशब्दतः ।
वरेण्यशब्दतस्सर्वैर्भजनीयत्वमीरितम् ॥ ५७८ ॥

सर्वश्रैष्ठ्यं च सकलैः प्रार्थनीयत्वमेव च ।
पापभञ्जनहेतुत्वं तेजस्त्वं भर्ग इत्यतः ॥ ५७९ ॥

देवशब्देनाभ्यधिकं कान्तिमत्वं प्रदर्शितम् ।
धीमहीति तु शब्देन ध्यायाम इति चोदितम् ॥ ५८० ॥

धीशब्देनोच्यतेत्र्यर्गोपादानविषया मतिः ।
प्रचोदयादित्यनेन प्रेरकत्वमुदीरितम् ॥ ५८१ ॥

यो देवः सवितास्माकं धियो धर्मादिगोचराः ।
प्रेरयेत् तस्य यद्भर्गस्तद्वरेण्यमुपास्महे ॥ ५८२ ॥

अगस्त्यविश्वामित्राभ्यां गायत्र्यर्थ इतीरितः ।
उपास्यं सर्वभूतानां यत्तेजो विष्णुवाचकम् ॥ ५८३ ॥

आधारं सर्वलोकानां रविमण्डलमध्यगम् ।
संचिन्तयामस्तत्तेज इत्यर्थश्च सदीरितः ॥ ५८४ ॥

एवं विदित्वा गायत्र्या अर्थं हृदि विचिन्त्य च ।
ततस्तुरीयगायत्र्या ऋष्यादिन्यासमाचरेत् ॥ ५८५ ॥

ऋषिस्तस्यास्तु विमलश्छन्दस्सैव प्रकीर्तिता ।
परमात्मा देवता स्यात् चतुर्भिस्तु ततः पदैः ॥ ५८६ ॥

मा प्रापदिति चैताभ्यां कराङ्गन्यासमाचरेत् ।
दर्शयेत् योनिसुरभिमहायोन्यञ्जलिङ्गकाः ॥ ५८७ ॥

नमस्क्रियाजहामुद्रापूर्विकास्सप्त च क्रमात् ।

यद्देवासुरपूजितारुणनिभं सोमार्कतारागणैः
पुन्नागाम्बुजना गपुष्पवकुलैर्व्यासैस्सुरैरर्चितम् ।
नित्यं ध्यानसमस्तयोगकरणं कालाग्निरुद्रोपमं
तत्संहारकरं नमामि सततं पातालषष्ठं मुखम् ॥ ५८८१/२ ॥

अस्य चार्थः परो विष्णुः स एव रजसः परः ॥ ५८९ ॥

विभक्तिव्यत्ययस्तत्र तावच्छोभनमीरितम् ।
ओमित्यनेनावस्थानमध्याहार्यं पदद्वयम् ॥ ५९० ॥

मा द्वितीया प्रापदिति प्रापयत्वित्युदीरितम् ।
ध्यात्वैवमर्थं ज्ञात्वा च पुरैतां तदनन्तरम् ॥ ५९१ ॥

एतयाभिमुखीकृत्य गायत्रीं तां ततो जपेत् ।
आदौ प्रणवसंयुक्तव्याहृतित्रयपूर्विकाम् ॥ ५९२ ॥

गायत्रीं जपहोमादौ वदेद्वर्णी गृही तथा ।
यतिर्जपेत् षडोङ्कारामाद्यन्तप्रणवां तु वा ॥ ५९३ ॥

पृथगादौ व्याहृतीनां संयुक्तानां तथा पुनः ।
गायत्र्याद्यं तयोश्चेति षडोंकाराः प्रकीर्तिताः ॥ ५९४ ॥

समस्तानां व्याहृतीनां गायत्र्याश्च यथाक्रमम् ।
आद्यन्तोङ्कारसंयुक्ता गायत्री संपुटा स्मृता ॥ ५९५ ॥

ब्रह्मचारी गृहस्थश्च परिव्राडपि ते त्रयः ।
कालत्रयेऽप्येवमेव जपेयुर्वेदमातरम् ॥ ५९६ ॥

गायत्रीजपनियमः

पादेन पादाक्रमणं मनसा परितोषणम् ।
हस्ते निधानं हस्तस्य गृहक्षेत्रादिचिन्तनम् ॥ ५९७ ॥

उच्चारणं च मन्त्रस्य पार्श्वस्थैः श्रूयते तथा ।
निष्ठीवनं जृम्भणं च हासं क्रोधं मदं श्रुतम् ॥ ५९८ ॥

गात्रस्य शिरसो वापि वस्त्राद्याच्छादनं तथा ।
संख्यां यज्ञोपवीतेन भाषणं रोदनं तथा ॥ ५९९ ॥

निद्रां च डम्भमालस्यं कुड्यस्तम्भाद्यपाश्रयम् ।
वर्जयेदपि संचारं जपहोमादिकर्मसु ॥ ६०० ॥

व्यत्यस्तपाणिपादश्च पार्श्वयोरवलोकयन् ।
अपवित्रकरस्सङ्ख्यामकुर्वन्नन्यमानसः ॥ ६०१ ॥

जपहोमादिकं कर्मानुत्तरीयश्च वर्जयेत् ।
यदि वाङ्नियमो न स्यात् जपहोमादिकर्मसु ॥ ६०२ ॥

विष्णुसूक्तं जपेत् यद्वा स्मरेत् विष्णुं रमापतिम् ।
शूद्रान्त्यपतितश्वादिदर्शने जपमध्यतः ॥ ६०३ ॥

जपेदाचम्य संभाष्य तैः स्नात्वा च पुनर्जपेत् ।
द्वीपे जलावृते कर्मजपहोमादि वर्जयेत् ॥ ६०४ ॥

न गोशतं सैकपृष्ठं यत्र तिष्ठत्ययन्त्रितम् ।
गायत्र्या जपसंख्यानं न कुर्यादक्षमालया ॥ ६०५ ॥

अंगुल्या जपसङ्ख्यानमेकमेकमुदाहृतम् ।
रेखाभिरष्टगुणितं रेखाभिर्गणयेत्ततः ॥ ६०६ ॥

अनामिकामध्यपर्व समारभ्य प्रदक्षिणम् ।
तर्जनीमूलपर्वान्तं गणयेत् दशपर्वसु ॥ ६०७ ॥

अथवाऽनामिकामूलपर्वारभ्य प्रदक्षिणम् ।
गणयेन्मध्यमामूलपर्वान्तं दशपर्वसु ॥ ६०८ ॥

मध्यमा मध्यपर्वाद्य मध्यमामूलपर्वतः ।
प्रादक्षिण्येन गणयेत् यद्वा द्वादश पर्वसु ॥ ६०९ ॥

यद्वा कनिष्ठिकामूलपर्वारभ्य प्रदक्षिणम् ।
अनामिकामूलपर्व पर्यन्तं सकलोत्तमम् ॥ ६१० ॥

ब्रह्मचारी ग्रहस्थश्च शतमष्टोत्तरं जपेत् ।
अष्टोत्तरसहस्रं तु यतीनां समुदाहृतम् ॥ ६११ ॥

व्याहृत्यन्तेऽवसायाथ प्रतिपादं तथाऽन्ततः ।
अद्रुतं प्रजपेत् देवीमन्यथा ब्रह्महा भवेत् ॥ ६१२ ॥

पृथक् प्रणवसंयुक्तां सप्तव्याहृतिपूर्विकाम् ।
प्रणवाद्यां शिरोयुक्तां गायत्रीं प्रजपेत् यदि ॥ ६१३ ॥

दशवारं जपस्सोऽयं सहस्रादधिकः स्मृतः ।
रसनां निश्चलां कृत्वा मन्त्रार्थध्यानसंयुतम् ॥ ६१४ ॥

उच्चरेत् मनसा मन्दमक्षराणि पदानि च ।
व्यक्तं जपो मानसोऽयमुत्तमोत्तम ईरितः ॥ ६१५ ॥

किंचिदाकुञ्चिततलावुत्तानौ संहताङ्गुली ।
असंयुक्तौ घ्राणसमौ प्रातः कृत्वा करौ जपेत् ॥ ६१६ ॥

सायंकाले विना कुर्यात् संतिष्ठन् त्रिपदाजपम् ।
प्रागीशानदिशोर्मध्यं प्रातः पश्यन् जपं चरेत् ॥ ६१७ ॥

देवाभिमुख आसीनो देवतासंनिधौ जपेत् ।
आसीनोऽन्यान् जपेन्मन्त्रान् प्राङ्मुखो वाप्युदङ्मुखः ॥ ६१८ ॥

जपमध्ये समागच्छेत् यदि भागवतोत्तमः ।
तं प्रणम्याभिवाद्याथ योगक्षेमं च कीर्तयेत् ॥ ६१९ ॥

अश्वत्थमग्निमादित्यं ब्राह्मणं देवमन्दिरम् ।
पृष्ठीकृत्य जलं गां च जपहोमादि नाचरेत् ॥ ६२० ॥

चन्द्रार्कगुरुवह्नीनां जलदीपद्विजन्मनाम् ।
अश्वत्थदैवतगवां संनिधौ शस्यते जपः ॥ ६२१ ॥

जप एकगुणो गेहे नद्यादौ द्विगुणो भवेत् ।
गोष्ठे दशगुणः प्रोक्तो व ह्न्य गारे शताधिकः ॥ ६२२ ॥

पुण्यक्षेत्रे तीर्थतीरे सहस्रगुणितः स्मृतः ।
भगवत्संनिधौ प्रोक्तो जपोऽनन्तफलप्रदः ॥ ६२३ ॥

श्रियः कान्ते मनो यस्य जपहोमार्चनादिषु ।
मोक्ष एव फलं तस्य भवेदत्र न संशयः ॥ ६२४ ॥

पूजाहोमजपादीनि कर्माणि भगवत्परः ।
कुर्यात् यदि सुगुप्तानि तस्यानन्त्यं फलं भवेत् ॥ ६२५ ॥

स्पृष्ट्वा नाभेरधः कार्यं कर्मकाले ततः परम् ।
प्रक्षाल्य दक्षिणं श्रोत्रं स्पृशेत् यद्वा हरिं स्मरेत् ॥ ६२६ ॥

एवं जपित्वा गायत्रीं ध्यात्वा तां पूर्ववत् पुनः ।
तस्या अर्थं च संचिन्त्य पुनश्चार्घोदिते रवौ ॥ ६२७ ॥

प्राणायामत्रयं कृत्वा गायत्रीमभिवादयेत् ।
अभिवादय इत्युक्त्वा स्वगोत्रप्रवरोत्तरम् ॥ ६२८ ॥

स्वसूत्रशाखाध्ययनं प्रथमान्तमुदीरयन्।
स्वसंज्ञाशर्मनामाथो अहमस्मीति चाथ भोः॥ ६२९॥

इत्युक्त्वा च हस्ताभ्यां श्रोत्रे संस्पृश्य चात्मनः।
जान्वादिपादाङ्गुष्ठान्तं शनैरभिमृशेत् ततः॥ ६३०॥

ततस्तुरीयगायत्रीमुपस्थाय कृताञ्जलिः।
मन्त्रमेकपदीत्युक्त्वा तुरीयं पादमप्यथ॥ ६३१॥

जपोपस्थानविधिः

मा प्रापदिति चोक्त्वाऽथ गायत्र्युद्वासनं चरेत्।
मन्त्रस्योत्तम इत्यस्य वामदेव ऋषिः स्मृतः॥ ६३२॥

अनुष्टुप्छन्द इत्युक्तं गायत्री देवता स्मृता।
एतेनोद्वास्य गायत्रीमुपतिष्ठेत भास्करम्॥ ६३३॥

मित्रोपस्थानमन्त्राणां विश्वामित्र ऋषिः स्मृतः।
मित्रस्येत्यस्य तु भीरुट् गायत्रीपरयोर्द्वयोः॥ ६३४॥

त्रिष्टुप् च छन्दसी प्रोक्ते देवता मित्र ईरितः।
अर्धोदितं सहस्रांशुं मित्रस्येति कृताञ्जलिः॥ ६३५॥

उपस्थाय नमस्कृत्वा तस्मै तमभिवादयेत्।
ततस्तु सन्ध्यां सावित्रीं गायत्रीं च सरस्वतीम्॥ ६३६॥

प्रणवाद्यैश्चतुर्थ्यन्तैर्नमोऽन्तैः स्वस्वनामभिः।
प्रणमेदथ सर्वाभ्यः देवताभ्यस्ततः परम्॥ ६३७॥

आद्यन्तोङ्कारसंयुक्तं द्विरुक्त्वा च नमो नमेत्।
प्रतिमन्त्रं केचिदाहुः प्रणामं सप्रदक्षिणम्॥ ६३८॥

एवमेव ततः कामोऽकार्षीदित्यादिकं मनुम्।
उक्त्वा प्रदक्षिणं कृत्वा नमस्कुर्यात् त्रयीतनुम्॥ ६३९॥

प्राची दिक् दक्षिणा दिक् च प्रतीची दिक् तथोऽत्तरा।
ऊर्ध्वाधरान्तरिक्षं च दिशः सप्त प्रकीर्तिताः॥ ६४०॥

आसां सन्ध्यादिवन्मन्त्रानुक्त्वा कृत्वा प्रदक्षिणम् ।
कृत्वा प्रणामं सोङ्कारं व्याहृतित्रयपूर्वया ॥ ६४१ ॥

गायत्र्या संप्रणम्याथ पितरावग्रजान् गुरून् ।
वर्षत्रयाधिकान् शिष्टान् ब्राह्मणांश्चाभिवादयेत् ॥ ६४२ ॥

अथ मूलमन्त्रजपः

कालत्रये मूलमन्त्रं विहितावसरे जपेत् ।
यथोपदेशमृष्यादिन्यासध्यानसमन्वितम् ॥ ६४३ ॥

उपस्थानात् पूर्वमेव निगमान्तगुरोर्मतम् ।
रामानुजमुनीन्द्रोक्तनित्यग्रन्थे तथैव च ॥ ६४४ ॥

उपस्थायाऽऽधारशक्त्यादीन् संतर्प्य निपीड्य च ।
वस्त्रं ब्रह्ममुखं कृत्वा नम्यतीर्थोपगं हरिम् ॥ ६४५ ॥

गृहं गत्वाऽभ्युक्ष्य हुत्वाऽभिगम्य कमलापतिम् ।
ग्रासमुष्टिं परगवे दत्त्वा वृद्धान् प्रणम्य च ॥ ६४६ ॥

त्र्यन्तानभ्यसेदेष निगमान्तगुरोः क्रमः ।

भगवत्सेवाविधिः

श्रीपाञ्चरात्ररक्षायामाचार्यैर्यदुदीरितम् ॥ ६४७ ॥

विधानं रामसेवायास्तत्संगृह्याधुनोच्यते ।
तीर्थासन्नं रामसद्म नमस्कृत्याथ तद्विशेत् ॥ ६४८ ॥

पादुकोपानद्यानादिचित्तक्षेपं तथा त्यजेत् ।
तत्र तत्र स्थितान् द्वास्थान् प्रणम्यानुज्ञया विशेत् ॥ ६४९ ॥

बलिपीठसमीपे तु नमेत् गुरुपरम्पराम् ।
तामनुज्ञाप्य श्रीरामं नमेत् कूर्मादिपद्यतः ॥ ६५० ॥

मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवत् चतुरः पादान् शिरस्तत्रैव पञ्चमम् ॥ ६५१ ॥

निधाय दण्डवत् देहं प्रसार्य चरणौ करौ।
बद्ध्वा मुकुलवत् पाणी प्रणामो दण्डसंज्ञितः ॥ ६५२ ॥

पादाङ्गुलीभ्यां जानुभ्यां शिरसा चावनिं स्पृशन्।
बद्ध्वाञ्जलिं नमस्कुर्यात् स पञ्चाङ्ग उदीर्यते ॥ ६५३ ॥

अष्टाङ्गदण्डपञ्चाङ्गप्रणामा उदिताः क्रमात्।
मस्तिष्कसंपुटप्रह्वाङ्ग प्रणामाङ्गसंयुताः ॥ ६५४ ॥

एतेषु मनुना कुर्यात् मूलेनान्यतमान् समान्।
समस्तिष्कप्रणामः स्यात् अञ्जलिं मस्तके न्यसेत् ॥ ६५५ ॥

प्रणामः संपुटः स स्यात् हृदयेऽञ्जलिमर्पयेत्।
प्रह्वाङ्गः संपुटः कुर्यात् सा प्रह्वकङ्गनमस्क्रिया ॥ ६५६ ॥

प्रासादमथ रामस्य दूरात् कुर्यात् प्रदक्षिणम्।
चतुः ककुप्सु प्रणामान् कुर्यात् प्रति प्रदक्षिणम् ॥ ६५७ ॥

प्रदक्षिणप्रणामांश्च युग्मानेव समाचरेत्।
देवदक्षिणपार्श्वे वा सेवार्चादिप्रदक्षिणे ॥ ६५८ ॥

नान्तरागमनं कुर्यात् देवताबलिपीठयोः।
यदि तत्र शठारातिमुखास्तान्मनुना च तान् ॥ ६५९ ॥

वैनतेयादयो वाऽपि तत्तन्मन्त्रेण तान्नमेत्।
सेनेशं प्रणमेत् संयक् तदनुज्ञापुरस्सरम् ॥ ६६० ॥

श्रीरामसंनिधिं गच्छेत् सूपहारचयान्वितः।
चक्रवत् भ्रमयेत् नाङ्गं पृष्ठं भागं न दर्शयेत् ॥ ६६१ ॥

उपहारान् शुचौ देशे निक्षिप्यैव हरिं नमेत्।
न गृहीतोपहारः सन् प्रणमेत् मतिमान्नरः ॥ ६६२ ॥

अथोपहारमादाय श्रीरामनिकटं व्रजेत्।
रामदक्षिणपार्श्वस्थः तांश्च तस्मै समर्पयेत् ॥ ६६३ ॥

सीतापतौ शयानेऽपि तिष्ठन्नैव पार्श्वके ।
स्वकीयगुरुपङ्क्त्यन्तं श्रीरामं शरणं व्रजेत् ।। ६६४ ।।

पावनाद्भुतदुष्प्रापसेवालाभप्रहर्षितः ।
स्तव्यस्तवप्रियवशीकरणस्तोत्रमारभेत् ।। ६६५ ।।

अर्चावतारमाहात्यं स्तोत्रस्य च विशेषतः ।
ज्ञेयं विस्तरतोऽन्यत्र नेह विस्तरतो भयात् ।। ६६६ ।।

तुलसीपादतीर्थादि सीतारामप्रसादजम् ।
यत्किंचिदपि तन्नत्वा हर्षोत्फुल्लकपोलकः ।। ६६७ ।।

संभाव्य शिरसा कुर्यात् यथार्हमुपयोजितम् ।
पवित्रहरिपादाम्बुपानेनाचमनं चरेत् ।। ६६८ ।।

ध्यायेत् कृतार्थमात्मानं सेवया जानकीपतेः ।
पश्चाद्भागेन निर्गच्छन् आसीनश्चोक्तपार्श्वके ।। ६६९ ।।

श्रीरामाभिमुखो मूलमन्त्रादीन् तन्मना जपेत् ।
वर्जयेत् सावधानेनापचारान् शास्त्रचोदितान् ।। ६७० ।।

पुनः प्रणम्य सेनेशमपचारान् क्षमस्व मे ।
इति प्राथ्यार्थ सेनेशं संप्रणम्य सह प्रभो ।। ६७१ ।।

सेवापचारानित्येवं प्राथ्यार्नुज्ञाप्य निर्गमेत् ।
तत्तद्द्वास्थान् प्रणम्यानुज्ञया तेषां विनिर्गमेत् ।। ६७२ ।।

श्रीरामसद्म प्रणमेदन्ते च गुरुपङ्क्तिकाम् ।
अपचारानिमान् वक्ष्ये यत्नात् श्रीरामसंनिधौ ।। ६७३ ।।

भगवदपचाराः

अन्याख्यानकथागीतनृत्तवादित्रलोकनम् ।
रुषा रामालये वस्त्रच्छन्नदेहेन संनतिः ।। ६७४ ।।

तैलाभ्यक्ताखिलाङ्गेन यानपादू पदापि वा ।
प्रवेशः श्रीरामगृहे निष्ठीवनममुत्र च ।। ६७५ ।।

केशास्थिनखलोम्णां च क्षेपो दष्टस्य दन्ततः ।
विण्मूत्रयोरुत्सर्गोऽत्र प्रेतमूह्य प्रवेशनम् ॥ ६७६ ॥

असंबद्धप्रलापोऽत्र निद्रालाला विसर्जनम् ।
पूजा भूमिसुताजानेः श्मशानान्मध्ययायिना ॥ ६७७ ॥

शवानुगन्तुः कामात् श्रीरामाराधनकामना ।
आक्रान्तज्ञातविमानच्छायायाऽनुप्रदक्षिणम् ॥ ६७८ ॥

भुक्तश्राद्धान्नपूजाविण्मूत्रे सदनसंनिधौ ।
रामायार्पितदीपस्यान्यत्र वा नयनं गृहे ॥ ६७९ ॥

रामालये कथ्यमानतत्कथानादरा गतिः ।
अन्यदेवार्थसंदिष्टपुष्पैः श्रीरामपूजनम् ॥ ६८० ॥

गत्वान्यदेवतासद्मास्नात्वा रामगृहे विशः ।
रामस्यान्यसुरैस्तुल्यबुद्धिः पुष्पनिवेद्ययोः ॥ ६८१ ॥

घ्राणनं चोत्सवे स्पर्शशङ्कया स्नानकर्म च ।
रामालयसमीपस्थान् रामसेवार्थमागतान् ॥ ६८२ ॥

चण्डालान् पतितान् वापि स्पष्ट्वा स्नानार्थमुद्यमः ।
रामतद्भक्तपादाम्बुपाने चाचमनं तथा ॥ ६८३ ॥

एकहस्तनतिश्चाप्रणामोऽसेवनमुत्सवे ।
प्रदक्षिणं नतेः पूर्वमुच्छिष्टे वाऽशुचौ सति ॥ ६८४ ॥

श्रीरामवन्दनं पादप्रसृतिश्च तदग्रतः ।
पर्यङ्कबन्धनं चापि भोजनानृतभाषणे ॥ ६८५ ॥

निग्रहानुग्रहावुच्चैर्भाषाविग्रहरोदने ।
स्त्रीषु साकूतवचनमधोवायुविमोक्षणम् ॥ ६८६ ॥

परनिन्दापरस्तोत्रमश्लीलस्यापि भाषणम् ।
शक्तौ गौणोपचारश्चाप्यनिवेदितभक्षणम् ॥ ६८७ ॥

तत्तत्कालोद्भवफलाद्यदानं रावणच्छिदे ।
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिषु ॥ ६८८ ॥

पृष्टीकृत्य स्थितिश्चैव परेषामभिवादनम् ।
गुरौ मौनं निजस्तोत्रं देवता निन्दनं तथा ॥ ६८९ ॥

शयनं रक्तसंगोत्रस्वाधीनाध्ययनं श्रुतेः ।
गुरौ मनुष्यधी रामप्रतिमालोहधीरपि ॥ ६९० ॥

दन्तशुद्धिमकृत्वा तु श्रीरामनिकटे गतिः ।
एकवस्त्रेण तत्सेवा सक्रोधं कर्मकारिता ॥ ६९१ ॥

निषिद्धकुसुमाद्यर्चाभिगमो रक्तवाससा ।
वासो विधूननं चाग्रे मांसं प्राश्य च सेवनम् ॥ ६९२ ॥

अकृत्वाऽऽग्रयणं नव्यव्रीहीणामुपयोजनम् ।
पुष्पाण्यदत्त्वा धूपश्च जीर्णान्नकृतपूजनम् ॥ ६९३ ॥

पिण्याकं प्राश्य पूजा च स्पर्शः स्पृष्ट्वा प्रदीपकम् ।
अपचारानिमान् सर्वान् यत्नात्परिहरेत् सुधी : ॥ ६९४ ॥

अभिवादनविधिः

सायं प्रातश्च वृद्धानां कुर्वाणस्याभिवादनम् ।
आयुः प्रज्ञा बलं कीर्तिः प्रवर्धन्ते दिने दिने ॥ ६९५ ॥

श्रोत्रियस्त्र्यब्दपूर्वो यः सोऽभिवादनमर्हति ।
अगुरुं नाभिवादेत विषमस्थलसंस्थितम् ॥ ६९६ ॥

एकदेशाध्यापयिता वेदस्य गुरुरुच्यते ।
साङ्गवेदाध्यापयिता यस्स आचार्य उच्यते ॥ ६९७ ॥

मन्त्रोपदेष्टा चाचार्यः तेषां पत्न्यस्तु तास्तथा ।
पित्रोर्भ्रातृभगिन्यौ च पितरावपि तौ तयोः ॥ ६९८ ॥

पितृव्यपत्नीश्वशुरौ स्वसा भ्राता च पूर्वजः ।
मातुलानी च गुरवः तेऽभिवाद्या दिने दिने ॥ ६९९ ॥

कृत्वा स्वचरणाङ्गुष्ठस्पर्शान्तं पूर्ववत् ततः।
सव्यदक्षिणहस्ताभ्यां युगपद्दक्षिणोत्तरौ ॥ ७०० ॥

साङ्गुष्ठौ चरणौ सव्यदक्षिणौ समुपस्पृशेत्।
कृतेऽभिवादने विप्रः कुर्यात् प्रत्यभिवादनम् ॥ ७०१ ॥

तस्य प्रकारस्त्वायुष्मान् भव सौम्येत्यनन्तरम्।
उक्त्वा तन्नाम तस्यान्त्यस्वरमुच्चार्य सप्लुतम् ॥ ७०२ ॥

तदन्तेऽकारमुच्चार्य सन्धिश्लिष्टं समाचरेत्।
कृतेऽभिवादने कुर्यात् न यः प्रत्यभिवादनम् ॥ ७०३ ॥

स तस्य दुष्कृतिं प्राप्य नरकं प्रतिपद्यते।
द्विजातिर्न विजानाति यस्तु प्रत्यभिवादनम् ॥ ७०४ ॥

तं नाभिवादयेत् विप्रः स शूद्रसदृशःस्मृतः
अभिवाद्य द्विजः शूद्रं सचेलस्नानपूर्वकम् ॥ ७०५ ॥

ब्राह्मणानां शतं संयगभिवाद्य विशुध्यति।
यज्ञे राजगृहे संघे प्रणमेत् नाभिवादयेत् ॥ ७०६ ॥

पाषण्डं कृतघ्नं च महापातकिनं शठम्।
नास्तिकं पतितं व्रात्यं कुर्वन्तं दन्तधावनम् ॥ ७०७ ॥

समित्पुष्पकुशाग्न्यम्बुपाणिमप्रयतं तथा।
स्नानभोजनहोमादिकुर्वन्तं कर्म वैदिकम् ॥ ७०८ ॥

अभ्यक्तमातुरं शत्रुं गच्छन्तमपि योगिनम्।
एवं गुणः स्वयं वापि ब्राह्मणो नाभिवादयेत् ॥ ७०९ ॥

उदक्यां सूतिकां शुध्येदभिवाद्योपवासतः।
ब्राह्मणं कुशलं पृच्छेत् समानवयसं द्विजः ॥ ७१० ॥

आत्मनो वयसा न्यूनं क्षत्रियं चेदनामयम्।
क्षेममस्त्विति वैश्यं तु शूद्रमारोग्यमेव च ॥ ७११ ॥

सुरां पिबेति चण्डालं कृते तैर्वन्दनादिके ।
नमस्कारमकुर्वाणो शूद्रे यः स्वस्त्युदाहरेत् ॥ ७१२॥

तेनैव सह शूद्रेण नरकं याति स द्विजः ।
नातिक्रमेदसंभाष्य श्रोत्रियं कानने स्त्रियम् ॥ ७१३॥

विना पत्नीं तथा योनिसंबन्धामपि योषितम् ।
योषितस्सकला ब्रूयात् सुभगे भगिनीति वा ॥ ७१४॥

सान्ध्यं कर्म समाप्यैवं द्विराचम्य गृहं व्रजेत् ।

औपासनविधिः

सौवर्णे राजते ताम्रे पात्रेऽन्यस्मिन्नथापि वा ॥ ७१५॥

अभिन्ने सलिलं शुद्धे समाहृत्य सुगोपितम् ।
गृहं गत्वा द्विराचम्य प्रोक्षितं गोमयाम्बुभिः ॥ ७१६॥

संमार्जितं च तत्रस्थो होमोपकरणान्यथ ।
गृहं च होमद्रव्याणि स्वात्मानं परिचारकान् ॥ ७१७॥

तेनोदकेन संप्रोक्ष्य तत आचमनं चरेत् ।
यद्वा गृहे समुद्धृत्य सलिलं तत्र काञ्चनम् ॥ ७१८॥

निक्षिप्य दर्भमथवा तेन संप्रोक्षणं चरेत् ।
न कुर्यात् जपहोमादिकर्मासंप्रोक्षिते गृहे ॥ ७१९॥

शतक्रतुचतुर्वेदिश्रीनिवासार्यदर्शिते ।
पञ्चकालप्रदीपे तु संगता श्रौतपद्धतिः ॥ ७२०॥

स्वगृहोक्तविधानेन कुर्यादौ पासनं स्वयम् ।
स्वस्योपाधौ सुतो भ्राता स्वस्रीयो दुहितुः पतिः ॥ ७२१॥

ऋत्विक्पत्नीगुरुश्शिष्यो होमं कुर्यादनुज्ञया ।
होममन्यस्य नो कुर्यादकृत्वा होममात्मनः ॥ ७२२॥

जुहुयात् नानुपेतोऽल्पविद्यो न युवतिस्तथा ।
विधुरो ब्रह्मचारी च परिव्राडपि ते त्रयः ॥ ७२३॥

परार्थं कर्म कुर्वाणाः पातयन्ति पतन्ति च ।
श्रौताग्निं जुहुयात् पूर्वं स्मार्ताग्निमिति केचन ॥ ७२४ ॥

श्राद्धं भुक्त्वा न जुहुयात् श्रौतं स्मार्तमथापि वा ।
निक्षिप्याग्निं स्वभार्यायामृत्विजं परिकल्प्य च ॥ ७२५ ॥

प्रवसेदस्ति चेत्कार्यं द्विमासं न ततोऽधिकम् ।
दम्पत्योस्संनिधौ होमं कुर्युः पुत्रर्त्विगादयः ॥ ७२६ ॥

अथवा संनिधौ पत्न्या इति कात्यायनोऽब्रवीत् ।
उद्देशत्यागकृत्भर्ता पत्नी स्यात् तदसंनिधौ ॥ ७२७ ॥

कनिष्ठायां गृहस्थायां संसृष्टाग्नेर्द्विजन्मनः ।
ज्येष्ठा स्त्री ग्रामसीमानं होमकाले न लंघयेत् ॥ ७२८ ॥

ज्येष्ठायां तु गृहस्थायां कनिष्ठा निर्गता यदि ।
तदा न दोष एका चेत् होमकालं न लंघयेत् ॥ ७२९ ॥

संगवात् प्राङ्मुख्यकालः आसायं गौण ईरितः ।
प्रदोषान्तो मुख्यकालो गौणस्तु नवनाडिकाः ॥ ७३० ॥

वदन्ति वैश्वदेवात् प्राग्घोमकालं तु केचन ।
द्विराचम्य त्रिराचम्य प्राणान् संकल्प्य भूतले ॥ ७३१ ॥

उपलिप्ते गोमयेन हस्तमात्रं जलेन च ।
चतुरश्रं तत्र रेखास्तिस्रः प्रादेशसंमिताः ॥ ७३२ ॥

प्रागग्रा दक्षिणारम्भा उदगग्रास्ततस्तथा ।
पश्चिमारम्भमङ्गुष्ठानामिकाभ्यां तृणेन वा ॥ ७३३ ॥

काष्ठादिनापि वोल्लिख्य तत्र न्यस्य तृणादिकम् ।
अवोक्ष्य तन्नैर्ऋत्यां निरस्याथ तृणादिकम् ॥ ७३४ ॥

स्पृष्ट्वोदकं व्याहृतिभिस्तत्र निक्षिप्य पावकम् ।
प्रज्वाल्य याज्ञियैः काष्ठैः ततः परिसमूह्य च ॥ ७३५ ॥

हस्तेनाथोऽवोक्षणाम्भः प्रागुदग्वा निरस्य च ।
निदध्यात् वारि तत्रान्यत्सर्वहोमेष्विति क्रमः ॥ ७३६ ॥

ततस्सलिलपात्रं तु सव्यहस्तेन संस्पृशन् ।
मन्त्रैश्चतुर्भिरदितेऽनुमन्यस्वेति पावकम् ॥ ७३७ ॥

परिषिच्य स्वलंकृत्य वह्नावेकाममन्त्रकम् ।
आधाय समिधं तस्यां प्रदीप्तायां समन्ततः ॥ ७३८ ॥

अतीत्य ञ्यङ्गुलं तत्र हुत्वा सूर्याय तण्डुलैः ।
चतुरङ्गुलिसंपूर्णैः पाणिना देवतीर्थतः ॥ ७३९ ॥

मध्येऽग्नये स्विष्टकृते प्रागुदीच्यामसंयुतम् ।
हुत्वैकां पुनराधाय समिधं पूर्ववत्ततः ॥ ७४० ॥

परिषिच्य त्वन्वमंस्थाः प्रासावीरिति भेदतः ।
सूक्तेनाग्ने नयेत्यग्निमुपतिष्ठेत् कृताञ्जलिः ॥ ७४१ ॥

सायं भेदोऽग्नये पूर्वाहुतिरन्यत्समं भवेत् ।
प्रातर्यद्यकृतो होमः कुर्यात्प्राक्सायमाहुतेः ॥ ७४२ ॥

सायं यद्यकृतो होमः कुर्यात्प्राक्प्रातराहुतेः ।
कुर्यात् प्रागष्टमात् कालात् गतान् होमान् पृथक् पृथक् ॥ ७४३ ॥

औपासने मुख्यकालातिपत्त्यादौ तु निष्कृतिः ।
व्याहृतित्रितयेनैव होमः स्यात् शिष्टसंमतः ॥ ७४४ ॥

प्रातस्सायं च वा होममकृत्वा भुक्तवान् यदि ।
यत्ते यथाहेत्येताभ्यां आदध्यात् समिधौ तदा ॥ ७४५ ॥

औपासनाग्निद्वितयसंसर्गेऽग्निं विभज्य तम् ।
ममांशोऽयं ममांशोऽयमिति मत्वा निजांशके ॥ ७४६ ॥

पूर्वहोताग्नये विविचये स्वाहेति संहुनेत् ।
प्रायश्चित्ताहुतीश्चापि पश्चाद्धोता हुनेदथ ॥ ७४७ ॥

स्वांशेऽग्नये पथिकृतेऽग्नये विविचये त्विति ।
स्वाहान्ताभ्यां च मन्त्राभ्यां प्रायश्चित्ताहुतिं ततः ॥ ७४८ ॥

उभौ समारोपयेतां सहैवाग्नी इति क्रमः ।

लौकिकाग्निः

लौकिकानलसंसर्गे विविचिं पाहि पञ्चकम् ॥ ७४९ ॥

हुत्वा वेदिष्टमेवेति चित्तं बोधायनोऽ ब्रवीत् ।
अहुतोऽष्टसु कालेषु यद्यग्निर्लौकिको भवेत् ॥ ७५० ॥

समारूढस्समिध्यात्मन्यहुतो द्विस्तु लौकिकः ।
होमकाले दम्पती तु यदि ग्रामाद्बहिर्गतौ ॥ ७५१ ॥

भर्तरि प्रोषिते मासद्वयादूर्ध्वमनागते ।
भर्तरि प्रोषिते पत्नी होमकाले तथा यदि ॥ ७५२ ॥

अग्नौ पादेन संस्पृष्टे तथा चाशुचिभिर्नरैः ।
अमेध्येनापि संस्पृष्टे लौकिकोऽग्निर्न संशयः ॥ ७५३ ॥

अन्येनापि हृते मेध्ये स्पृष्टेऽग्नौ भोजनात् परम् ।
दिवा निशायामापि वा सद्यः सन्धाय पावकम् ॥ ७५४ ॥

कालद्वयं न भुञ्जीत भुक्तेः प्रागेककालिकम् ।
स्वयमेव विनष्टेऽग्नौ भुक्तेः प्राक्तत्परं तु वा ॥ ७५५ ॥

अभोजनमयाश्च ग्नेसीति वाज्याहुतिं चरेत् ।
अभोजनं तु दंपत्योर्भवेदन्यतरस्य वा ॥ ७५६ ॥

विच्छिन्नवह्निसन्धानं दिवा कुर्यात् यदा तदा ।
पूर्वेद्युस्सायमारभ्य कुर्याद्धोमद्वयं पृथक् ॥ ७५७ ॥

प्रतिमासं पादकृच्छ्रं विच्छिन्नाग्नेस्तु निष्कृतिम्
पादप्रस्थं घृतं पञ्च प्रस्थकं धान्यमेव च ॥ ७५८ ॥

दत्वा च श्रोत्रियायैव ततस्संधानमाचरेत् ।
द्वात्रिंशत्प्रसृतिः प्रस्थं मुष्टयः षोडशापि वा ॥ ७५९ ॥

आपद्यध्वनि वा वह्नेस्समारोपणमाचरेत् ।
अश्वत्थसमिधि स्वाग्निं अयं त इति मन्त्रतः ॥ ७६० ॥

तदभावे तु पालाश्यांमौदुम्बर्यामथापि वा ।
खादर्यां वाऽपि समिधि समारोपणमाचरेत् ॥ ७६१ ॥

आजुह्वानस्सुप्रतीक उद्बुध्यस्वेति मन्त्रतः ।
आधाय लौकिकाग्नौ तां होमं कुर्यात् ततः परम् ॥ ७६२ ॥

यद्वा याते अग्न इति समारोप्याग्निमात्मनि ।
विसृज्योपावरोहेति मन्त्रेण जुहुयात् ततः ॥ ७६३ ॥

आत्मन्यग्निसमारूढे शूद्रान्त्यपतितश्वभिः ॥
अमेध्यवायसोदक्यासूतिकाशुचिभिर्यदि ॥ ७६४ ॥

संस्पृष्टे लौकिके वह्नौ विसृज्यात्मस्थपावकम् ।
पुनस्त्वादित्यमन्त्रेणोपसमिन्ध्य त्रयेण च ॥ ७६५ ॥

व्याहृतीनां स्वयं हुत्वा होमं कुर्यात् स्वशक्तितः ।
शवानुगमनाशौचोपघातेऽग्निसमिन्धनम् ॥ ७६५ (A) ॥

सर्वप्रायश्चित्तहोमं सद्योऽन्येनैव कारयेत् ।
केचित् वदन्त्यग्निनाशं आत्मरूढेऽपि पावके ॥ ७६६ ॥

पतिताद्यैर्भाषणे च मज्जनेऽनृतु मैथुने ।
अकृत्वा भोजनं रात्रौ सभार्यः पर्वदर्शयोः ॥ ७६७ ॥

प्रतिमासं प्रतिपदि स्थालीपाकं समाचरेत् ।
पालाशखदिराश्वत्थबैल्वौदुम्बरवेतसाः ॥ ७६८ ॥

शम्यर्कापामार्गदूर्वा दर्भास्स्युः समिधः क्रमात् ।
प्रादेशमात्रस्सत्वक्काःसंग्राह्याः जन्तुवर्जिताः ॥ ७६९ ॥

द्विवृक्षसंभवाजीर्णा स्थौल्येनाङ्गुष्ठतोऽधिकाः ।
सक्षीरपत्रा निर्वीर्यास्समिधः पाटिकास्त्यजेत् ॥ ७७० ॥

इध्मस्तु द्विगुणः कार्यः त्रिगुणः परिधिः स्मृतः ।
स्मार्ते प्रादेश इध्मो वा द्विगुणः परिधिः स्मृतः ॥ ७७१ ॥

तुलसीपुष्पसमिधो दर्भादींश्चाहरेत् स्वयम् ।
क्रीतैः शुद्राहृतैरेतैः कर्म कुर्यात् पतेदधः ॥ ७७२ ॥

वेदान्तदेशिकमते क्रीतपुष्पं न दोषकृत् ।
तुलसीकाष्ठजे वह्नौ पतत्यन्नं हविश्चयः ॥ ७७३ ॥

तस्मिन् वा जुहुयात् तस्य भवेदेवाक्षयं फलम् ।
काष्ठाद्यप्रोक्षितं वह्नौ नादद्यादशुचीनि च ॥ ७७४ ॥

धमन्योपसमिन्धेत वह्निं नान्यैश्च साधनैः ।
तृणादिमन्तरे कृत्वा समिन्धेत मुखेन वा ॥ ७७५ ॥

खट्वादीनामधो वह्निं नादध्यात् न च लङ्घयेत् ।
यत्र काष्ठं तच्छ्रवणं तत्र रोगो हुते भवेत् ॥ ७७६ ॥

तदक्षि यत्र ज्वालाल्पा निन्दा तत्र हुते भवेत् ।
नासिका यत्र धूमःस्यात् तत्र होमे धनक्षयः ॥ ७७७ ॥

यत्र भस्म शिरस्तत्स्यात् तत्र पापं हुते भवेत् ।
जिह्वा ज्वाला यत्र तत्र जुहुयात् सर्वकर्मसु ॥ ७७८ ॥

मध्येऽग्नौ कनका जिह्वा होमस्स्यात् जातकर्मणि ।
कृष्णा जिह्वा दक्षिणे स्यात् होमःस्यात्तत्र पैतृके ॥ ७७९ ॥

विवाहहोमो जिह्वायां सुवर्णायां तु पश्चिमे ।
रक्ता जिह्वोत्तरे होमः तत्रोपनयने स्मृतः ॥ ७८० ॥

शन्तिकर्मणि होमे स्यात् बहुरूपेशादिकृस्थिता ।
अग्निदिग्व्यतिरिक्तायां होमस्स्यादाभिचारके ॥ ७८१ ॥

सुप्रभेति दिशि प्राच्यां जिह्वा हुतभुजो भवेत् ।
एभ्योऽन्यान् वैश्वदेवादिहोमांस्तत्र समाचरेत् ॥ ७८२ ॥

जिह्वा एवमविज्ञाय जुहुयात् यो हविर्द्विजः ।
निष्फलं कर्म तस्य स्यात् नरकं सोऽधिगच्छति ॥ ७८३ ॥

ब्रह्मचारी तु समिध आधास्य इति कालयोः ।
संकल्प्य कृत्वोल्के खादि प्रज्वाल्याग्निं प्रतिष्ठितम् ॥ ७८४ ॥

परिमृज्य परित्वेति ततः परिसमूह्य च ।
परिषिच्याग्नय इति मन्त्रैर्द्वादशभिस्ततः ॥ ७८५ ॥

समिधो द्वादशाधाय परिषिच्य च पूर्ववत् ।
मन्त्रैः यत्ते अग्न इति मयि मेधामिति त्रिभिः ॥ ७८६ ॥

उपतिष्ठेत् सायमेवेत्याहुः केचित् वटोरिदम् ।
आसमावर्तनाद्वह्नौ आदध्यात् लौकिके व्रती ॥ ७८७ ॥

स्नातकस्तु विवाहात् प्राग्लौकिकाग्नौ घृताहुतीः ।
सायं प्रातर्व्याहृतीभिर्हुत्वा कुर्यादुपस्थितिम् ॥ ७८८ ॥

विधुरौपासने चिन्त्यं वचनं यत्र कुत्रचित् ।
उद्धृत्य वह्निमित्यादिकारिकानां तथाकरः ॥ ७८९॥

कृत्वाऽग्निहोत्रं होमं वा निर्गत्याग्निगृहाद्बहिः ।
उपस्पृशेन्मङ्गलानि द्रव्याणीमानि नित्यशः ॥ ७९० ॥

राजानं ब्राह्मणं कन्यां श्वेतपुष्पाणि चन्दनम् ।
धेनुं सवत्सां वृषभं मृत्तिकां गोमयं तिलान् ॥ ७९१ ॥

सुवर्णमक्षतान् रत्नं दूर्वा दधि घृतं मधु ।
शम्यश्वत्थार्कदहनान् हरिद्रां लवणं गुडम् ॥ ७९२ ॥

गोरोचनं मृदंगं च दर्पणं धान्यमेव च ॥
जीरकं राजमाषं च प्रातः पश्येत् सदा बुधः ॥ ७९३ ॥

ब्रह्मयज्ञविधिः

ग्रामाद्बहिः प्रागुदीचीं गत्वोदीचीन्तु वा दिशम् ।
द्विराचम्य कृतप्राणायामः संकल्पयेदिति ॥
ब्रह्मयज्ञेन यक्ष्येऽम्भः स्पृष्ट्वा विद्युदसीति च ॥ ७९४ ॥

ऋचः प्रीणन्त्विति ततः त्रिःपीत्वा सलिलं ततः ।
ओष्ठौ यजूंषि प्रीणन्त्वित्युभौ संपरिमार्जयेत् ॥ ७९५ ॥

तौ तु सामानि प्रीणन्त्वित्युपस्पृश्य ततः शिरः ।
परं प्रीणन्त्वथर्ववाणीत्युक्त्वा तत उपस्पृशेत् ॥ ७९६ ॥

आङ्गीरसो ब्रह्मणानि प्रीणन्त्विति विलोचने ।
इतिहासपुराणानि प्रीणन्त्विति च नासिके ॥ ७९७ ॥

कल्पाश्च गाथाः प्रीणन्त्वित्यधः श्रोत्रद्वयं स्पृशेत् ।
प्रीणन्तु नाराशंसीरित्युरः स्पृष्ट्वोदकं स्पृशेत् ॥ ७९८ ॥

अत्रापि तुल्या नियमा य आचमन ईरिताः ।
आचम्यैवं शुचौ देशे प्रागग्रेषु कुशेष्वथ ॥ ७९९ ॥

आसीनः प्राङ्मुखः प्राणानायम्य त्रिःकरौ ततः ।
संकल्पोक्तप्रकारेण कृत्वा जानुनि दक्षिणे ॥ ८०० ॥

ओंकारमादावुच्चार्य गायत्रीं पादशस्ततः ।
प्रतिपादं व्याहृतीभिः क्रमेणादौ पृथग्युताम् ॥ ८०१ ॥

अर्धर्चशो व्याहृतीभ्यामाद्याभ्यामादितो युताम् ।
तृतीययादौ व्याहृत्या युक्तामनवसायताम् ॥ ८०२ ॥

उच्चरेदथवान्तेषु तिस्रो हि व्याहृतीः पृथक् ।
पादार्धर्चानवरानानां पूर्वोक्तविधिना वदेत् ॥ ८०३ ॥

न संयुज्याच्च सर्वत्र गायत्रीं व्याहृतिं तथा ।
यद्वा विना व्याहृतिभिर्गायत्रीं त्रिर्वदेदिति ॥ ८०४ ॥

वेदादींश्चतुरोऽधीत्य प्रश्नाध्ययनमारभेत् ।
परेद्युरुत्तरं प्रश्नं तत्परेद्युस्तदुत्तरम् ॥ ८०५ ॥

एवं प्रतिदिनं प्रश्नमधीत्य तदनन्तरम् ।
नमो ब्रह्मण इत्येतामृचमन्ते जपेत् त्रिधा ॥ ८०६ ॥

ततो वृष्टिरसीत्युक्त्वा सलिलं समुपस्पृशेत् ।
गृहमभ्येत्य यत्किंचित् दद्यात् सा दक्षिणा स्मृता ॥ ८०७ ॥

अनध्यायेषु नियतप्रश्नस्वाध्यायवान् जपेत् ।
उपनीतो माणवकः प्रथमोपाकृतेः पुरा ॥ ८०८ ॥

वेदादींश्चतुरोऽधीत्य गायत्रीं च ततो जपेत् ।
जपेत् पुरुषसूक्तं यो ब्रह्मयज्ञे हरिं स्मरन् ॥ ८०९ ॥

स सर्ववेदपाठस्य फलं प्राप्नोत्यसंशयः ।
पारायणे ब्रह्मयज्ञे तथाऽन्येष्वपि कर्मसु ॥ ८१० ॥

प्रजपेत् संहितां नैव पदक्रमजटादिकान् ।
अनुषङ्गं चान्यशाखां ब्रह्मयज्ञे विवर्जयेत् ॥ ८११ ॥

प्रातःकाले ब्रह्मयज्ञे तदा मन्दं पठेत् श्रुतिम् ।
मध्यन्दिनेऽपराह्णे च पठेदुच्चैः स्वरेण तु ॥ ८१२ ॥

अधीयीत सदा ग्राममध्ये तु मनसा श्रुतिम् ।
ततो वेदस्याध्ययनं तस्य वाऽध्यापनं जपम् ॥ ८१३ ॥

अभ्यासं वा तस्य कुर्यात् तदार्थान्वा विचिन्तयेत् ।
वेदाभ्यासाविरोधेन शास्त्राणि च समभ्यसेत् ॥ ८१४ ॥

योऽनधीत्य श्रुतिं शास्त्रमभ्यसेत् सान्वयस्तु सः ।
जीवन्नेव भवेच्छूद्र इत्येवं मनुरब्रवीत् ॥ ८१५ ॥

पराशरोऽब्रवीत् विप्रो नामधारी श्रुतिं विना ।
वेदहीनस्य विप्रस्य सर्वशास्त्रप्रगल्भता ॥ ८१६ ॥

नग्नाया योषितः सर्वालङ्कारा इव वै भवेत् ।
विस्मृता स्यात् श्रुतिर्येन स्वधीतापि द्विजन्मना ॥ ८१७ ॥

स भ्रूणहेति विज्ञेयो वियोनिं चाधिगच्छति ।
अर्थार्थं यो नियुञ्जीत ब्राह्मणो निगमाक्षरम् ॥ ८१८ ॥

प्रत्यक्षरं ब्रह्महत्या पापं प्राप्नोत्यसंशयम् ।
प्रख्यापनं प्राध्ययनं प्रश्नपूर्वप्रतिग्रहः ॥ ८१९ ॥

याजनेऽध्यापने वादः षड्विधो वेदविक्रयः ।
अनध्यायेष्वध्ययनं वेदस्य च विधिं विना ॥ ८२० ॥

अर्थार्थं विनियोगश्च त्रयं वेदविनाशनम् ।

अनध्यायप्रदोषनिर्णयः

अनध्यायदिनान्यत्र प्रवक्ष्यन्ते यथामति ॥ ८२१ ॥

चतुर्दश्यष्टमीपर्वद्वयेषु प्रतिपत्सु च ।
शयनायनमन्वादियुगादिविषुवेष्वपि ॥ ८२२ ॥

सन्ध्ययोश्च प्रदोषेषु नाधीयीत श्रुतिं द्विजः ।
त्रिमुहूर्तमनध्यायतिथिर्यस्मिन् दिने भवेत् ॥ ८२३ ॥

उदयेऽस्तमये वाऽपि तत्रानध्यायमाचरेत् ।
चतुर्दश्यां यदा पर्व दर्शो वाऽस्तमयात्पुरा ॥ ८२४ ॥

संदृश्यते त्रयोदश्यामनध्यायस्तदा भवेत् ।
अपरेद्युश्च पूर्वेद्युरनध्यायो यदा भवेत् ॥ ८२५ ॥

तदा तयोर्मध्यदिने न वेदाध्ययनं चरेत् ।
यत्राध्ययनसंदेहस्तत्र नाध्यनं चरेत् ॥ ८२६ ॥

तृतीया नवनाडीनां रात्रौ न्यूना यदा भवेत् ।
आदित्यास्तमयादूर्ध्वं चतुर्थीचेत् द्विनाडिका ॥ ८२७ ॥

षष्ठी न्यूना पञ्चदश नाडिकानां यदा भवेत् ।
सप्तम्यस्तमयादूर्ध्वं यद्येकघटिका भवेत् ॥ ८२८ ॥

न्यूना च द्वादशी षष्टिः नाडिकानां भवेत् यदि ।
ऊर्ध्वमस्तमयादर्धघटिका चेत् त्रयोदशी ॥ ८२९ ॥

यस्मिन् दिने चानध्यायः पूर्वेधुर्दिवसान्तः ।
सर्वेष्वेतेषु तिथिषु प्रदोषः परिकीर्तितः ॥ ८३० ॥

आषाढशुक्लद्वादश्यां यस्मात् शेते रमापतिः ।
शयनद्वादशी तस्मात् सा प्रोक्ता मुनिपुङ्गवैः ॥ ८३१ ॥

आषाढे कार्तिके ज्येष्ठे चैत्रमासे च फाल्गुने ।
पौर्णमासी भाद्रपदे तृतीया चैत्रमास्यपि ॥ ८३२ ॥

आषाढे दशमीशुक्ला कृष्णा च श्रावणाष्टमी ।
आश्वयुक्छुक्लनवमी पौषे चैकादशी सिता ॥ ८३३ ॥

फाल्गुने मास्यमावास्या माघे शुक्ला च सप्तमी ।
कार्तिके द्वादशी शुक्ला मन्वादय इमे स्मृताः ॥ ८३४ ॥

शुक्ला तृतीया वैशाखे नवमी कार्तिकी सिता ।
कृष्णा त्रयोदशी भाद्रे माघेऽमाच युगादयः ॥ ८३५ ॥

सन्त्यन्ये चाप्यनध्यायकाला मुनिभिरीरिताः ।
गौतमापस्तम्बमुख्यैर्ज्ञातव्यास्तत्र तत्र ते ॥ ८३७ ॥

अभिगमनाराधनक्रमः

एवं श्रीरामकैङ्कर्यरूपा होमदिकाः क्रियाः ।
श्रीरामचन्द्रप्रीत्यर्थं कृत्वा सीताधवाज्ञया ॥ ८३८ ॥

स्वदेवगृहमागत्यानम्य द्वास्थानिनुज्ञया ।
प्रविश्य संप्रणम्याष्टाङ्गप्रणामेन राघवम् ॥ ८३९ ॥

जय श्रीराम रक्षोहन् सुप्रभाता निशास्तु ते ।
कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ॥ ८४० ॥

उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ।
वीर सौम्य विबुध्यस्व कौसल्यानन्दवर्धन ॥ ८४१ ॥

जगद्धि सर्वं स्वपिति त्वयि सुप्ते नराधिप ।
इति प्रबोध्य श्रीरामं तालत्रितयतोऽररम् ॥ ८४२ ॥

उद्घाट्यानम्य श्रीरामं स्मृत्वा गुरुपरम्पराम् ।
द्वयेन मितगद्येन वा रामं शरणं व्रजेत् ॥ ८४३ ॥

पत्रैः पुष्पैः फलैस्तोयैः केवलाञ्जलिनापि वा ।
कृपासमुद्रं श्रीरामं सर्वलोकैकनायकम् ॥ ८४४ ॥

---

३६ नात्र ग्रन्थविच्छेदः

सकृत् स्मरणमात्रेण सर्वाघौघविनाशनम् ।
आश्रिताभीष्टदातारं सकृदञ्जलिकिङ्करम् ॥ ८४५ ॥

ब्रह्मेशादिसुरश्रेष्ठसमर्चितपदाम्बुजम् ।
यथोक्तविधिनाऽभ्यर्च्य स्तुत्वा च विविधैः स्तवैः ॥ ८४६ ॥

समाप्य चाभिगमनं श्रीरामाय समर्पयेत् ।
नैध्रुवान्वयसंजातश्रीनिवासार्यसूनुना ॥ ८४७ ॥

श्रीनिवासयतिश्रेष्ठपदाम्बुजषडङ्घ्रिणा ।
सीतारामपदाम्भोजनित्यसंयुक्तचेतसा ॥ ८४८ ॥

श्रीवीरराघवेणोक्तसच्चरित्रसुधानिधौ ।
सीतारामप्रेरणया कृतोऽभिगमनक्रमः ॥ ८४९ ॥

नलाख्ये हायने मासि मिथुने नवमीतिथौ ।
श्लोकैर्नगाद्यैरुक्तोऽयं मयाऽभिगमनक्रमः ॥ ८५० ॥

उपादानविधिः

अजतातं कुजाजानिमजात्मजपितामहम् ।
अजात्मजमजं देवं भजाम्यजपितामहम् ॥ ८५१ ॥

(अजतातम् - ब्रह्मजनकम् । कुजाजानिम्- सीतापतिम् । अजात्मजस्य - रुद्रस्य पितामहम् । अजो मन्मथः, स आत्मजः पुत्रो यस्य तम् । अजः दशरथपिता सः पितामहः यस्य तम् ।)

पुष्प-तुलसी-दर्भाहरणविधिः

समाप्य रामाभिगममुपादानमनन्तरम् ।
संकल्प्य पुष्पतुलसीसमिद्दर्भान् समाहरेत् ॥ ८५२ ॥

अन्यानि पूजाद्रव्याणि धनधान्यादिकानि च ।
पुष्पाणि चम्पकाम्भोजमल्लिकादीनि चाहरेत् ॥ ८५३ ॥

अयाचितं पर्युषितं स्पृष्टं पादेन लङ्घितम् ॥
म्लानं च स्पृष्टमस्पृश्यैः केशकीटादिदूषितम् ॥ ८५४ ॥

दुर्गन्धं मलगन्धं च निर्गन्धं पतितं भुवि ।
उग्रगन्धं शीर्णदलमूर्णनाभिविचेष्टितम् ॥ ८५५ ॥

स्वयं पतितमन्यार्थं संदिष्टमविकासितम् ।
हस्तवस्त्रार्कहेरम्बवटानीतं परित्यजेत् ॥ ८५६ ॥

देवोद्यानोद्भवैः पुष्पैः नार्चयेत् गृहदेवताम् ।
न जिघ्रेत् कुसुमादीनि नैवेद्यानि रमापतेः ॥ ८५७ ॥

भृगुभौमार्कवारेषु मन्वादिषु युगादिषु ।
चतुर्दश्यष्टमीपातसंक्रान्तिद्वादशीषु च ॥ ८५८ ॥

नाहरेत् तुलसीमूर्ध्वं मध्याह्नात् पर्वणोरपि ।
तुलसी श्रीसखे शुभ्रे पापहारिणि पुण्यदे ॥ ८५९ ॥

नमस्ते नारदनुते नारायणमनः प्रिये ।
नमस्ते देवि तुलसी नमस्ते हरिवल्लभे ॥ ८६० ॥

लोकमातर्नमस्तुभ्यं नमस्ते भक्तवत्सले ।
आनन्दाश्रुसमुद्भूते विष्णोर्विष्णुप्रियङ्करे ॥ ८६१ ॥

प्रसीद मेऽद्य भक्तस्य भूयो भूयो नमोऽस्तु ते ।
तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये ॥ ८६२ ॥

केशवार्थं लुनामि त्वां वरदा भव शोभने ॥ ८६२१/२ ॥

मोक्षैकहेतो धरणिप्रसूते विष्णोस्समस्तस्य गुरोः प्रिये ते ।
आराधनार्थं पुरुषोत्तमस्य लुनामि पत्रं तुलसी क्षमस्व ॥ ८६३ ॥

स्तुत्वैवं तुलसीं स्तोत्रैर्गृहीत्वा प्रार्थयेत् ततः ।
प्रसीद मम देवेशि प्रसीद हरिवल्लभे ॥ ८६४ ॥

क्षीरोदमथनोद्भूते तुलसि त्वं प्रसीद मे ।
त्वन्मूले सर्वतीर्थानि त्वन्मध्ये सर्वदेवताः ॥ ८६५ ॥

त्वदग्रे सर्ववेदाश्च तुलसि त्वां नमाम्यहम् ।
कायेन मनसा वाचा यत्पापं जायते मया ॥ ८६६ ॥

तत्सर्वं नाशय क्षिप्रं विष्णोराराधनाच्छुभे ।
आहृत्य च हरिष्यंश्च तुलसीं प्रणमेत् सदा ॥ ८६७ ॥

प्रक्षालयेत् न तुलसीं पुष्पं प्रक्षालयेत् जलैः ।
शुष्कैः पर्युषितैर्वाऽपि पूजयेत् तुलसीदलैः ॥ ८६८ ॥

नाक्षतैरर्चयेत् पुष्पैः तुलसीरहितैरपि ।
तत्तद्दिनेष्वेव योग्या दर्भास्तत्तद्दिनोद्धृताः ॥ ८६९ ॥

मासे नभस्याहृताश्चेत् योग्या दर्भास्तु वत्सरम् ।
क्वचिन्नभस्य इत्युक्ता माघे मासीति च क्वचित् ॥ ८७० ॥

हुंकारेण सतारेण प्राङ्मुखो वाऽप्युदङ्मुखः ।
दर्भान् स्पृष्ट्वाथ मन्त्रेण विरिंचेनेति चाहरेत् ॥ ८७१ ॥

विरिंचेन सहोत्पन्न परमेष्ठिनिसर्गज ।
नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव ॥ ८७२ ॥

कुशोऽथ विश्वामित्रोऽश्ववालः काशस्तथैव च ।
दूर्वाशिरो यवो व्रीहिर्दर्भा एते क्रमात् स्मृताः ॥ ८७३ ॥

छायाध्वाशुचिदेशेषु ये दर्भास्तान्विवर्जयेत् ।
ये परिस्तरणे दर्भा ये दर्भाः पितृकर्मणि ॥ ८७४ ॥

आसने ब्रह्मयज्ञे च ये दर्भा यज्ञभूमिषु ।
छिन्नाग्रानग्निदग्धांश्च स्पृष्टा न प्रयतैरपि ॥ ८७५१/२ ॥

नरवच्छिन्नान् दक्षिणाग्रान् दर्भानेतान् विवर्जयेत् ॥ ८७६ ॥

द्रव्यार्जनप्रकारः

अथार्जनं पोष्यवर्गरक्षणाय समाचरेत् ।
पितृमातृभ्रातृभार्यापुत्रपुत्र्याश्रिताग्नयः ॥ ८७७ ॥

अतिथ्यभ्यागताचार्याः पोष्यवर्गा उदाहृताः ।
ब्राह्मणेभ्यो विशिष्टेभ्यः क्षत्रियेभ्योऽपि वा धनम् ॥ ८७८ ॥

वैश्येभ्यो वाऽपि गृह्णीयात् न शूद्रेभ्यः कदाचन ।
शिष्टानध्यापयेत् वाऽपि याजयेद्वा द्विजान् सतः ॥ ८७९ ॥

अध्यापनं याजनं च न कुर्यात् असतां द्विजः ।
षण्णां तु कर्मणां मध्ये त्रीणि कर्माणि जीविकाः ॥ ८८० ॥

याजनाध्यापने चैव विशिष्टाच्च प्रतिग्रहः ।
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ ८८१ ॥

सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ।
ऋतमुञ्छशिलं प्रोक्तममृतं स्यादयाचितम् ॥ ८८२ ॥

मृतं तु याचितं प्रोक्तं प्रमृतं कृषिरुच्यते ।
सत्यानृतं वणिग्धर्मः श्ववृत्तिः सेवनं स्मृतम् ॥ ८८३ ॥

भृतकाध्यापकात् ग्रामयाजकात् भृतकार्चकात् ।
भृतकाध्यायिनो वृद्धिजीवनात् कूटसाक्षिणः ॥ ८८४ ॥

सोमविक्रयिणश्चापि सततं श्राद्धभोजिनः ।
स्त्रीजितात् भिषजः षण्डात् कदर्यात् पिशुनादपि ॥ ८८५ ॥

पातकिश्वित्रिपाषण्डिपतितेभ्यः पुरोहितात् ।
अध्यक्षगणिकानग्निहेतुकेभ्यो विकर्मणः ॥ ८८६ ॥

वृषबीजप्रहरिणो बिम्बप्रस्थापकात् शठात् ।
असत्यवादिनः शुद्रशिष्याच्छिल्पोपजीविनः ॥ ८८७ ॥

ज्ञातेः संबन्धिनः शत्रोर्वेदशास्त्रावमानिनः ।
रमारमणतद्भक्तद्वेषिणोऽगम्यगामिनः ॥ ८८८ ॥

निक्षेपहारिणश्चोरात्परद्रव्यापहारिणः ।
एभ्यो न प्रतिगृह्णीयात् कुलटाया नृपादपि ॥ ८८९ ॥

लवणक्षीरदध्यन्नमधुतण्डुलसर्पिषाम् ।
ग्राम्यारण्यपशुक्षौमगन्धपुष्पगुडाश्मनाम् ॥ ८९० ॥

तिलतैलायुधविषमांसगोसोमवाससाम् ।
एषां विक्रयकृद्भ्यश्च न कर्तव्यः प्रतिग्रहः ॥ ८९१ ॥

प्रजाविक्रयिणो धर्मदारविक्रयिणस्तथा ।
धर्मं दद्यात् पितुर्मातुर्गुरोर्नान्यस्य कस्यचित् ॥ ८९२ ॥

देशतः कालतश्चापि जातितः कर्मतस्तथा ।
स्वरूपतश्चाभिहितः पञ्चधाऽसत्प्रतिग्रहः ॥ ८९३ ॥

देशः स्यात् सेतुगङ्गादिः कालस्तु ग्रहणादिकः ।
क्षत्रियादिस्तथा जातिः कर्म सोमक्रयादिकम् ॥ ८९४ ॥

महिषीमेषदानादि निषिद्धं स्यात् स्वरूपतः ।
असद्भ्यः प्रतिगृह्यार्थं यस्सद्भ्यः संप्रयच्छति ॥ ८९५ ॥

स कृत्वा नावमात्मानं संतारयति तावुभौ ।
असत्प्रतिग्रहं हित्वा कुर्वन् सद्भ्यः प्रतिग्रहम् ॥ ८९६ ॥

गृह्णीयात् प्रतिगेहं वा हित्वा दैन्यमतन्द्रितः ।
गृहानगच्छन्नसतामकुर्वन् परपीडनम् ॥ ८९७ ॥

लब्धेन येन केनापि संतुष्टः सततं भवेत् ।
ताम्बूलफलमूलाम्बुदर्भशाकवसुन्धराः ॥ ८९८ ॥

गन्धपुष्पदधिक्षीरगृहशय्यासनानि च ।
एतानि प्रतिगृह्णीयात् सर्वेभ्योऽपि न निर्णुदेत् ॥ ८९९ ॥

भिषक्पाषण्डपतितकुलटाभ्यो विना सदा ।
दानं ददद्भिर्यैरुक्तमच्युतः प्रीयतामिति ॥ ९०० ॥

प्रतिगृहीतृभिश्चापि न ते यान्ति यमान्तिकम् ।
अतोऽयं सात्विकं दानं तोयपूर्वं तु शान्तिदम् ॥ ९०१ ॥

आशिषा पौष्टिकं दद्यात् दानं त्रिविधमुच्यते ।
चतुष्कपितरं षट्कपितृपौत्रं सहस्रकम् ॥ ९०२ ॥

सहस्रदोषं पुरुषं दशकारिं भजे समम् ।

(चतुष्कः- चतुर्मुखः तस्य पितरम् । षट्कपिता-षण्मुखजनकः शिवः, सः पौत्रः यस्य तम् । सहस्रं कानि शिरांसि यस्य तम् । सहस्रशीर्षा पुरुष इति श्रुतेः । सहस्रदोषम् - सहस्रबाहुम् । दशकस्य - दशशिरसो रावणस्य । अरिम् - शत्रुम् । समं - सलक्ष्मीकम् । पुरुषं-नारायणं भजे ।)

नैध्रुवान्वयसंभूतश्रीनिवासार्यसूनुना ॥ ९०३ ॥

श्रीनिवासयतिश्रेष्ठपदाम्भोजषडङ्घ्रिणा ।
सीतारमणपादाब्जयुग्मविन्यस्तचेतसा ॥ ९०४ ॥

श्रीवीरराघवेणोक्तसच्चरित्रसुधानिधौ ।
श्रीरामचन्द्रप्रीत्यर्थं उपादानविधिक्रमः ॥ ९०५ ॥

अब्दे नलोत्तरे मासि सहस्ये प्राक्तने तिथौ ।
रङ्गैः श्लौकेः स्तवैः प्रोक्त उपादानविधिर्मया ॥ ९०६ ॥

नैमित्तिकस्नानादिनिर्णयः

अत्र माध्याह्निकस्नानप्रसङ्गात् क्रियतेऽधुना ।
नैमित्तिकाभ्यङ्गधात्रीमृदब्धिमाघमज्जनम् ॥ ९०७ ॥

ग्रहणे चैव संक्रान्त्यां स्नानं नद्यारजस्तथा ।
निर्णेष्येऽत्र सुसूक्ष्मार्थं संग्रहेण च दृश्यते ॥ ९०८ ॥

षण्डपाषण्डपतितोन्मत्तपाशुपतादिकान् ।
अभोज्यान्नान् बिडालन्तु कर्मकाले च भोजने ॥ ९०९ ॥

खरोष्ट्रकृकलासाखुवृकगर्दभवानरान् ।
गृध्रभासोलूककाककुक्कुटग्रामसूकरान् ॥ ९१० ॥

श्मशानं प्रेतधूमं च चितिकाष्ठं चितिं सुराम् ।
सुराभाण्डं च लशुनं स्निग्धमस्थि च मानुषम् ॥ ९११ ॥

शूद्रं परस्यासृङ्मांसं रेतोमूत्रमलानि च।
देवतासंनिधिं मुक्त्वाऽन्यत्र देवलकं तथा॥ ९१२॥

धूपं च यज्ञे निर्वृत्ते स्पृष्ट्वा स्नानं समाचरेत्।
वमने भोजनात् पूर्वं पुरीषोत्सर्जने तथा॥ ९१३॥

दुःस्वप्ने चर्तुगमने शोकजाश्रुनिपातने।
अलंकृतं चोह्यमानं दृष्ट्वा प्रेतं च सूतिकाम्॥ ९१४॥

तस्याश्च वचनं श्रुत्वा सचेलं स्नानमाचरेत्।
आश्वासने कृते स्नायात् प्रेतबन्धुजनान् प्रति॥ ९१५॥

अस्थिसंचयनादर्वागूर्ध्वमाचमनं चरेत्।
प्रथमेऽह्नि कृते तस्मिन् जपहोमादि नाचरेत्॥ ९१६॥

प्रेतकर्मोपक्रमात् प्राक् अबन्धुः स्नानमाचरेत्।
प्रेतकर्मण्युपक्रान्ते समाप्ते स्नानमाचरेत्॥ ९१७॥

कृते प्रेतानुगमने त्रयोदशनिमज्जनम्।
कृत्वा स्पृष्ट्वा वह्निमाज्यं पीत्वा स्नात्वा पुनस्ततः॥ ९१८॥

प्राणायामत्रयं कुर्यात् जपहोमादि नाचरेत्।
आज्याग्न्यभावे गायत्र्या दशवाराभिमन्त्रितम्॥ ९१९॥

उदकं चुलकं पीत्वा पुनस्स्नानं समाचरेत्।
नाभेरधः शुना स्पृष्टं देशं प्रक्षाल्य वह्निना॥ ९२०॥

प्रताप्य भूयः प्रक्षाल्य पादौ चाचम्य शुध्यति।
प्रक्षाल्य नाभेरूर्ध्वं तु सचेलस्नानमाचरेत्॥ ९२१॥

आहिताग्निः शुना दष्टः क्षीरं नक्तं पिबेत् दिनम्।
अनाहिताग्निर्द्विदिनं ब्रह्मचारी दिनत्रयम्॥ ९२२॥

नाभेरध इदं प्रोक्तं तदूर्ध्वं द्विगुणं भवेत्।
उन्मत्तं पतितं चान्त्यं श्वपाकं शवदाहकम्॥ ९२३॥

प्रसूतिकारयित्रीं च सूतिकां च रजस्वलाम्।
अस्पृश्यो वाऽथवोच्छिष्ट अनाचान्तो यदि स्पृशेत्॥ ९२४॥

अबुद्धिपूर्वे गायत्रीं जंपेदष्टसहस्रकम्।
प्राजापत्यं बुद्धिपूर्वे कृच्छ्रं कुर्यात् विशुद्धये॥ ९२५॥

कैवर्तश्चर्मकारश्च बुरुडो रजकस्तथा।
मेदो नटश्च भिल्लश्च सप्तैतेऽन्त्याः प्रकीर्तिताः।
सुवर्णायस्ताम्रकांस्यशिलाकाराध्वजी तथा॥ ९२६॥

तक्षा च तन्तुवायोऽष्टौ ग्रामान्त्याः समुदाहृताः।
चण्डालःश्वपचो म्लेच्छस्त्रय एते समाः स्मृताः॥ ९२७॥

चण्डालसूतिकोदक्या पतितानां चतुर्युगम्।
त्रियुगं द्वियुगं चैकयुगं परिहरेत् क्रमात्॥ ९२८॥

पदानि द्वादशयुगं पदानि नव वा भवेत्।
यथादेशं यथाचारं व्यवस्थाऽत्र विकल्प्यते॥ ९२९॥

यदि तत्तद्युगान्न्यूनं तैस्तैः स्पृष्टस्तदा भवेत्।
चण्डालाद्यैस्तु यः स्पृष्टः कृतक्षौरोऽपि यश्च सः॥ ९३०॥

स्पृष्टस्तेनापि यस्तेन स्पृष्टस्तेऽशुचयस्त्रयः।
चण्डालाद्यैस्तु यः स्पृष्टः कृतक्षौरोऽपि यश्च सः॥ ९३१॥

त्रयोदश निमज्ज्याथ पुनस्स्नानं समाचरेत्।
द्वितीयो यदि रोगी स्यात् तदाचमनमाचरेत्॥ ९३२॥

स्नानमेव तृतीयस्य बुद्धिपूर्वं यदि स्पृशेत्।
आचामेत्तु तृतीयोऽपि प्रमादाद्यदि संस्पृशेत्॥ ९३३॥

चतुर्थो बुद्धिपूर्वोऽपि कुर्यादाचमनं सदा।
द्रव्याणां प्रोक्षणं तत्र यत्राचमनमीरितम्॥ ९३४॥

रजस्वलान्त्यपतितचण्डालाङ्गं यदि स्पृशेत्।
द्वात्रिंशत् विंशति दश द्वात्रिंशन्मज्जनं क्रमात्॥ ९३५॥

श्वपाकं प्रेतधूमं च देवद्रव्योपजीविनम् ।
सस्नेहं मानुषं चास्थि चितिकाष्ठं शवस्पृशम् ॥ १३६ ॥

सोमविक्रयिणां ग्रामयाजकं च रजस्वलाम् ।
यूपं स्नानं मद्यभाण्डं महापातकिनं तथा ॥ १३७ ॥

संस्पृष्ट्वैतान् बुद्धिपूर्वं सचेलमवगाह्य तु ।
अग्निं स्पृष्ट्वाथ गायत्रीं जपित्वाष्टशतं घृतम् ॥ १३८ ॥

पीत्वा स्नात्वा त्रिराचामेदिति च्यवनभाषितम् ।
छायामन्त्यश्वपाकादेः स्पृष्ट्वा स्नानं समाचरेत् ॥ १३९ ॥

चत्वारिंशत्पदादूर्ध्वं छायादोषो न विद्यते ।
वस्त्रान्तरितसंस्पर्शः शरीरस्पर्शवत् स्मृतः ॥ १४० ॥

पक्वेष्टका चिता पृथ्वी रथ्या कर्दमवारिणी ।
मारुतेनैव शुध्यन्ति स्पृष्टान्यप्यन्त्यजातिभिः ॥ १४१ ॥

दिवा चेन्मैथुनं कुर्यात् पंचस्वपि च पर्वसु ।
वारुणैः प्रोक्षयेन्मन्त्रैस्सचेलस्नानपूर्वकम् ॥ १४२ ॥

रजस्वलादिसंस्पृष्टिर्यदा स्याद्बालकन्ययोः ।
तदा संप्रोक्षणं कुर्यात् मासादासप्तमात्तयोः ॥ १४३ ॥

तदूर्ध्वमाचतुर्थाब्दात् सा यद्याचामयेत् तदा ।
तदूर्ध्वं स्नापयेत् बालं कन्यामप्यविचारयन् ॥ १४४ ॥

अन्यस्पृष्टौ तथोच्छिष्टे नाप्रायत्यन्तयोः स्मृतम् ।
मासादासप्तमादब्दाद्यावज्जातं दिशां भवेत् ॥ १४५ ॥

तावद्वाप्योपनयनादिति पक्षचतुष्टयम् ।
चण्डालाद्याः स्थिता यत्र गोवालव्यजनाद्बहिः ॥ १४६ ॥

स्पृष्टिर्न विद्यते तत्र रोगार्ते संकटे तथा ।
तृणकाष्ठादिसंघातकुड्यैरन्तरितं यदि ॥ १४७ ॥

गोवालव्यजनादर्वागपि स्पृष्टिर्न विद्यते ।
वसन् कटादिकेऽस्पृश्यैरस्पृश्य तृणनिर्मिते ॥ ९४८ ॥

चण्डालाद्यैरेकशाखां समारूढस्तदाऽशुचिः ।
कौसुम्भगुडकार्पासतैलाज्यलवणानि तु ॥ ९४९ ॥

चण्डालाद्यैर्यदि स्पृष्टान्यपि प्रोक्ष्योपयोजयेत् ।
स्पृष्ट्वा चण्डालमृत्पात्रं स्नात्वा कृच्छ्रं समाचरेत् ॥ ९५० ॥

स्पृष्ट्वा तेषां कपालं तु कुर्यात् स्नानासुसंयमौ ।
चण्डालं पतितं वापि दृष्ट्वा पश्येत् दिवाकरम् ॥ ९५१ ॥

स्नात्वा तौ यदि संपश्येत् पुनस्स्नानं समाचरेत् ।
ग्रामवर्षोद्भवं तोयं कर्दमं वा यदि स्पृशेत् ॥ ९५२ ॥

जङ्घयोर्मृत्तिकास्तिस्रो देयाः षट्पादयोर्मृदः ।
रथ्याकर्दमतोयाभ्यां ष्ठीवनाद्येन वा यदि ॥ ९५३ ॥

नाभेरूर्ध्वं नरस्स्पृष्ट्वा सचेलस्स्नानमाचरेत् ।
स्पृष्टोऽमेध्येन जानुभ्यामधः स्नानं समाचरेत् ॥ ९५४ ॥

अधो नाभेस्तदूर्ध्वं चेदुपवासोऽधिको मतः ।
उपवासत्रयं नाभेरूर्ध्वं स्नानं च कीर्तितम् ॥ ९५५ ॥

वारुणं स्नानमेव स्यात् निमित्ते गौणमन्यथा ।
स्नाने नैमित्तिके प्राप्ते रोगार्तो दशधा परः ॥ ९५६ ॥

स्नात्वा स्नात्वा स्पृशेद्वस्त्रं प्रतिस्नानं त्यजेच्च सः ।
अन्यच्च धारयेद्वस्त्रं शुद्धिः स्यादातुरस्ततः ॥ ९५७ ॥

रजस्वलायाः शयनं भुक्तिपात्रमथापि वा ।
स्पृष्ट्वा स्नानमकृत्वा चेत् भुञ्जीतोपवसेत् दिनम् ॥ ९५८ ॥

रजस्वलां तदन्नं च तद्वासः तद्रजस्तथा ।
स्पृष्ट्वा स्नानमकृत्वा चेत् भुञ्जीतोपवसेत् त्र्यहम् ॥ ९५९ ॥

भुक्त्वा रजस्वलापात्रे मोहात् कृच्छ्रं समाचरेत् ।
भुक्त्वा रजस्वलोच्छिष्टं कृच्छ्रं सान्तपनं चरेत् ॥ ९६० ॥

भगवत्संनिधावस्पृश्यस्पर्शदोषाभाव:

विष्णोस्सेवार्थमागम्य तन्मन्दिरसमीपगाः ।
तस्यैवोत्सवसेवार्थमागता वापि तत्र ये ॥ ९६१ ॥

चण्डालाः पतिता वा तान् स्पृष्ट्वा न स्नानमाचरेत् ।
स्नायात् चेत्तस्य पितरः पतन्ति नरके स च ॥ ९६२ ॥

शक्तो मुहूर्तमपि वा न स्यादप्रयतो शुचिः ।

क्षौराभ्यङ्गविधिः

उपवासव्रतश्राद्धदिनेषु गुरुवासरे ॥ ९६३ ॥

षष्ठ्यमापूर्णिमापातचतुर्दश्यष्टमीषु च ।
भार्गवे वासरे वापि क्षुरकर्म न कारयेत् ॥ ९६४ ॥

श्रवणोत्तरफल्गुन्योर्ज्येष्ठार्द्राप्रतिपत्सु च ।
विवाहसुखदुःखेषु प्रातर्दीपावलीं विना ॥ ९६५ ॥

गुर्वङ्गारकभृग्वर्कवासरेषु तथा निशि ।
निषिद्धदिवसा ये स्युः क्षुरकर्मणि तेष्वपि ॥ ९६६ ॥

तैलाभ्यङ्गो न कर्तव्यः सायंकाले त्रिजन्मसु ।
दूर्वां भूमिं गोमयं च कुसुमं च यथाक्रमम् ॥ ९६७ ॥

तैले निक्षिप्य गुर्वादिवारेष्वभ्यङ्गमाचरेत् ।
एतेष्वन्येषु वा तैलपाने दोषो न विद्यते ॥ ९६८ ॥

तथा तिलविकारेषु शष्कुलीमोदकादिषु ।
प्रातरभ्यक्तगात्रस्य प्रायश्चित्तं न विद्यते ॥ ९६९ ॥

धात्री पिष्टेन तुलसीदलेन सलिलेना वा ।
आज्येन वाऽपि संयुक्तं रोगार्तस्य न दुष्यति ॥ ९७० ॥

अभ्यङ्गं ब्राह्मणोच्छिष्टमार्जनं वा करोति यः ।
शताब्दं जाह्नवीस्नानराजसूयफलं लभेत् ॥ १७१ ॥

धात्रीस्नानमृत्तिकास्नानविधिः

चतुर्दश्यां द्वितीयायां दशमीदर्शपर्वसु ।
नवम्यामपि सकम्यां संक्रान्त्यां रविवासरे ॥ १७२ ॥

धात्रीस्नानं न कर्तव्यं प्रातः काले च सर्वदा ।
भृगुभौमार्कवारेषु पित्रोर्मृततिथौ तथा ॥ १७३ ॥

मरवानन्दाकृत्तिकासु मध्याह्नात्परतोऽपि च ।
न कुर्यात् मृस्तिकास्नानं प्रातः कालेऽपि सर्वदा ॥ १७४ ॥

समुद्रस्नानविधिः

पर्वणोरुदधिस्नानं नान्यकाले समाचरेत् ।
विद्धे पर्वणि न स्नायात् चतुर्दश्यां महोदधौ ॥ १७५ ॥

सा चेत् भौमयुता स्नायात् तामतिक्रम्य पर्वणि ।
पक्षद्वयेऽपि तिथयः तिथिं पूर्वां तथोत्तराम् ॥ १७६ ॥

त्रिभिर्मुहूर्तैः विध्यन्ति सामान्योऽयं विधिः स्मृतः ।
गत्वा तीरं समुद्रस्य प्रणम्य कुसुमाक्षतान् ॥ १७७ ॥

समर्प्याञ्जलिना तस्मै तन्मन्त्रैः प्रणमेत् पुनः ।
नमस्ते सलिलेशाय नमो गम्भीरमूर्तये ॥ १७८ ॥

नमो मेघनिनादाय नमस्ते परमात्मने ।
विविधाघौघनाशाय सुधागर्भाय ते नमः ॥ १७९ ॥

महानघधिनाथाय महारत्नोद्भवाय ते ।
महातरङ्गनिर्घोषविलसद्विस्मयात्मने ॥ १८० ॥

महाप्राण्यधिवासाय महावारिधये नमः ।
समुद्राय नमस्तेऽस्तु सागराय नमोऽस्तु ते ॥ १८१ ॥

सरितां पतये तुभ्यं नमस्तुभ्यमुदन्वते ।
नमोऽस्तूदधये तुभ्यं नमस्तुभ्यं सरस्वते ॥ ९८२ ॥

नमोऽम्बुराशये तुभ्यं पारावाराय ते नमः ।
नमोऽमृतोद्भवायेति प्रणम्याब्धिं पुनः पुनः ॥ ९८३ ॥

प्रणम्य वरुणं पश्चादासेव्यासीत तत्र तम् ।
'इमं मे वरुणे'त्यादि पञ्चर्चा वरुणं स्तुवन् ॥ ९८४ ॥

द्विमुहूर्तं मुहूर्तं वा ततः स्नातुमुपक्रमेत् ।
पिप्पलादसमुत्पन्ने कृत्ये लोकभयंकरी ॥ ९८५ ॥

पाषाणं ते मया दत्तमाहारार्थं प्रकल्पितम् ।
दत्त्वा पाषाणमेतेन मन्त्रेणावाहयेत् ततः ॥ ९८६ ॥

विश्वाची च घृताची च विश्वयोने विशांपते ।
सांनिध्यं कुरु मे देव सागरे लवणाम्भसि ॥ ९८७ ॥

नमस्ते विश्वगुप्ताय नमो विष्णु वपांपते ।
नमो जलधिरूपाय नदीनां पतये नमः ॥ ९८८ ॥

'समुद्राय' 'वयुनाये'ति मन्त्राभ्यां प्रणमेत् ततः ।
सर्वरत्नमय श्रीमन् सर्वरत्नाकराकर ॥ ९८९ ॥

सर्वरत्नप्रधान त्वं गृहाणार्घ्यं महोदधे ।
मन्त्रेणानेन दत्त्वार्घ्यमुदधिं प्रार्थयेत् ततः ॥ ९९० ॥

पृथिव्यां यानि तीर्थानि प्राविशस्त्वां महोदधे ।
स्नातस्य मे फलं देहि सर्वस्मात् त्राहि मांहसः ॥ ९९१ ॥

समस्तजगदाधार शङ्खचक्र गदाधर ।
देहि देव ममानुज्ञां युष्मत्तीर्थनिषेवणे ॥ ९९२ ॥

इति विष्णुमनुज्ञाप्य स्नानं कुर्यात् ततोऽम्बुधौ ।
वेदादयो वेदवसिष्ठयोनिः सरित्पतिः सागर रत्नयोनिः ॥ ९९३॥

अग्निश्च ते तेज इला च तेजो रेतोधा विष्णुरमृतस्य नाभिः ।
इदं ते अन्याभिरसमानमद्भिः याः काश्च सिन्धुं प्रविशन्त्यापः ॥ ९९४॥

सर्पो जीर्णामिव त्वचं जहामि पापँ शरीरात् ।
सशरीरस्कोऽभ्युपेत्य ॥ ९९५ ॥

स्नानं कृत्वेति मन्त्राभ्यां उदधौ तर्पयेदिमान् ।
पिप्पलादं कविं कण्वं कृतान्तं जीवितेश्वरम् ॥ ९९६ ॥

मन्युं च कालरात्रं च विद्यां चाहर्गणेश्वरम् ।
इति संतर्प्य देवर्षिपितृतर्पणमाचरेत् ॥ ९९७ ॥

माघस्नानविधिः

माघस्नानस्य नित्यत्वात् किंचिदभ्युदिते रवौ ।
स्त्रीणां स्मृतं द्विजानां तु प्रागादित्योदयादिति ॥ ९९८ ॥

किंचिदभ्युदिते भानौ माघस्नाने कृते द्विजैः ।
संध्याकालातिक्रमेण महान् दोषो भवेत् ध्रुवम् ॥ ९९९ ॥

प्रोक्षणादेरुपस्थानं तस्यैकत्वेन कर्मणः ।
उपस्थानस्य विस्पष्टमण्डलेऽर्के विधानतः ॥ १००० ॥

स्नानकालातिक्रमः स्यात् पश्चात् तच्चेदुपस्थितेः ।
मकरस्थे रवौ माघे गोविन्दाच्युत माधव ॥ १००१ ॥

स्नानेनानेन मे देव यथोक्तफलदो भव ।
इमं मन्त्रं समुच्चार्य प्रागेवार्कोदयात् द्विजैः ॥ १००२ ॥

स्नानं कर्तव्यमेतेन माघस्नानं च सिध्यति ।

ग्रहणस्नानादिविधिः

ग्रस्यमाने रवौ स्नायात् ग्रस्ते दानं विधीयते ॥ १००३ ॥

मुच्यमाने भवेच्छ्राद्धं मुक्ते स्नानं समाचरेत् ।
चन्द्रग्रहेऽप्येवमेव यामांस्त्रीन् न तु भोजयेत् ॥ १००४ ॥

सूर्यग्रहे चतुर्यामं ग्रस्तास्ते भोजनं न हि।
ग्रस्तोदये तु सूर्यस्य पूर्वरात्रौ न भोजनम् ॥ १००५ ॥

ग्रस्तोदये तु चन्द्रस्य नाहर्भोजनमिष्यते।
बालवृद्धातुराणां तु भोजनं न हि दुष्यति ॥ १००६ ॥

संक्रान्तिपुण्यकालादिनिर्णयः

पुण्या रविगतौ नक्रे विंशतिर्घटिका अनु।
पूर्वं कुलीरे तावत्यो घटिकाः पुण्यदाः स्मृताः ॥ १००७ ॥

मेषे तुलायां संक्रान्त्यां प्राक् पश्चाद्दशनाडिकाः।
पुण्याः स्थिरर्क्षसंक्रान्त्यामर्वाक् पश्चात्तु षोडश ॥ १००८ ॥

द्विःस्वभावे रविक्रान्त्यामथ षष्ठिस्तु नाडिकाः।
एवं मध्याह्नसंक्रान्तिपुण्यकालव्यवस्थितिः ॥ १००९ ॥

द्विःस्वभावे मृगे सूर्यास्तमयात् प्राग्रविक्रमे।
सर्वं पुण्यदिनं तत्स्यात् कटके चोदयात्परम् ॥ १०१० ॥

प्रदोषादौ मृगे सूर्योदयात् प्राक्कटकोदये।
उत्तरं पूर्वमेवाहः क्रमात्पुण्यं रविक्रमे ॥ १०११ ॥

निशीथात् प्राग्रविक्रान्त्यां मध्याह्नोपरि तद्दिनम्।
पश्चाद्रविक्रमे पश्चात् दिनार्धं पुण्यदं मतम् ॥ १०१२ ॥

रात्रिद्वितीययामान्त्यतदुत्तरघटीद्वये।
षडशीत्यां परदिनं पूर्वमप्ययनान्यके ॥ १०१३ ॥

नदीनां रजोदोषः

कर्कटे मासि संप्राप्ते सरितां रज उद्भवेत्।
अन्यत्र कृष्णाकावेरी गङ्गा गोदाश्च नर्मदाम् ॥ १०१४ ॥

समुद्रगानां त्रिदिनमन्यासां मासमेव च।
कावेर्या रजसो दोषः त्रिदिनं शिष्टसंमतम् ॥ १०१५ ॥

गतप्रत्यागतादीनां शुचिरत्र हि कीर्तिता ।
यथा ग्रहणकाले तु सर्वासां पुण्यदा स्मृता ॥ १०१६ ॥

एवं शुचिर्गतादीनां सरितां तु विशेषतः ।

माध्यह्निकस्नानविधिः

ततस्समाप्योपादानं पश्चादेकार्धयामतः ।
कुर्यान्माध्याह्निकस्नानमिज्यासंकल्पपूर्वकम् ॥ १०१७ ॥

प्रथमाश्रमिणोस्स्नानद्वयं स्नानत्रयं यतेः ।
एवमाश्रमिणां स्नाननियमो मुनिचोदितः ॥ १०१८ ॥

भगवच्छास्त्रतस्स्नानत्रयमेकान्तिनामपि ।
अशक्तौ कापिलादीनां स्नानमन्यतमं स्मृतम् ॥ १०१९ ॥

गृहीत्वा स्नानसंभारान् मृत्तिकागोमयादिकान् ।
नद्यादिकं समासाद्य तत्र स्नानं समाचरेत् ॥ १०२० ॥

प्रक्षाल्य पादौ पाणी च द्विः कृत्वाऽऽचमनं ततः ।
प्राणायामत्रयं कृत्वा स्नानं संकल्पयेत् ततः ॥ १०२१ ॥

समस्तजगदाधारेत्यनुज्ञाप्य रमा पतिम् ।
त्रिर्निमज्य ततो दूर्वामश्वक्रान्तेति मन्त्रतः ॥ १०२२ ॥

संस्थाप्य शिरसि स्नात्वा मृद्भिः स्नानमथाचरेत् ।
वाक्यानि सप्ताश्वक्रान्त इत्युच्चार्य तदन्ततः ॥ १०२३ ॥

शिरो मृदैकयालिप्य द्वाभ्यां नाभेस्तथोपरि ।
अधश्शरीरं तिसृभिः षड्भिः पादद्वयं ततः ॥ १०२४ ॥

उपलिप्य ततः स्नात्वा गन्धद्वारान्ततो मनुम् ।
उक्त्वा गोमयमालिप्य सर्वाङ्गे स्नानमाचरेत् ॥ १०२५ ॥

आर्द्रामलकमात्रास्तु मृत्तिकागोमयं तथा ।
षड्टचं वारुणं सूक्तमथापो वा इदं यजुः ॥ १०२६ ॥

आपो हिष्ठेत्यृचस्तिस्रो हिरण्येत्यृक्चतुष्टम् ।
पवमानानुवाकं च जपित्वा प्रोक्ष्य वारिभिः ॥ १०२७ ॥

प्रणवेन निरीक्ष्यार्कं त्रिर्निमज्य ततो द्विजः ।
हिरण्यश्रृङ्गमित्याद्यैः प्रातस्स्नानोक्तवर्त्मना ॥ १०२८ ॥

कृत्वा स्नानाद्यूर्ध्वपुण्ड्रधारणान्तं समाचरेत् ।
पूर्वमुक्तोऽस्मदाचार्यप्रोक्तस्स्नानक्रमोऽपरः ॥ १०२९ ॥

माध्याह्निकविधिः

करिष्य इति संकल्प्य कर्म माध्याह्निकं ततः ।
कुर्यात् सर्वं प्रोक्षणादिगायत्र्युद्वासनावधि ॥ १०३० ॥

आपः पुनन्त्वित्यप्पानं गायत्र्यैकार्घ्यमत्र तु ।
आपः पुनन्त्वित्यस्य मन्त्रस्याप ऋषिः स्मृतः ॥ १०३१ ॥

छन्दोऽनुष्टुबिति प्रोक्तं देवता ब्रह्मणस्पतिः ।
शक्त्या जपेत्तु गायत्रीं तिष्ठन् पश्यन् दिवाकरम् ॥ १०३२ ॥

मध्याह्नात् परतोऽशक्त आसीनः प्राङ्मुखो जपेत् ।
अर्घ्यप्रदानं गायत्रीजपं चार्कमुखस्सदा ॥ १०३३ ॥

कुर्यात् स्नानं चाप्रवाहजले स्यात् पतितोऽन्यथा ।
किंचिदाकुञ्चितौ हस्तौ उत्तानौ संहताङ्गुली ॥ १०३४ ॥

मध्येंऽसभुजयोः कृत्वा मध्याह्ने जपमाचरेत् ।
देवालये यदि जपेत् तत्रैवोपस्थितिं चरेत् ॥ १०३५ ॥

प्रदक्षिणनमस्कारान्नोपस्थाने तदाचरेत् ।
आसत्येनेत्यादिमन्त्रैस्सूर्योपस्थानमाचरेत् ॥ १०३६ ॥

हिरण्यस्तूप आसत्येत्याद्यानां मुनिरीरितः ।
आसत्येनोद्वयमिति छन्दस्त्रिष्टुबृचो : स्मृतम् ॥ १०३७ ॥

गायत्र्युदुत्यमित्यस्या जगती चित्रमित्यृच : ।
उष्णिक् तच्चक्षुरित्यस्यास्त्रिष्टुब्य उदगादृच : ॥ १०३८ ॥

सर्वासां देवताऽऽदित्यो विनियोग उपस्थितौ ।
हँसश्शुचिषदित्युक्त्वा गायत्रीं च यथाबलम् ॥ १०३९ ॥
उपस्थाय नमस्कृत्य कृत्वाऽर्कायाभिवादनम् ।
प्रातः कालोक्तवत् सन्ध्यादिदिङ्नमनमाचरेत् ॥ १०४० ॥
प्रातर्यद्यकृतो ब्रह्मयज्ञः कार्योऽधुना स च ।
संतर्प्याधारशक्त्यादीन् देवर्षिपितृकानपि ॥ १०४१ ॥
नवकाण्डऋषींश्चापि वस्त्रं निष्पीडयेत् परम् ।
ततो गृहं समागत्य श्रीरामेज्यां समाचरेत् ॥ १०४२ ॥
श्रीरामेज्या समेज्यान्या नास्ति सत्यं मयोदितम् ॥
यत्पादत्रमभूत् नरेन्द्रविभवं यस्यारिषु स्याद्दया
यत्पादाम्बुजरेणुना समभवत्स्पृष्टा दृषत्स्त्र्युत्तमा- ।
यश्शाखामृगसेनया समजयत् रक्षांसि यस्याम्बुधि -
र्गाधोऽभूत्तृणमस्त्रमप्रतिहतं कोऽन्योऽस्ति देवस्ततः ॥ १०४३ १/२ ॥
सर्वेशं कविरक्षसोरपि नृपैरप्राप्य राज्यप्रदं
व्याधस्त्रीखगयोश्च योगिमुनिभिश्चाप्राप्य लोकप्रदम् ।
किं च स्थावरजङ्गमानपि परं स्वं प्रापयन्तं पदम्
श्रीरामं भजते ह भो तनुभृतो हित्वेतरा देवताः ॥ १०४४ १/२ ॥
भवजलधिनिमग्ना इह कुरुत जना यूयम् ॥ १०४५ ॥
रघुवरयजनं नित्यं भवभयहरणं मुक्त्यै ।
श्रीरामचन्द्रसदृशं नास्ति नास्तीति दैवतम् ॥ १०४६ ॥
तस्मात् स एव संपूज्यो लोकद्वयहितेप्सुभिः ।

इज्याकालभगवदाराधनक्रमः

अथ श्रीरामचन्द्रेज्याप्रकारो वक्ष्यतेऽधुना ॥ १०४७ ॥

गृही यथा प्रियातिथिं यथैव सेवका नृपं
सती यथा प्रियं पतिं यथा प्रसूः प्रियार्भकम् ।
यथा गजं मदोद्धतं रघूद्वहं महाप्रभुं
तथैव भक्तिमान् सदा विभावयेत् रमापतिम् ॥ १०४८ ॥

अक्रुध्यन्नत्वरन्नार्द्रमकुर्वंश्च महीतलम् ।
अशब्दयन् पात्रसंघं बालाननुपलालयन् ॥ १०४९ ॥

हुङ्कारं रोदनं हासं निद्रामालस्यभाषणे ।
भगवद्वदनाम्भोजं हित्वाऽन्यत्रावलोकनम् ॥ १०५० ॥

एतानन्यांश्चापचारान् पूजाकाले विवर्जयेत् ।
सेवां जपं प्रणामांश्च स्तुतिं पूजां च सर्वदा ॥ १०५१ ॥

देवस्य दक्षिणे पार्श्वे कर्माण्यन्यानि चाचरेत् ।
प्रदक्षिणे प्रणामे च देवतागुरुसंनिधौ ॥ १०५२ ॥

वस्त्रनिष्पीडने स्नाने उपस्थानेऽभिवादने ।
धार्यं कट्यामुत्तरीयं पितृकार्ये सुरालये ॥ १०५३ ॥

ये ये मन्त्रास्स्युरिज्यायां तांस्तान् प्रणवपूर्वकान् ।
मूलमन्त्रशिरस्कांश्च तत्र तत्र समुच्चरेत् ॥ १०५४ ॥

कालत्रये द्विकालं वा पूजयेदेकदापि वा ।
शतेन वा द्वात्रिंशद्भिर्दव्यभिष्टर्वाष्टभिस्तु वा ॥ १०५५ ॥

उपचारैः पञ्चभिर्वा यथाशक्ति समर्चयेत् ।
प्रदक्षिणनमस्कारान् युग्मानेव समाचरेत् ॥ १०५६ ॥

दण्डवत् कूर्मवच्चैव प्रणामो द्विविधो भवेत् ।
प्रतिप्रणामं शिरसि कृत्वाञ्जलिमुरस्यथ ॥ १०५७ ॥

अङ्गं कुर्यादवनतं सममेतत्प्रणामयो : ।
घण्टां नैवेद्यधूपार्घ्यदीपस्नानेषु नादयेत् ॥ १०५८ ॥

प्रक्षालिताङ्घ्रिराचान्तस्सपवित्रोर्ध्वपुण्ड्रकः ।
शोभितं रङ्गवल्याद्यैः कालागुरुसुधूपितम् ॥ १०५९ ॥

घृतदीपसमायुक्तं संप्राप्य हरिसंनिधिम् ।
पुष्पाक्षतानञ्जलिना प्रकीर्य हरिमन्दिरे ॥ १०६० ॥

चण्डादिकान् द्वारपालान् नत्वाऽनुज्ञाप्य तांस्ततः ।
सव्येतराङ्घ्रिविन्यासपूर्वं सद्म प्रविश्य तत् ॥ १०६१ ॥

त्रिर्हस्ततताडनं कृत्वा प्रबोध्य कमलापतिम् ।
कवाटोद्घाटनं कृत्वा प्रणमेत् जानकीपतिम् ॥ १०६२ ॥

संकीर्त्य गुरुपङ्क्तिं च पृथुगद्यं ततः पठेत् ।
भूं भूम्यै नम इत्युक्त्वा भूमिं संगृह्य तां ततः ॥ १०६३ ॥

विशोध्य वायुमन्त्रेण दग्ध्वा तामग्निमन्त्रतः ।
आप्लाव्य सोममन्त्रेण तत्तन्मुद्राः प्रदर्श्य च ॥ १०६४ ॥

रक्षां कृत्वाऽस्त्रमन्त्रण ततो दशसु दिक्षु च ।
कृत्वा मुद्रां सौरभेयीमासनं चास्त्रमन्त्रत : ॥ १०६५ ॥

विधाय प्रोक्ष्य तत्तेन मन्त्रेणासीत चासने ।
उदकुम्भं वामभागे निदध्यादात्मनश्शुभम् ॥ १०६६ ॥

अन्यानि पूजाद्रव्याणि तुलस्यादीनि दक्षिणे ।
ततस्स्वगुरुमारभ्य श्रीशान्तं प्रणमेत् गुरून् ॥ १०६७ ॥

आत्मनः शेषभूतेन मया द्रव्यैस्तथाविधैः ।
सीतारामः प्रक्रमते स्वयं स्वेज्यां स्वतुष्टये ॥ १०६८ ॥

स एव प्रापकः प्राप्यो रक्षकश्चेति वै धिया ।
अनुसन्धाय शरणमुपगच्छेत् रमापतिम् ॥ १०६९ ॥

ऋष्यादिन्याससहितं जपेदष्टाक्षरं ततः ।
प्राणायमत्रयं कृत्वा संकल्प्येज्यां स्वविग्रहे ॥ १०७० ॥

पञ्चोपनिषदः पादगुह्योराघ्राणमूर्धसु ।
न्यस्य संहृत्य तत्त्वानि देहं वाय्वग्निमन्त्रतः ॥ १०७१ ॥

विशोष्य दग्ध्वाप्लाव्याथ प्रकृतिं परमात्मनः ।
उत्पाद्य पञ्च तत्त्वानि पञ्चोपनिषदस्तथा ॥ १०७२ ॥

न्यस्य मूर्धादिपादान्तं तत्तच्छक्तिमयं वपुः ।
ध्यात्वा सीतापतेर्वामपादाङ्गुष्ठविनिस्सृताम् ॥ १०७३ ॥

गङ्गां पतन्तीं शिरसि स्वस्याङ्गं क्षालितं तया ।
चिन्तयित्वा सोर्ध्वपुण्ड्रं ततो हृदयपङ्कजे ॥ १०७४ ॥

ध्यात्वा श्रीराममर्घ्याद्यैरुपचारैस्तु मानसैः ।
अभ्यर्च्य कुम्भे तुलसीगन्धपुष्पाणि निक्षिपेत् ॥ १०७५ ॥

शोषणादीनि कृत्वा तं सुधापूर्णं विचिन्तयेत् ।
ततः कृत्वाऽस्त्रमन्त्रेण रक्षां दशसु दिक्ष्वपि ॥ १०७६ ॥

दर्शयित्वाऽथ सुरभिमुद्राममृतवर्षिणीम् ।
अष्टाक्षरेण मन्त्रेण सप्तकृत्वोऽभिमन्त्र्य च ॥ १०७७ ॥

स्वास्तीर्णे पुरतः पीठे पञ्च पात्राणि निक्षिपेत् ।
प्रक्षाल्य चास्त्रमन्त्रेण शोषणादि विधाय च ॥ १०७८ ॥

मूलमन्त्रेण कुम्भस्थतोयेनापूर्य तान्यथ ।
सिद्धार्थयवदर्भाग्रगन्धपुष्पतिलाक्षतान् ॥ १०७९ ॥

निक्षिप्याग्नेयदिक्पात्रे पात्रे नैर्ऋतिके ततः ।
श्यामाकं विष्णुपर्णीं च दूर्वां पद्मं च निक्षिपेत् ॥ १०८० ॥

एलालवङ्गतक्कोलजातीर्वायव्यदिक्स्थिते ।
ईशानदिक्स्थिते पात्रे कोष्ठमाञ्जीमुरानिशाः ॥ १०८१ ॥

वचाखर्जूरलामज्जचम्पकानपि निक्षिपेत् ।
पात्रेष्वेतेषु मध्यस्थपात्रे चाग्नेयदिक्क्रमात् ॥ १०८२ ॥

तुलसीगन्धपुष्पाणि मूलमन्त्रेण निक्षिपेत् ।
तले दक्षिणहस्तस्य सूर्यबीजं विचिन्त्य च ॥ १०८३ ॥

सोमबीजं वामहस्ततले ताभ्यां विशोध्य च ।
पात्राणि रक्षां कृत्वाऽस्त्रमन्त्रेण दशदिक्ष्वपि ॥ १०८४ ॥

प्रदर्श्य मुद्रां पूर्वोक्तां सुधापूर्णं विचिन्त्य च ।
पवित्रमूलमन्त्राभ्यामभिमन्त्र्याग्निदिक्स्थितम् ॥ १०८५ ॥

पात्रमन्यानि पात्राणि मूलमन्त्रेण संस्पृशेत् ।
अर्घ्यपाद्ये चाचमनस्नानीये चाग्निदिक्क्रमात् ॥ १०८६ ॥

मध्ये सर्वार्थतोयं च देवाय परिकल्पयेत् ।
उद्धरिण्याऽर्घ्यसलिलं गृहीत्वा नासिकावाधि ॥ १०८७ ॥

हस्ताभ्यां तत्समुद्धृत्य तस्मिंस्तु विरजां नदीम् ।
आवाह्य मूलमन्त्रेण सप्तकृत्वोऽभिमन्त्र्य तत् ॥ १०८८ ॥

पञ्चपात्रेषु कुम्भे च किंचित्किंचिन्निनीय तत् ।
तच्छेषेण हरिं पूजाद्रव्याणि सदनं हरेः ॥ १०८९ ॥

स्वात्मानमपि संप्रोक्ष्य कल्पयेदासनं ततः ।
आधारशक्त्याद्यापीठं गन्धपुष्पादिभिः पृथक् ॥ १०९० ॥

अभ्यर्च्य योगपीठस्य प्रदेशे पश्चिमोत्तरे ।
गुरूनभ्यर्च्य गन्धाद्यैस्तत आवाहयेत् हरिम् ॥ १०९१ ॥

मन्त्रयोगादिसांनिध्ययाचनान्तक्रियान्वितम् ।
विभूषणान्यायुधानि पादसंवाहिनीरपि ॥ १०९२ ॥

परिच्छदान् परिजनान् अनन्तविहगाधिपान् ।
विष्वक्सेनद्वारपालगणाधीशांस्ततोऽर्चयेत् ॥ १०९३ ॥

ऋग्भिः पुरुषसूक्तस्य मूलमन्त्रेण वा हरिम् ।
यजेदुभाभ्यां श्रीराममित्यगस्त्यमुनीरितम् ॥ १०९४ ॥

श्रीमत्पुरुषसूक्तस्य नारायण ऋषिः स्मृतः ।
ऋचां दशानां पञ्चानामनुष्टुप्छन्द आदितः ॥ १०९५ ॥

अन्ते तिसृणां त्रिष्टुप् स्यात् देवो नारायणः स्मृतः ।
ऋचं सहस्रशीर्षेति वामहस्ततले न्यसेत् ॥ १०९६ ॥

ऋचं पुरुष एवेति दक्षिणे विन्यसेत् तले।
एतावान् वामचरणे त्रिपादूर्ध्वस्तु दक्षिणे ॥ १०९७ ॥

तस्मात् यत्पुरुषेणेति सव्यदक्षिणजङ्घयोः।
सप्तास्य तं यज्ञमिति कट्योः सव्यतदन्ययोः ॥ १०९८ ॥

तस्मात् यज्ञादिति द्वाभ्यां नाभ्यां वक्षसि च क्रमात्।
तस्मादश्वा इति गले सव्ये यत्पुरुषं भजे ॥ १०९९ ॥

दक्षिणे ब्राह्मणोस्येति चन्द्रमा इत्यृचं मुखे।
नाभ्या आसीन्न्यसेदक्ष्णोर्वेदाहमिति मूर्धनि ॥ ११०० ॥

पादाद्यामस्तकं धाता यज्ञेनेति न्यसेदृचौ।
गोविन्दायेति च महीधरायेति च हृत्कयोः ॥ ११०१ ॥

हृषीकेशाय चूडायां कवचाय त्रिविक्रमम्।
विन्यसेत् विष्णवे नेत्रत्रयाय वषडित्ययि ॥ ११०२ ॥

माधवायेति चास्त्राय फडिति क्रमतो न्यसेत् ॥ ११०२/२ ॥

गोक्षीराभं पुण्डरीकायताक्षं चक्राब्जाद्यैर्भूषणैर्भूषिताङ्गम्।
श्रीभूमिभ्यामर्चितं योगपीठे सर्वव्याप्तं पूजयामीष्टसिध्यै ॥ ११०३/२ ॥

न्यासं कृत्वेति च ध्यात्वा देवमावाहयेत्ततः ॥ ११०४ ॥

सहस्रशीर्षा पुरुष एवेत्यावाहनासने।
एतावानित्यर्घ्यदानं पाद्यं दद्यात् त्रिपादिति ॥ ११०५ ॥

तस्मात् विराडाचमनं स्नानं यत्पुरुषेण च।
दद्यात् सप्तास्येति वस्त्रं तं यज्ञमुपवीतकम् ॥ ११०६ ॥

तस्मात् यज्ञादृचा गन्धं पुष्पं तस्मादिति ह्यृचा।
तस्मादश्वेत्यृचा धूपं दीपं यत्पुरुषं त्वृचा ॥ ११०७ ॥

मधुपर्कं ब्राह्मणोस्य नैवेद्यं चन्द्रमा इति।
नाभ्या आसीच्च ताम्बूलं वेदाहं च प्रदक्षिणम् ॥ ११०८ ॥

धातेत्यृचा नमस्कुर्यात् यज्ञेनोद्वासनं चरेत् ।
ऋग्भिः पुरुषसूक्तस्य दद्यात् पुष्पाणि चक्रिणे ॥ १९०९ ॥

पूजावसाने च जपेत् पुनस्सूक्तं तु पौरुषम् ।
एतानन्यांश्चोपचारान् दद्यादष्टाक्षरेण वा ॥ ११९० ॥

श्रीभाष्यकारभट्टार्यवङ्गिवंशाधिपादिभिः ।
प्रोक्तेष्वन्यतमेनेशं प्रकारेण समर्चयेत् ॥ ११११ ॥

संपूज्यैवं यथाशक्ति जपित्वाष्टाक्षरं पुनः ।
ब्रह्मपारंपरं स्तोत्रं उक्त्वा देवं क्षमापयेत् ॥ १११२ ॥

क्षुद्रस्याज्ञस्य नीचस्य त्वां प्रपन्नस्य दुर्मतेः ।
दयानिधेऽपचारान् मे क्षमस्व रघुनन्दन ॥ १११३ ॥

सीताराम त्वत्पदाम्भोजयुग्मे
भक्तिर्नित्याऽचञ्चला मे सदा स्यात् ।
आपत्काले वापि धर्मे मतिस्स्यात्
त्वय्येतावत् प्रार्थनीयं न मेऽन्यत् ॥ १११४॥

रामचन्द्र सदा भवेन्मम धर्मबुद्धिरचञ्चला
ज्ञानसिद्धिरनुत्तमा च विरागता सुदृढा भवेत् ।
त्वत्पदाम्बुजयोस्त्वदीयपदाम्बुजेष्वनिश्चला ।
भक्तिरव्यभिचारिणी मम सर्वदाऽस्तु रघूत्तमे ॥ १११५ ॥

रामचन्द्र नमोऽस्तु ते रविवंशजाय नमोऽस्तु ते ।
रामभद्र नमोऽस्तु ते रघुनन्दनाय नमोऽस्तु ते ॥ १११६ ॥

दीनानाथ नमोऽस्तु ते दनुजान्तकाय नमोऽस्तु ते ।
भक्तवश्य नमोऽस्तु ते भरताग्रजाय नमोऽस्तु ते ॥ १११७ ॥

जानकीश नमोऽस्तु ते जितराक्षसाय नमोऽस्तु ते ।
कौसलेय नमोऽस्तु ते कलिनाशकाय नमोऽस्तु ते । १११८
क्षीरसागरकन्यकावरनायकाय नमोऽस्तु ते ।
ब्रह्मरुद्रमुखामराधिपवन्दिताय नमोऽस्तु ते ॥ १११९ ॥

रावणादिनिशाचरानलवारिदाय नमोऽस्तु ते ।
जानकीवदनारविन्ददिवाकराय नमोऽस्तु ते ॥ ११२० ॥
देवदानवयोगिवन्द्यपदाम्बुजाय नमोऽस्तु ते ।
विश्वसृष्टिविनाशनस्थितिकारिणे च नमोऽस्तु ते ॥ ११२१ ॥
सर्वपातकसंघनाशनहेतुसेतुकृते नमः ।
सर्वभूतगुहाशयाय रघूत्तमाय च ते नमः ॥ ११२२ ॥
इति स्तुत्वा संप्रणम्य श्रीरामं हृदि भावयेत् ।
सीतारामः कारितवान् स्वयं स्वेज्यां स्वतुष्टये ॥ ११२३ ॥
इति बुद्ध्यानुसन्धाय समाप्याराधनं हरेः ।
ततः पश्येत् च मार्ताण्डं हँशश्शुचिषदित्यृचा ॥ ११२४ ॥
अरिदरमुकुराम्भोजं कुशसुरतरु विभ्राजत् ।
रघुवरचरणाम्भोजं मनसि मम सदा भूयात् ॥ ११२५ ॥
रामकृष्णादिमासर्क्षस्वजन्मर्क्षद्विपर्वसु ।
संक्रान्तिग्रहणे श्रोणाद्वादशीषु महाभये ॥ ११२६ ॥
दुःस्वप्ने दुर्निमित्ते च महाभागवतागमे ।
पायसापूपसूपाज्यबहुव्यञ्जनसंयुतम् ॥ ११२७ ॥
बहूपचारसंयुक्तं विशेषाराधनं चरेत् ।
धनुर्मास्युषसि श्रीशमिष्ट्वान्नं मौद्गसंयुतम् ॥ ११२८ ॥
विनिवेद्योदयात्पूर्वं सन्ध्याकर्म समाचरेत् ।
द्रव्यहीनं यदि भवेत् विशेषाराधनं वृथा ॥ ११२९ ॥
दरिद्रोऽपि यथाशक्ति कुर्यात् भागवतागमे ।

वैश्वदेवविधिः

आरम्भो वैश्वदेवस्य संवेशनजपात्परम् ॥ ११३० ॥
ब्रह्मचर्यमधश्शय्यां लवणक्षारवर्जनम् ॥
चरित्वा द्वादशदिनमुपोष्यैकदिनं ततः ॥ ११३१ ॥
शुभेऽनुकूले दिवसे सभार्येण द्विजन्मना ॥
द्विजाभ्यनुज्ञासहितं कार्यस्सदुपदेशत ः ॥ ११३२ ॥

वैश्वदेवं च धर्मादिबलिदानं च नित्यश : ।
दिवानक्तं च कुर्वीत पञ्च यज्ञान् दिवैव तु ॥ ११३३ ॥

औपासनांग्नौ भुक्तेः प्रागनश्नन्नप्यतन्द्रितः ।
विच्छिन्नाग्निश्च विधुरो लौकिकाग्नौ समाचरेत् ॥ ११३४ ॥

अन्नाभावे फलै मूलैश्शाकैः क्षीरादिनाऽपि वा ।
कुर्यादामेन वा मन्त्रान् जपेद्वा न विलोपयेत् ॥ ११३५ ॥

हस्तेनान्नादिना कुर्यात् स्रुवेण पय आदिना ।
संकल्पयेत् वैश्वदेवं करिष्य इति गृह्यथ ॥ ११३६ ॥

ब्रूयात् भूतमिति स्वस्य भार्यादिः पाककृज्जनः ।
तत्सुभूतं विराडन्नं तन्माक्षायि स्वयं वदेत् ॥ ११३७ ॥

अग्नावन्नमधिश्रित्य प्रोक्ष्य कृत्वा च पञ्चधा ।
परिषिच्याग्निमाग्नेयदिक्स्थाद्धात्रीफलोपमम् ॥ ११३८ ॥

भागादोदनमादाय संहताङ्गुलिपाणिना ।
उत्तानेन तथाङ्गुष्ठशिरसा संनिपीड्य च ॥ ११३९ ॥

हुत्वा षडाहुतीस्स्विष्ट कृतं च परिषिच्य च ।
अपोह्योष्णं भस्मवह्नेरुदक् तत्र हविष्यकम् ॥ ११४० ॥

सूपापूपव्यञ्जनादि सक्षारलवणं हुनेत् ।
बलिप्रदानं संकल्प्य तत्कुर्यात् व्यजनाकृति ॥ ११४१ ॥

धर्मादिरुद्रपर्यन्तं चक्राकारमथापि वा ।
भूमिं हस्तेन संमृज्य वारिणा प्रोक्ष्य तत्र तु ॥ ११४२ ॥

बलिं निधाय दैवेन तीर्थेनामलकोपमम् ।
परिषिंचेदेकदेशविहितानां सकृत् सकृत् ॥ ११४३ ॥

बहिर्निर्गत्य ये भूताः प्रचरन्तीति मन्त्रतः ।
ऊर्ध्वमुत्क्षिप्य च बलिमाचम्यान्योद्धृतेषु ते ॥ ११४४ ॥

बलिषूत्तरतो वह्नेरग्र्यं ग्रासचतुष्टयम् ।
निधाय परिषिच्याथ कुर्यात् पञ्च महामखान् ॥ ११४५ ॥

पञ्चमहायज्ञविधानम्

यक्ष्य इत्येव संकल्पो महायज्ञेषु पञ्चसु ।
आद्यन्तयोः स्पृशेदम्भो विद्युत् वृष्टिरिति क्रमात् ॥ ११४६ ॥

देवयज्ञे तु देवेभ्यःस्वाहेति जुहुयात् हविः ।
औपासनवदाद्यन्तपरिषेचनमत्र च ॥ ११४७ ॥

प्राचीनावीय्यथाग्नेस्तु दक्षिणे पितृतीर्थत : ।
प्रागग्रेषु बलिं दद्यात् दर्भेषु पितृमन्त्रतः ॥ ११४८ ॥

अथोपवीती दर्भेषु दत्तस्याग्र्यस्य पश्चिमे ।
प्रागग्रेषु बलिं दद्यात् भूतेभ्यो देवतीर्थतः ॥ ११४९ ॥

भूतबल्यग्रयोर्मध्ये अन्नमग्र्याच्चतुर्गुणम् ।
उपवीती मनुष्येभ्यो देवतीर्थेन निक्षिपेत् ॥ ११५० ॥

वायसश्वबलिं दद्या मन्त्राभ्यामन्नशेषतः ।
वैश्वदेवावशिष्टान्नं तत्पश्चात् भागसंयुतम् ॥ ११५१ ॥

सव्यंजनं च धर्मादिबलिकर्मसु योजयेत् ।
ईशानदिक्स्थमग्र्यार्धं तत्पश्चात् नृमखस्य तु ॥ ११५२ ॥

तत्पश्चिमे देवपितृभूतयज्ञार्थमीरितम् ।
न कृतश्चेत् ब्रह्मयज्ञः प्रागिदानीं तमाचरेत् ॥ ११५३ ॥

स्वाध्यायमुच्चैर्मध्याह्ने ग्रामे चेन्मनसा चरेत् ।
दद्याच्च भिक्षात्रितयं यतीनां वर्णिनामपि ॥ ११५४ ॥

विभवे ऽवारितं दद्यात् आद्यन्तोदकसंयुतम् ।
अकृते वैश्वदेवे चेत् यतिर्भिक्षार्थमागतः ॥ ११५५ ॥

उद्धृत्य वैश्वदेवार्थमन्नं पात्रे निधाय तत् ।
दत्त्वा संन्यासिने भिक्षां वैश्वदेवं ततश्चरेत् ॥ ११५६ ॥

ततो गृहाङ्कणे पादघटिकामवलोकयन् ।
अतिथ्यागमनं तिष्ठेदागतं तत्र भोजयेत् ॥ ११५७ ॥

अविज्ञातोध्वगःश्रान्त अन्नार्थी क्षुत्पिपासितः ।
इज्याभोजनयोर्मध्ये आगतोऽथितिरुच्यते ॥ ११५८ ॥

दद्यादन्नं यथाशक्ति तदभावे जलं स्थलम् ।
शुभां वाचं वदेद्धान्नदातारं वा निवेदयेत् ॥ ११५९ ॥

आत्मार्थमन्नं भिक्षेत न परार्थं कदाचन ।
अयोग्यमपि तं श्रीशं भावयित्वैव भोजयेत् ॥ ११६० ॥

परमापत्स्वपि प्राज्ञैः कदाचिदपि वैष्णवैः ।
अयोग्येभ्यो न दातव्यं लक्ष्मीपतिनिवेदितम् ॥ ११६१ ॥

अविज्ञातानन‍र्हांश्च भोजयेदनिवेदितैः ।
अतिथ्यभ्यागतौ बालवृद्धरोगसुवासिनीः ॥ ११६२ ॥

गर्भिणीं भोजयित्वा प्राक् पश्चात् भुञ्जीत च स्वयम् ।
निवेदितेन कमलाकान्तस्यान्नेन पैतृकम् ॥ ११६३ ॥

वैश्वदेवादिकं कर्म कुर्यात् प्राणाहुतीरपि ।
आपद्यपि न भुञ्जीत न पिबेच्चानिवेदितम् ॥ ११६४ ॥

यदा निवेदनानर्हं भोक्तव्यं कोद्रवादिकम् ।
तदा भुञ्जीत तोयाद्यैः मिश्रीकृत्य निवेदितैः ॥ ११६५ ॥

अन्नादिकं यदि प्राप्तं मूर्त्यन्तरनिवेदितम् ।
भुञ्जीत विनिवेद्यैव तदा स्वाराध्यमूर्तये ॥ ११६६ ॥

अपूपफलमूलाद्यं भुक्तिमध्येऽनिवेदितम् ।
प्राप्तं यदि स्वपुत्राद्यैः भुञ्जीत विनिवेद्य तत् ॥ ११६७ ॥

यद्वस्तु स्यात् भोजनार्हं तदेवाहृत्य धर्मतः ।
निवेद्य हरये कृत्वा वैश्वदेवादिकं ततः ॥ ११६८ ॥

अतिथ्यभ्यागतादिभ्यो दत्त्वा भुञ्जीत नेतरत्।
पाकभेदं न कुर्वीत भोक्तृणामपि चात्मनः ॥ ११६९ ॥

न दद्यात् विषमं पङ्क्तौ सूपापूपघृतादिकम्।

भोजनविधिः

संप्रणम्य श्रीनिवासयतीशानं मयाऽधुना ॥ ११७० ॥

प्रोच्यते भोजनविधिः सीतारामप्रसादतः।
प्रक्षाल्य पाणी पादौ च द्विराचम्य प्रसन्नधीः ॥ ११७१ ॥

पवित्रं वर्तुलं धृत्वा पुत्राद्यैर्बन्धुभिस्सह।
उपलिप्ते गोमयेन निश्छिद्रं चतुरश्रकम् ॥ ११७२ ॥

अन्यूनमप्यनधिकं भुक्तिपात्रस्य भूतले।
न्यस्ते प्रक्षालिते पात्रे प्राङ्मुखो भोजनं चरेत् ॥ ११७३ ॥

आदित्याभिमुखो वेज्या प्रदेशाभिमुखोऽपि वा।
सौवर्णे राजते शुद्धे कांस्ये भुञ्जीत भाजने ॥ ११७४ ॥

जम्बूपनसकाञ्चीनां नालिकेरपलाशयोः।
कदल्या उहिनायाश्च पिशाचोदुम्बरस्य च ॥ ११७५ ॥

पद्माम्रयोश्च पत्रेषु भुञ्जीत दशसु द्विजः।
बल्लीपलाशस्थलजपद्मयोस्तिन्दुकस्य च ॥ ११७६ ॥

पत्रेष्वश्वत्थवटयोरर्कोदुम्बरयोरपि।
करेऽञ्जलौ च पाषाणे पर्णपृष्ठे च वाससि ॥ ११७७ ॥

कदलीगर्भपत्रे च न भुञ्जीतापि मृन्मये।
वर्जयेत् भोजनं पानं पात्रैर्देवस्य चायसैः ॥ ११७८ ॥

कृत्वाचमनमासीने भुक्तिस्थाने द्विजे सति।
कृतेऽभिवादने स्वस्मै पुनराचमनं चरेत् ॥ ११७९ ॥

आचामेत् भुक्तिशालायां यस्स स्यात् पङ्क्तिदूषतः।
मध्योह्नेऽपराह्णे वा भुञ्जीत दिवसे सकृत् ॥ ११८० ॥

सकृच्च मध्यरात्रात्प्राक् नान्तरा भोजनं चरेत् ।
विविक्त आवृते देशे भुञ्जीत न जनावृते ॥ ११८१॥

अनश्नद्भिः वीक्ष्यमाणः पङ्क्त्यां हीनजनेन च ।
स्वजनैरप्येकपङ्क्त्यां न भुञ्जीत कदाचन ॥ ११८२॥

प्रच्छन्नमेनः कस्य स्यादिति जानाति को भुवि ।
अग्निभस्मजलस्तम्भद्वारेष्वन्यतमं यदि ॥ ११८३॥

पङ्क्तिमध्ये स्थितं तत्र भिन्ना सा पङ्क्तिरुच्यते ।
निम्नोन्नतप्रदेशेन तथा पङ्क्तिर्विभज्यते ॥ ११८४॥

सौवर्णादिषु भिन्नेषु नाश्नीयात् भाजनेषु च ।
वर्जयेदासनं तालवटाश्वत्थपलाशजम् ॥ ११८५॥

चक्रादिलाञ्छितं भिन्नमुन्नतं तृणनिर्मितम् ।
तलाभ्यां पादयोर्भूमिं स्पृशन् पादतलेन वा ॥ ११८६॥

असंयुक्तौ च चरणौ आच्छाद्यान्येन वाससा ।
भुञ्जीतांकं भुवं पादपाणिभ्यां नाक्रमेत् क्रमात् ॥ ११८७॥

प्रणेवेनाभिमन्त्र्यान्नं गायत्र्या तदनन्तरम् ।
पवित्रमूलमन्त्राभ्यां द्वादशाक्षरमन्त्रतः ॥ ११८८॥

प्रोक्ष्यान्नमर्घ्यतोयेन कुर्याच्च परिषेचनम् ।
समस्ताभिर्व्याहृतिभिः सत्यंत्वर्तेति मन्त्रतः ॥ ११८९॥

परिषेचनयुग्मे समारभेत् वामपार्श्वतः ।
सपरीषेचोदकेन करेणान्नं न लङ्घयेत् ॥ ११९०

तर्जनीमध्यमाङ्गुष्ठैर्भोज्यपात्रं च संस्पृशन् ।
अमृतं सव्यहस्तस्य कुर्यादापोशनं ततः ॥ ११९१॥

देवस्य दत्तमर्घ्यं यत्तत्कुर्यात्परिषेचने ।
यत्पाद्यतोयं तेनैव कुर्यादापोशनद्वयम् ॥ ११९२॥

नाभिषेकोदकेनापोशनं कुर्यात् निषेधतः ।
पानेऽभिषेकाचमनपानीयाम्भः प्रकल्पयेत् ॥ ११९३ ॥

न पूर्वापोशनं कुर्यात् अप्रक्षालितपाणिना ।
प्रक्षाल्योद्धृय निर्लेह्य नोत्तरापोशनं चरेत् ॥ ११९४ ॥

वामभागेन गृह्णीयात् तोयमापोशनद्वये ।
न स्वहस्तेन निनयेत् न पुनः पूरयेदपि ॥ ११९५ ॥

सापोशनोदकेनान्नं न हस्तेन विलङ्घयेत् ।
आशिषं न वदेत् धृत्वा हस्तेनापोशनोदकम् ॥ ११९६ ॥

आज्याभिघारितं शुद्धं लवणक्षारवर्जितम् ।
मध्यमानामिकाङ्गुष्ठैरन्नं धात्रीफलोपमम् ॥ ११९७ ॥

अन्नं प्राग्दक्षिणाप्रत्यगुदङ्मध्येषु च क्रमात् ।
गृहीत्वा जुहुयात् प्राणे निविष्ट इति मन्त्रतः ॥ ११९८ ॥

आस्ये दन्तस्पर्शवर्जं निगरेच्च पृथक् पृथक् ।
पात्रस्पर्शं न कुर्याद्वा कुर्याद्वा तदनन्तरम् ॥ ११९९ ॥

अन्नोपदंशानयननिषेधार्थे वदेत् गृही ।
उपचारार्थवाचश्च वक्तव्याः सह भुञ्जताम् ॥ १२०० ॥

नान्यद्वचो वदेत् वर्णी यतिश्च तदपि त्यजेत् ।
आप्राणाहुति सर्वेषां काष्ठमौनमुदाहृतम् ॥ १२०१ ॥

पानीयं न पिबेत् पात्रैः शङ्खचक्रादिमुद्रितैः ।
भुजतां भोक्ष्यमाणानां यथाऽन्नं स्यात्तथा चरेत् ॥ १२०२ ॥

तावदेव ग्रसेत् ग्रासं यावदास्ये सुखं विशेत् ।
अभोज्यमन्नतोयं च भोजने वक्त्रनिस्सृतम् ॥ १२०३ ॥

हस्तस्थकबलार्धं च लवणं चाक्षिगोचरम् ।
पीतशेषं च चषके क्षीराज्ये लवणान्विते ॥ १२०४ ॥

खादितं नखलूनं च मूलपुष्पफलादिकम् ।
न मर्दयेत् पाणिनान्नं अकृत्वा परिषेचनम् ॥ १२०५ ॥

स्निग्धं दृष्टिप्रियं हृद्यं पथ्यं शुद्धं मितं लघु ।
शास्त्रानिषिद्धमुष्णं च प्राश्नीयादोदनादिकम् ॥ १२०६ ॥

भार्यादिभिश्च कलहं पुत्रादीनां च भर्त्सनम् ।
तेषामुच्छिष्टदानं च क्रोधमाक्रोशरोदने ॥ १२०७ ॥

ओदनव्यञ्जनादीनां दोषोक्तिं च विवर्जयेत् ।
अजीर्णे देवसदने तमस्यप्रावृतस्थले ॥ १२०८ ॥

हर्म्ये शून्यगृहे वापि संतिष्ठन्नन्यमानसः ।
आसनारूढपादो द्विरकृताचमनस्तथा ॥ १२०९ ॥

धृतोपानत्पादुकश्च नाद्यात् प्रावृतमस्तकः ।
विधवावर्णियंतयः कांस्यभाजनभोजनम् ॥ १२१० ॥

तैलाभ्यङ्गं च ताम्बूलं त्यजेयुरपि मैथुनम् ।
न भोजयेदतिथ्यादीन्यत्तद्भुञ्जीत न स्वयम् ॥ १२११ ॥

न पिबेत् बहु पानीयं न भुञ्जीतापिबन्नपि ।
पायसापोशनदधिक्षीरतैलाम्बुसर्पिषाम् ॥ १२१२ ॥

इतरेषां च न यथा शब्दः स्यात् प्राशयेत् तथा ।
निदध्यात् दक्षिणे पार्श्वे न वामे पानभाजनम् ॥ १२१३ ॥

भुक्तौ दक्षिणहस्तेन न पिबेत् सलिलादिकम् ।
भुक्तेरन्यत्र वामेन हस्तेनाञ्जलिनापि वा ॥ १२१४ ॥

चषकस्थं पीतशेषं न पिबेन्निहितं भुवि ।
ताम्रादिभाजनस्थं तु निस्स्राव्य प्रपिबेत् पुनः ॥ १२१५ ॥

ताम्रादिभाजनं शून्यं न पीत्वाम्भः परित्यजेत् ।
दधिक्षीराज्यसलिलसक्तुपायसवर्जितम् ॥ १२१६ ॥

सर्वं सशेषमश्नीयात् ओदनव्यञ्जनादिकम् ।
कबले कबले नित्यं कुर्वन् गोविन्दकीर्तनम् ॥ १२१७ ॥

योऽद्यात्सजीवन्मुक्तस्स्यात् अन्यथा तूदरं भरः ।
पूरयेदर्धमुदरमोदनव्यञ्जनादिभिः ॥ १२१८ ॥

पादं सलिलतक्राद्यैरुदरं पूरयेत् सदा ।
यत्र पर्वादितिथिषु निषिद्धं निशिभोजनम् ॥ १२१९ ॥

दिवैव पूर्णं तत्राद्यान्न कुर्यादतिभोजनम् ।
मरीचिसारसूपाद्यं प्रागद्यान्मधुरद्रवम् ॥ १२२० ॥

लवणाम्लयुतान्यद्यान्मध्ये तु कठिनानि च ।
कटुतिक्तयुतान्यन्ते दध्यादि च पुनर्द्रवम् ॥ १२२१ ॥

ततस्सलवणं तक्रं पिबेच्च सलिलं ततः ।
पानीयं न पिबेत् भुक्त्वा दध्यन्नन्तु सुखार्थिना ॥ १२२२ ॥

एवं यः कुरुते नित्यं दिवानक्तं च भोजनम् ।
अहन्यहनि वर्धेते तस्यारोग्यबले ध्रुवम् ॥ १२२३ ॥

भोजनाद्यन्तयोर्मूत्रं यस्त्यजेत् स सुखी भवेत् ।
एवं भुक्त्वा सनियमं भोजनान्ते समाहितः ॥ १२२४ ॥

वर्तुलस्य पवित्रस्य ततो विस्रस्य वेष्टनम् ।
धृत्वाऽनामिकया तच्च पाद्येन कमलापतेः ॥ १२२५ ॥

उत्तरापोशनं कुर्यात् अमृतेत्यनुवाकतः ।
अर्धं पीत्वाऽवशिष्टार्धमुदकं देवतीर्थतः ॥ १२२६ ॥

भुक्तिपात्रस्य निनयेदुत्तरे दक्षिणेऽपि वा ।
रौरवे पुण्यनिलये पद्मार्बुदनिवासिनाम् ॥ १२२७ ॥

अर्थिनामुदकं दत्तमक्षय्यमुपतिष्ठतु ।
निनीय मन्त्रेणैतेन पवित्रं मण्डले त्यजेत् ॥ १२२८ ॥

पात्रे परित्यजेत् तच्चेत् प्राजापत्यं समाचरेत् ।
स्नायात् सचेलं तत्पश्चात् भुक्तिपात्रं यदि स्पृशेत् ॥ १२२९ ॥

उत्तरापोशनात्पूर्वं भुक्तिस्थानात् तथोत्थितः ।
तत उत्थाय माषादिचूर्णैर्मृत्तिकयापि वा ॥ १२३० ॥

अद्भिश्च हस्तौ प्रक्षाल्य पादौ दन्तान् विशोध्य च ।
कुर्यात् षोडशगण्डूषानासीनो वामपार्श्वतः ॥ १२३१ ॥

गण्डूषकाले सलिलमास्यस्थमपिबन् सदा ।
समुद्धृते भुक्तिपात्रे स्थले तस्मिंश्च शोधिते ॥ १२३२ ॥

भुक्तं यदासनस्थेन तत्स्थ आचमनं चरेत् ।
त्यजेदाचमनादर्वाक् श्वशूद्रादिनिरीक्षणम् ॥ १२३३ ॥

प्राणानां ग्रन्थिरित्येतन्मन्त्रेण हृदयं ततः ।
अङ्गुष्ठमात्र इत्येतन्मन्त्रेणोर्ध्वाग्रपाणिना ॥ १२३४ ॥

सव्येतरपदाङ्गुष्ठे निनयेत् सलिलं ततः ।
ततः स्पृशेत् नाभिदेशं श्रद्धायामिति मन्त्रतः ॥ १२३५ ॥

पश्येत भास्करं पश्चात् हँसश्शुचिषदित्यृचा ।
रात्रौ तु दीपाभिमुखः पूर्ववन्मन्त्रमुच्चरेत् ॥ १२३६ ॥

भुक्त्वार्द्रपाणिपादस्तु न निर्गच्छेत् गृहात् बहिः ।
सूतिकापतितोदक्याग्रामशूकरकुक्कुटैः ॥ १२३७ ॥

भुक्तिमध्ये श्वशूद्राद्यैर्द्रष्टमन्नादिकं यदि ।
भोजनात् विरमेत् तांस्तु स्वयं पश्येत् तदा यदि ॥ १२३८ ॥

विरम्य भोजनात् स्नात्वा मानस्तोकेत्यृचं जपेत् ।
तान् दृष्ट्वा यदि भुञ्जीत वमित्वोपवसेदहः ॥ १२३९ ॥

वमनन्तु न कुर्यात् चेत् तदा तूपवसेत्त्र्यहम् ।
यदा न कुर्यात् वमनं जीर्णमन्नादिकं यदि ॥ १२४० ॥

कृत्वा विरेचनं पश्चात् पञ्चगव्यं पिबेदपि ।
पूर्वमाचमनात् भुक्तेः पश्चात् पश्येत्तु तान् यदि ॥ १२४१ ॥

स्नानं कृत्वा तदा मानस्तोकेत्येतामृचं जपेत् ।

भगवन्निवेदनार्हवस्तूनि

निवेदनार्हं देवस्य वस्तुजातमिहोच्यते ॥ १२४२ ॥

तत्स्मात् निवेदनानर्हं भोजने यन्निषिध्यते ।
निवेदनार्हं तज्ज्ञेयं यद्भोज्यत्वेन कीर्त्यते ॥ १२४३ ॥

प्रियङ्गु - शालि - नीवार - यव - षाष्टिक - वेणवः ।
राजमाष - महामाष - क्षुद्रमाष - मसूरकः ॥ १२४४ ॥

(प्रियङ्गु - ஞாழல், शालि - நெல்லு, नीवार - காளச்சநெல்லு, यव - யவை, षाष्टिक - கார் நெல்லு, वेणु - மூங்கிலரிசி, राजमाषादय :- அலசந்தி பேதங்கள், मसूरक - கடலை)

कुलुत्थ-माष-श्यामाका गोधूमो मुद्ग आढकी ।
राजादन-आम्र-पनस-वेत्र-खर्जूर-दाडिमाः ॥ १२४५ ॥

(कुलुत्थ - கொள்ளு, माष -உளுந்து, श्यामाक - சாமை, गोधूम- கோதுமை, मुद्ग - சிறுபயர் பேதங்கள், आढकी - துவரை, राजादन- பாலேப்பழம், आम्र - மாங்காய் முதலானவை, पनस - பலா, वेत्र பெரப்பம்பழம், खर्जूर - பேரீச்சை, दाडिमं -மாதுளை)

रम्भा-नारङ्ग-लिकुच-बदरी-मातुलुङ्गकाः ।
अलर्क-सिंहि-व्याघ्राश्च कारवल्ली पटोलिका ॥ १२४६ ॥

(रम्भा - ரஸ்தாளி முதலான வாழை பேதங்கள், नारङ्ग - நார்த்தை, लिकुच - எலுமிச்சை, बदरी - எலந்தை, मातुलुङ्गक - கொடி மாதுளை, अलर्क - தூதுவளை, सिंही - சிறுவழுதளை, व्याघ्री- கண்டம் கத்தாரி, कारवल्ली - பாகல், पटोलिका புடலங்காய்)

निष्पाव-उर्वारुक-अगस्त्य-कारवान्त-अभ्र-पप्पलाः ।
झरसी शतपर्वा च कुबेराक्षी च कर्करी ॥ १२४७ ॥

(निष्पाव - அவரை, उर्वारुक - வெள்ளரி, अगस्त्य - அகத்தியக் கீரை, कारवान्त - களாக்காய், अभ्र- அப்பக்கீரை, पप्पल பாவட்டைக் கீரை, झरसी - துராய், शतपर्वा - பரட்டைக்கீரை, कुबेराक्षी - கழக்கொடி, कर्करी- கக்கரி)

ऐक्षवं तिल्लकं पिण्डं कर्कंधूश्चक्रवर्तिका ।
कार्कोटको वज्रवल्ली भाञ्जी पिण्डकमार्द्रकम् ॥ १२४८ ॥

(ऐक्षवं - வெல்லம் முதலானவை, तिल्कं - செள்ளொலத்தி, पिण्ड - முன்னை, कर्कन्धु - துரி, चक्रवर्तिका - சக்ரவர்த்தி, कार्कोटक - பமுபாகல், वज्रवल्ली - பிரண்டை, भाञ्जी - முசுட்டை, पिण्डकं - காரை, आर्द्रकं - இஞ்சி)

मण्डूकपर्णी मत्स्याक्षी निर्लतापोदकी तथा ।
क्षुद्रकन्द-महाकन्द-वल्लीकन्दानि सूरणम् ॥ १२४९ ॥

(मण्डूकपर्णी - வல்லரை, मत्स्याक्षी - பொன்னுங்காணி, निर्लतोपोदकी -கொத்துவசனை, क्षुद्रकन्द - சிறுகிழங்கு, महाकन्द - பெருங்கிழங்கு, वल्लीकन्द - சிறுவள்ளி, செவ்வள்ளி, காய்வள்ளி, பெரும்வள்ளி, सूरणम् - கருணை)

एकमूलं च शकुटं जीरकं कालपत्रिका ।
मरीचिसर्षपौ श्वेतहिङ्गुभक्ष्यान्यमूनि तु ॥ १२५० ॥

(एकमूलं - மாவள்ளிக் கிழங்கு, शकूटं - சேம்பு, जीरकं - சீரஹம், कालपत्रिका - கரிவேப்பிலை, मरीचि - மிளகு, सर्षपं - கடுகு, श्वेतहिङ्गु - வெள்ளைப் பெருங்காயம்)

कालाश्रयनिमित्तैश्च क्रियासंसर्गजातिभिः ।
षड्भिर्दुष्टान्यभक्ष्याणि प्रोच्यन्तेऽत्र मया क्रमात् ॥ १२५१ ॥

कालदुष्टाभक्ष्याणि

त्रिवर्षाधीतधान्यानि मासातीतांश्च तण्डुलान् ।
मासातीतं च ताम्बूलं पक्षातीतं घृतं तथा ॥ १२५२ ॥

पक्षातीतेषु भाण्डेषु यत्पक्वं मृन्मयेषु तत् ।
पक्षातीतं मुद्गसारं तैलं च परिवर्जयेत् ॥ १२५३ ॥

त्यजेत् पक्वं रात्र्यतीतं यत्तत्पर्युषितं स्मृतम् ।

पर्युषितत्वदोषरहितानि वस्तूनि

पुनः पक्वस्य शाकस्य तद्रसस्य गुडस्य च ॥ १२५४ ॥

क्रमुकस्य हरिद्रायाः शोष्यस्य वटकस्य च ।
भर्जितस्य च चूर्णस्य मरीचेः फलमूलयो : ॥ १२५५ ॥

(शोष्यम् - வத்தல், वटकम् - வடாம், உளுந்து வடாம், भर्जितम् வருத்த அமுதுபடி, துவரை, பயா் முதலானவை, चूर्णम् - மூனாவது, मरीचि - மிளகு, फलं - நார்த்தங்காய் · கிச்சிலி முதலான ஊருகாய், मूलम् இஞ்சி, மாகாளிக்கிழங்கு முதலானவை)

देवाभिषिक्ततोयस्य क्षीरक्षीरविकारयोः ।
यवागुतण्डुलापूपपिष्टानां सक्तुसूपयोः ॥ १२५६ ॥

फाणितस्य करम्भस्य यवस्य पृथुकस्य च ।
पायसस्य गुडान्नस्य जले क्षिप्तोदनस्य च ॥ १२५७ ॥

(फाणितम् - வெல்லப்பாகு, करम्भम् - दधिसक्तुसमाहारम् । पृथुकम्- அவல், अपूपशब्दने तैलपक्वं सर्वं गृह्यते । अन्यत् स्पष्टम्)

तैलेनाज्येन दध्ना वा संयुक्तस्यौदनस्य च ।
एषां पर्युषितानां च दोषो नैवास्ति भक्षणे ॥ १२५८ ॥

यामातीतन्तु यत्पक्वं नाश्नीयात् विरसं यदि ।
तच्च प्रक्षालितं साज्यं सस्नेहं वा न दोषकृत् ॥ १२५९ ॥

प्रथमायां द्वितीयायां कूश्माण्डं बृहतीं क्रमात् ।
नाद्यात् तृतीयाषष्ट्योस्तु तरुणीमपि दाडिमम् ॥ १२६० ॥

तरुणी - கத்தாழை

अष्टम्यां च दशम्यां च नालिकेरं पटोलिकाम् ।
एकादशीत्रयोदश्योः निष्पावं च तिलान् क्रमात् ॥ १२६१ ॥

नाद्यादाम्लं चतुर्दश्यां पर्वणोः संक्रमेषु च ।
सप्तम्यां भानुवारे च नाद्यादामलकं तथा ॥ १२६२ ॥

कपित्थस्य फलं धाना नाद्यात् क्षीरं सदा दिवा ।
रात्रौ तु तिलसंबन्धि मुद्गसंबन्धि दध्यपि ॥ १२६३ ॥

सक्त्वार्द्रकतिलान् शाकतिक्तवस्तून्यपि त्यजेत् ।
अनिषिद्धान्यन्यकालेष्वेतानिति विदुर्बुधाः ॥ १२६४ ॥

कालदुष्टं भक्ष्यजातमुक्तमेवं यथाविधि ।
वस्तून्याश्रयदुष्टानि प्रोच्यन्तेऽत्र यथामति ॥ १२६५ ॥

आश्रयदुष्टानि

नालिकेराम्बु कांस्यस्थं ताम्रपात्रस्थितं मधु ।
गव्यं च ताम्रपात्रस्थमयःपात्रस्थितं जलम् ॥ १२६६ ॥

प्रसूतानां दशाहानि पयोजा महिषी गवाम् ।
रुद्रादिव्यपदेशिन्यस्तच्चिह्नैरङ्किताश्च याः ॥ १२६७ ॥

मृतवत्साऽन्यवत्सानामेककालदुहामपि ।
गर्भिणीनां गवादीनां प्रस्रवत्पयसामपि ॥ १२६८ ॥

यमलप्रसवानां च कामार्तानां तथा पयः ।
लशुनामेध्यभक्षाणां वहन्तीनां युगादिकम् ॥ १२६९ ॥

अनुज्ञा रहिता या गौः निक्षेपत्वेन कल्पिता ।
क्षीरं च विषलिप्तानामौष्ट्रमप्याविकं पयः ॥ १२७० ॥

स्त्रीक्षीरं च मृगक्षीरं क्षीरमैकशफं त्यजेत् ।
अन्येषां द्विस्तनानां च प्राणिनां न पिबेत् पयः ॥ १२७१ ॥

क्षीराणि यान्यपेयानि तद्विकारं च वर्जयेत् ।
यासां क्षीरं गवां त्याज्यं तासां मूत्रं शकृत् त्यजेत् ॥ १२७२ ॥

अजानुदघ्नं शूद्राणां तटाकादिषु यज्जलम् ।
तटाककूपभाण्डस्थमन्त्यानां क्षीरमम्बु च ॥ १२७३ ॥

उदक्यायतिपात्रस्थमन्नमम्बु यतेरपि ।
परपाकनिवृत्ताद्या ये स्युर्नाद्यात् तदोदनम् ॥ १२७४ ॥

परपाकनिवृत्तस्य परपाकरतस्य च ।
अपचस्यापविद्धस्य कुक्कुटस्यारवुकस्य च ॥ १२७५ ॥

बकस्य धर्मध्वजिनो मार्जारस्याधिजीविनः ।
अन्नं माहिषिकस्यापि कुणिनश्चाणकस्य च ॥ १२७६ ॥

षण्डस्य व्रात्यवृषलीपत्योः पातकिनामपि ।
शाखारण्डस्य वृषलब्रह्मघ्नानां तथौदनम् ॥ १२७७ ॥

नग्नस्य म्लेच्छचण्डालकृतघ्नानां पशोरपि ।
पाषण्डदेवलकयोरन्नं वार्धुषिकस्य च ॥ १२७८ ॥

यन्नामधारकस्यान्नं तथा विप्रब्रुवस्य च ।
नाद्यादन्नं भ्रूणहणः एषां लक्षणमुच्यते ॥ १२७९ ॥

परपाकनिवृत्तः स्यात् पञ्चयज्ञविवर्जितः ।
योऽद्यात् परान्नं सततं त्यक्त्वा पञ्च महामखान् ॥ १२८० ॥

परपाकरतस्सस्स्यात् दानहीनोऽपचः स्मृतः ।
तिरस्कृतो महद्भिर्यः सोऽपविद्धः प्रकीर्तितः ॥ १२८१ ॥

सभायां व्यवहारे यः पक्षपाती स कुक्कुटः ।
आखुः स्यात् विभवे लोभात् दानधर्मविवर्जितः ॥ १२८२ ॥

मिथ्याविनीतो योऽदृष्टिः बकः स्यात् स्वार्थतत्परः ।
डम्भार्थं जपहोमादिकर्ता धर्मध्वजी सदा ॥ १२८३ ॥

प्रतिग्रहार्थं सर्वत्र नित्यं भ्रमणतत्परः ।
हिंसकश्छद्मिको लुब्धः स मार्जारः प्रकीर्तितः ॥ १२८४ ॥

स्वगृहे वासयित्वा ऽन्यं भृतिं गृह्णाति यस्ततः ।
प्रत्यब्दं प्रतिमासं वा स भवेदाधिजीवनः ॥ १२८५ ॥

क्षमते व्यभिचारं यः पत्न्या माहिषिकस्तु सः ।
कुणिः स्यात् हस्तविकलो विद्याग्राह्यणकस्सुतात् ॥ १२८६ ॥

जपहोमादिकर्माणि श्राद्धानि च सुरार्चनम् ।
अकाले यस्सदा कुर्यात् स षण्डः परिकीर्तितः ॥ १२८७ ॥

जातकर्मादिसंस्कारहीनो व्रात्य उदाहृतः ।
वन्ध्या मृतप्रजा शूद्रा यानूढैव रजस्वला ॥ १२८८ ॥

एता वृषल्यस्स्युस्तासां पतिः स्यात् वृषलीपतिः ।
सखिभार्यां राजपत्नीं चण्डालीं स्वसुतामपि ॥ १२८९ ॥

सगोत्रां योनिसंबन्धां भार्याया भगिनीमपि ।
स्नुषां च येऽभिगच्छेयुः ते तु पातकिनः स्मृताः ॥ १२९० ॥

यः स्वशाखां परित्यज्य पारक्यामधिगच्छति ।
शाखारण्डः स विज्ञेयः सर्वकर्मबहिष्कृतः ॥ १२९१ ॥

वैश्वदेवातिथ्यहीनस्सन्ध्यौपासनवर्जितः ।
वेदाध्ययनहीनश्च वृषलः परिकीर्तितः ॥ १२९२ ॥

स्नेहद्रव्यप्राणिधर्मविक्रेता ब्रह्महा स्मृतः ।
वर्णाश्रमाचारहीनो वेदाध्ययनवर्जितः ॥ १२९३ ॥

नग्नः स्यात् कृष्णमलिनरक्तभुग्नपटस्तथा ।
वापीकूपतटाकानां भेत्ता देवालयस्य च ॥ १२९४ ॥

देवद्विजापवादी यो म्लेच्छविप्रः स ईरितः ।
परदारपरद्रव्यपरहिंसापरायणः ॥ २९५ ॥

निर्दयो निष्ठुरः क्रूरः चण्डालद्विज ईरितः ।
कृतोपकारविस्मर्ता कृतघ्नोऽत्यन्तनिन्दितः ॥ २९६ ॥

गम्यागम्याकृत्यकृत्यज्ञानशून्यः पशुः स्मृतः ।
जटाभस्मास्थिरुद्राक्षलिङ्गपाषाणधारिणः ॥ २९७ ॥

समत्वेन विरिञ्चाद्यैर्मन्यमानाः श्रियः पतिम् ।
स्वधर्मत्यागिनो ये च सर्वे पाषण्डिनः स्मृताः ॥ २९८ ॥

वत्सरत्रयमर्थार्थं यः पूजयति देवताम् ।
विना नारायणं देवं स हि देवलकः स्मृतः ॥ २९९ ॥

सःस्यात् वार्धुषिको वृद्ध्या योऽनापद्युपजीवति ।
अध्यापनं वाऽध्ययनं शक्तस्सन्न करोति यः ॥ ३०० ॥

संस्कारैः संस्कृतो वापि स हि वै ब्राह्मणब्रुवः ।
वेदाध्ययनहीनो यः स विप्रो नामधारकः ॥ १३००A॥

संस्कारैः संस्कृतो वापि स हि वै ब्राह्मणब्रुवः
वेदाध्ययनहीनो यः स विप्रो नामधारकः ॥ १३००B ॥

सन्ध्यावन्दनगायत्रीमात्रसारश्च कर्षकः ।
साङ्गवेदाध्यापयिता भ्रूण इत्युच्यते बुधैः ॥ १३००C ॥

तद्धन्ता गर्भहन्ता च भ्रूणहा परिकीर्तितः ।
परपाकनिवृत्ताद्या अभोज्यान्नाः प्रकीर्तिताः ॥ १३००D ॥

नाश्नीयादन्नमेतेषां नास्तिकस्य शठस्य च ।
राजश्रितस्य द्विषतःशूद्रभृत्यस्य वैरिणः ॥ १३००E ॥

निर्मर्यादस्य मूर्खस्य गृहदाहकरस्य च ।
पत्नीभैषज्यवाणिज्यविषशस्त्रोपजीविनाम् ॥ १३००F ॥

स्तेनाभिशस्तपतितमद्यपग्रामयाजिनाम् ।
अयाज्ययाजिनश्चापि चारस्य बहुयाजिनः ॥ १३००G ॥

रससोमायुधविषकन्याविक्रयिणामपि ।
अन्नतण्डुलगोवेदधर्मविक्रयिणामपि ॥ १३००H ॥

बहूनामुपनेतुश्च बिम्बप्रस्थापकादपि ।
विषप्रदातुर्गणकडाम्बिकोच्छिष्टभोजिनाम् ॥ १३००I ॥

पित्रा विवदमानस्य प्राणिहिंसारतस्य च ।
परदूषणपैशुन्यमिथ्यापारुष्यवादिनाम् ॥ १३००J ॥

उन्मत्तस्य च मत्तस्य रुद्धस्य निगलादिना ।
तावत्कालं तथा चोपविष्टप्रत्युपविष्टयोः ॥ १३००K ॥

स्त्रीजितस्य गणस्यापि श्राद्धार्थं याचकस्य च ।
परार्थं तिलहोतुश्च भृतकाध्यायिकुष्ठिनोः ॥ १३०१ ॥

गायकस्य दुराचारस्त्रीजितश्वित्रिणामपि ।
स्वैरिण्या विधावायाश्च नाश्नीयादोदनं द्विजः ॥ १३०२ ॥

एवमाश्रयदुष्टानि प्रोक्तान्यन्यानि वै मया ।
निमित्तदुष्टान्यन्यानि प्रोच्यन्तेऽत्र यथामति ॥ १३०३ ॥

शूद्रस्य भुक्तोच्छिष्टं यदन्नं तस्यापि तण्डुलम् ।
तेन दुष्टं च संस्पृष्टं शूद्रान्नं स्यात् चतुर्विधम् ॥ १३०४ ॥

शूद्रस्यान्नं विप्रदत्तं शूद्रदत्तं द्विजौदनम् ।
नाश्नीयात् दीक्षितस्यान्नं सोमविक्रयतः पुरा ॥ १३०५ ॥

अग्नीषोमीयदिवसात् पूर्वमित्यन्य ऊचिरे ।
अभोज्यं स्यात् वपाहोमात्पूर्वमित्यपरे विदुः ॥ १३०६ ॥

यज्ञार्थं यत्तु निर्दिष्टं तत्त्याज्यमिति केचन ।
पाकभाण्डस्थमन्नादि कृत्वा पात्रान्तरे ततः ॥ १३०७ ॥

पात्रान्तरे तन्निक्षिप्य सर्वान्नव्यञ्जनादिकम् ।
दद्यादुदक्या शूद्रेभ्यः तच्छेषं परिवर्जयेत् ॥ १३०८॥

न दुष्टं पाकभाण्डस्थमोदनव्यञ्जनादिकम् ।
अभोज्यान्नैरेकपङ्क्त्यां तैस्स्पृष्टमपि वीक्षितम् ॥ १३०९ ॥

श्वसूकराखुमार्जारवायसैर्नकुलेन वा ।
संस्पृष्टमपि गोघ्रातं पादस्पृष्टं च लङ्घितम् ॥ १३१० ॥

उदक्यादिसमीपस्थमुच्छिष्टं विचिकित्सितम् ।
वस्त्रानीतं च शुक्तं च दत्तमश्रद्धयापि यत् ॥ १३११ ॥

आयान्तु भोक्तुकामाश्चेत्युक्त्वाऽन्नं यच्च दीयते ।
वैधवेय व्रात्य मूर्ख भुङ्क्ष्वेत्युक्त्वा ददाति यत् ॥ १३१२ ॥

अश्रद्धयाऽनादरेण यद्दत्तं तच्च वर्जयेत् ।
नाद्यादापोशनात्पूर्वं अन्नं हस्तेन मर्दितम् ॥ १३१३ ॥

निवेदितं शिवादीश्रीपतेरनिवेदितम् ।
तैलेक्षुयन्त्रभ्रमणग्राव्णां पतितशूद्रयोः ॥ १३१४ ॥

रजस्वलामुसलयोर्यावद्भवति निस्स्वनः ।
तावत्कालं न भुञ्जीत न स्पृशेत् भोजने मिथः ॥ १३१५ ॥

भगिन्या भार्यया मात्रा स्त्रीभिरन्याभिरेव वा।
एकपङ्क्त्यां न भुञ्जीत न पश्येत् पतितादिकान् ॥ १३१६ ॥

यतिना प्रेषितं नाद्यादन्नं शूद्रादिभिस्तथा।
प्राणाहुतेः पूर्वमन्ने घृतेनानभिघारिते ॥ १३१७ ॥

यद्युच्छिष्टे दत्तमाज्यं तदन्नं परिवर्जयेत्।
प्रदीपाभ्यङ्गशिष्टं यन्नाद्यात् तैलघृतादिकम् ॥ १३१८ ॥

भोजने दीपनाशश्चेत् विवस्वन्तं तदा स्मरन्।
पात्रमादाय हस्ताभ्यां नाद्यादादीपदर्शनात् ॥ १३१९ ॥

अद्यात् पात्रस्थमेवान्नं दीपे प्रज्वलिते पुनः।
नाद्यात् शेषं च दंपत्योः श्राद्धशेषं विशेषतः ॥ १३२० ॥

सूतकान्नं तथा चान्तः शावे च श्राद्धभोजनम्।
उपरागे च यच्छेषं पक्वं सर्वं विवर्जयेत् ॥ १३२१ ॥

दर्भच्छन्नं चन्द्रसूर्यग्रहणे तक्रसर्पिषी।
पाथेयं पायसं तोयं ग्राह्याणि स्युर्न संशयः ॥ १३२२ ॥

सूर्येन्द्वोर्ग्रहणे पूर्वं क्रमान्नाद्यात् दिवा निशि।
तयोर्ग्रस्तास्तयोर्नाद्यात् द्विकालं पूर्वपश्चिमम् ॥ १३२३ ॥

तयोरुदितयोस्स्नात्वा भुञ्जीतादर्शनेऽपि वा।
यामे द्वितीये चन्द्रस्य ग्रहणं स्यात् यदा तदा ॥ १३२४ ॥

मध्याह्नात्पूर्वमश्नीयात् प्रथमे प्रथमे यदि।
बालवृद्धातुराणां तु पूर्वयामे न भोजनम् ॥ १३२५ ॥

एकादश्यामहोरात्रं नाश्नीयात्पक्षयोर्द्वयोः।
तैलपक्वमपक्वं च दर्व्या दत्तं न भक्षयेत् ॥ १३२६ ॥

अन्नव्यञ्जनपानीयदधिक्षीरघृतादिकम्।
हस्तेन दत्तं नाश्नीयात् पात्रपर्णादिकं विना ॥ १३२७ ॥

एकहस्तेन हस्ते वा दत्तं सर्वं न भक्षयेत् ।
नाद्यादमेध्यजातानां पत्रपुष्पफलादिकम् ॥ १३२८ ॥
शाकिनीशकुटादीनां वृक्षाणां तु न दोषकृत् ।
शाकादि नाद्यादज्ञातं लवणं चाक्षिगोचरम् ॥ १३२९ ॥
एकेन यद्येकपङ्क्त्यां उत्तरापोशनं कृतम् ।
तत्पङ्क्त्यामितरो नाद्यात् स च भोजनकण्टकः ॥ १३३० ॥
निमित्तदुष्टमित्युक्तं भक्ष्यजातं मयाऽधुना ।
अतः परं क्रियादुष्टमुच्यते च यथामति ॥ १३३१ ॥

क्रियादुष्टानि

अग्निं विनोष्णपक्वं यत्तन्नाद्यादघृतान्वितम् ।
अपक्वमतिपक्वं च पुनः पक्वं च भिस्सटाम् ॥ १३३२ ॥
माधवार्थं विनाऽन्यार्थं पक्वमात्मार्थमेव वा ।
सकेशविधिना पक्वं पक्वमाचारवर्जितैः ॥ १३३३ ॥
यदृतुस्नातया पक्वमवतार्यावतार्य यत् ।
अस्नाताशुचिभिः पक्वं पक्वं चागलिताम्बुभिः ॥ १३३४ ॥
पञ्चसंस्कारहीनेन जनेनावैष्णवेन च ।
पक्वमक्षतयोन्या यदग्निं संशाम्य शाम्य च ॥ १३३५ ॥
प्रागुदग्व्यतिरिक्तान्यदिङ्मुखेन च पाचितम् ।
तक्रान्नवर्जं निस्सारं करनिर्मथितं दधि ॥ १३३६ ॥
शाकतण्डुलसूपाद्यं पक्वमक्षालितं तथा ।
मुखेन धमितं चान्यहस्तेन च विमर्दितम् ॥ १३३७ ॥
अवस्त्रपूतं सलिलं क्रियादुष्टान्यमूनि च ।
संसर्गदुष्टान्युच्यन्ते भक्ष्यजातान्यथो मया ॥ १३३८ ॥

संसर्गदुष्टानि

तन्तुमांसामेध्यकीटकण्टकास्थिनखान्वितम् ।
परित्यजेदोदनाद्यं कृमिकेशयुतं तु चेत् ॥ १३३९ ॥

अन्नाद्यं तत्तदुद्धृत्य तत्र निक्षिप्य चोदकम् ।
अश्नीयादाज्ययुक्तं वा सह पाकं तु संत्यजेत् ॥ १३४० ॥

घृतक्षीरं च लवणसंयुक्तं परिवर्जयेत् ।
पायसापूपसूपेषु न दोषो व्यञ्जनेषु च ॥ १३४१ ॥

मार्जारेण च बालेन स्पृष्टमन्नादिकं यदि ।
सदर्भतिलतोयेन प्रोक्षणादेव शुध्यति ॥ १३४२ ॥

जातिदुष्टानि

जातिदुष्टानि वक्ष्यन्ते मयाऽ भक्ष्याण्यतः परम् ।
अश्वत्थोदुम्बरप्लक्षबिल्वन्यग्रोधतिन्दुकान् ॥ १३४३ ॥

मधूकशिग्रूकालिङ्गतालश्लेष्मातकानपि ।
वंशाङ्कुरं कदम्बं च करञ्जं कतकं त्यजेत् ॥ १३४४ ॥

(मधूकम् - இலுப்பை, शिग्रू -முருங்கை, कालिङ्ग - தாநறி, ताल - பனை, श्लेष्मातक - நறாவலி, वंशाङ्कुर - மூங்கில் குருத்து, कदम्ब - கடம்பு, करञ्ज - புங்கா, कतकதேத்தாங் கொட்டை)

तिलमाषौ विना कृष्णधान्यान्युद्दालकोद्रवान् ।
क्षुद्रधान्यानि सर्वाणि कुसुम्भालाबुनालिकाः ॥ १३४५ ॥

(उद्दाल - சோளம், कोद्रव - வரகு, कुसुम्भ குசும்பை, अलाबु சொரக்காய், नालिक- சிருகாஞ்ஜோரி)

बिम्बं लतोपोदकिं च कलञ्जं सुनिषण्णकम् ।
आरग्वधं च निर्गुण्डीं वार्ताकं रक्तशाकिनीम् ॥ १३४६ ॥

(कलञ्ज - கஞ்ஜா, सुनिषण्णम् - ஆரை, —आरग्वधम् - கொந்னை, निर्गुण्डी நொச்சில் , वार्ताकम् -வெண் கத்தாரி)

कोशातकीं तण्डुलीयं द्रोणं तिक्तपटोलिकाम् ।
नीलीबीजानि निर्यासं कोविदारं च शाल्मलीम् ॥ १३४७ ॥

(कोशातकी - பீர்க்கங்காய், तण्डुलीय - சிறுகீரை, द्रोणं தும்பை, नीली बीजानि - அவிரி வரை, तिक्तपटोलिका- வேய்பிலை)

छत्राकं शणशाकं च लशुनं सूरणद्वयम् ।
श्रृङ्गाटकं मूलकं च त्र्युत्पलं कुमुदद्वयम् ॥ १३४८ ॥

(छत्राकं - காளான், सूरकद्वयम् காட்டுக்கரணைகம்மணம் தாள், श्रृङ्गाटक கொட்டிக் கிழங்கு, मूलक - முள்ளங்கி, त्र्युत्पलम् காரிசல் கல்லி,செவ்வல்லி, कुमुदद्वयम् இரண்டாம்பல்)

आरनालं च मृद्भस्ममलमूत्रसुरास्त्यजेत् ।
अभक्ष्यजातमित्युक्तं षड्भिः कालादिभिः क्रमात् ॥ १३४९ ॥

आरनालम्- காடி, பிளிக்கவைத்த சாத்தீர்த்தம்,

दुष्टमस्त्यन्यदप्यत्र तस्यान्तर्भाव एव हि ।

इति इज्याविधिः

स्वाध्यायविधिः

इज्यां समाप्य स्वाध्यायं संकल्प्य तदनन्तरम् ॥ १३५० ॥

अष्टाक्षरादिमन्त्राणां यथाशक्ति जपं चरेत् ।
श्रीमद्रामायणं पुण्यं पठेद्वा श्रृणुयाच्च वा ॥ १३५१ ॥

भारतं च पुराणानि सात्विकानि समभ्यसेत् ।
वेदाभ्यासं शास्त्रपाठं व्याख्यानं ग्रन्थलेखनम् ॥ १३५२ ॥

सात्त्विकग्रन्थनिर्माणं शिष्याणामपि बोधनम् ।
यथाधिकारं सर्वं वा कुर्यादेकैकमेव वा ॥ १३५३ ॥

कुर्यादवन्ध्यं स्वाध्यायं कालं केनापि कर्मणा ।
काव्यं न कीर्तयेत् यत्र न सन्ति भगवद्गुणाः ॥ १३५४ ॥

गानेन तोषयेत् श्रीशं गानविद्याविशारदः ।
स्वाभीष्टदेवताध्यानात्कंचित्कालं नयेत् द्विजः ॥ १३५५ ॥

श्रीरामचन्द्रसदृशं नास्ति नास्ति हि दैवतम् ।
कपिराक्षसयोर्येन दत्तं राज्यं सुदुर्लभम् ॥ १३५६ ॥

शबरीगृध्रयोर्येन सर्वेषां प्राणिना मपि ।
पुण्यलोकः प्रदत्तश्च योगिनामपि दुर्लभः ॥ १३५७ ॥

तस्माद्दयानिधेः कोऽन्यः सर्वाभीष्टफलप्रदः ।
उद्घुष्टं सकृदेवेति विना रामेण केन वा ॥ १३५८ ॥

तस्मात् त्यक्त्वाऽखिलान् देवानन्वहं चानुतापिनः ।
श्रीरामचन्द्रं शरणं भजध्वं सुधियो जनाः ॥ १३५९ ॥

तस्यैव चरितं नित्यं पठत श्रृणुतापि वा ।
एकैकमक्षरं वक्तुर्महापातकनाशनम् ॥ १३६० ॥

श्रीमद्रामायणादन्यदस्ति चेद्ब्रूत भो जनाः ।
रामेति वर्णद्वितयं विना किं मोक्षदं कलौ ॥ १३६१ ॥

यत्कीर्तनेन व्याधोऽपि मुनीनामुत्तमोऽभवत् ।
श्रीमद्रामायणं श्रीमद्रामनाम च भो जनाः ॥ १३६२ ॥

श्रीमद्रामायणस्य ऋषिछन्दोदेवतादयः

श्रीमद्रामायणस्यर्षिर्वाल्मीकिर्भगवान् स्मृतः ।
स्मृतानि नानाछन्दांसि देवता जानकीपतिः ॥ १३६३ ॥

श्लोकेन धर्मात्मेत्येवं पञ्चाङ्गन्यासमाचरेत् ।
सहस्रादित्यसंकाशं सर्वशत्रुनिबर्हणम् ॥ १३६४ ॥

रामशक्तिमयं ध्यायेत् अमोघं रामसायकम् ।
ध्यात्वा जपेत् श्लोकमेतं धर्मात्मेति द्विपञ्चधा ॥ १३६५ ॥

स्वपुत्राभ्यां स्वप्रबन्धं श्रृण्वन्तं सीतया सह ।
महर्षिभिर्भ्रातृभिश्च सभायां ब्राह्मणादिभिः ॥ १३६६ ॥

ध्यात्वा रघुपतिं सम्यक् पारायणमथाचरेत् ।
सकामो भोजनात्पूर्वं निष्कामो भोजनात्परम् ॥ १३६७ ॥

वक्ता प्राङ्मुख आसीत श्रोता तिष्ठेदुदङ्मुखः ।
अवन्ध्यं दिवसं कुर्यात् वक्ता श्रोता च नित्यदा ॥ १३६८ ॥

आरम्भेऽस्यावतारे श्रीरामादीनां महोत्सवम् ।
सीताकल्याणसमये सीतारामस्य पूजनम् ॥ १३६९ ॥
ब्राह्मणानां भोजनं च श्रोता भक्त्या समाचरेत् ।
पट्टाभिषेकसमये विशेषेण महोत्सवम् ॥ १३७० ॥
कुर्यात् संपूजयेत् श्रोता वक्तारं भक्तिसंयुतः ।
कुण्डलाभ्यामङ्गुलीयैर्गन्धमाल्याम्बरादिभिः ॥ १३७१ ॥
प्रणिपत्य च साष्टाङ्गं श्रोता वक्तारमन्वहम् ।
शृणुयादाशिषस्सर्वास्संप्राप्य भुवि दुर्लभाः ॥ १३७२ ॥
पुत्रपौत्रादिसहितः प्राप्नुयात्परमं पदम् ।
प्रातर्द्यूतप्रसङ्गेन मध्याह्ने स्त्रीप्रसङ्गतः ॥ १३७३ ॥
रात्रौ चोरप्रसङ्गेन विटवत्कालमानयेत् ।
(द्यूतप्रसङ्गेन - श्रीमहाभारतपठनश्रवणादिना । स्त्रीप्रसङ्गेन- श्रीरामायणपठनश्रवणादिना । चोरप्रसङ्गेन - श्रीभागवतपठनश्रवणादिना ।)
प्राभातिकेऽभिगमने नित्यं श्रीमितगद्यतः ॥ १३७४ ॥
इज्याकाले जानकीशं तोषयेत्पृथुगद्यतः
स्वाध्यायकालेऽप्याचार्यप्रोक्तश्रीरामगद्यतः ॥ १३७५ ॥
योगकाले तु वैकुण्ठगद्यतस्तोषयेत् हरिम् ।
भुक्तेः परमनायासप्रदं कार्यं समाचरेत् ॥ १३७६ ॥

ताम्बूलचर्वणम्

ससुपत्रं सुष्ठु पूगं सचूर्णजलशोधितम् ।
दद्यात् द्विजेभ्यः क्रमुकद्वितयं न प्रशस्यते ॥ १३७७ ॥
अखण्डितं च क्रमुकं पत्राण्यक्षालितानि च ।
नाद्याददत्वा वदने पत्रं पूगं न खादयेत् ॥ १३७८ ॥
चूर्णपर्णं च पर्णाग्रं मूलपार्श्वसिरास्त्यजेत् ।

सायं सन्ध्याविधिः

सायं सन्ध्यां ततः कुर्यात् रवेर्द्रष्टार्धमण्डले ॥ १३७९ ॥

कुर्यात् ग्रामाद्बहिस्सन्ध्यात्रयं सायं विशेषतः ।
प्रक्षाल्य पादौ पाणी च स्वाचान्तोऽसून्नियम्य च ॥ १३८० ॥

सायं सन्ध्यामुपासिष्ये इति संकल्पपूर्वकम् ।
आपो हिष्ठादिभिर्मन्त्रैः पूर्ववत्प्रोक्षणं चरेत् ॥ १३८१ ॥

अग्निश्चेत्यनुवाकस्य सवितर्षिरुदाहृतः ।
गायत्रीछन्द इत्युक्तं देवता च हुताशनः ॥ १३८२ ॥

पीत्वाऽग्निश्चेत्यपः पश्चात् दधिक्राव्ण इत्यृचा ।
प्रोक्षणादीनि सर्वाणि प्रातः कालवदाचरेत् ॥ १३८३ ॥

संस्तीर्य दर्भान् प्रागग्रान् तेष्वासीनस्समाहितः ।
सायं प्रतीचीपवनदिङ्मध्याभिमुखो जपेत् ॥ १३८४ ॥

हस्तावधोमुखौ नाभिसमौ कृत्वार्क्षदर्शनात् ।

प्रदोषादिषु जपसङ्कोचः

प्रदोषादिषु गायत्रीजपसङ्कोच ईरितः ॥ १३८५ ॥

अष्टाक्षरस्यापि तथा विषुवायनयोरपि ।
त्रयोदश्यां प्रदोषश्चेत् साष्टकां विंशतिं जपेत् ॥ १३८६ ॥

प्रतिपत्पर्वदर्शेषु त्रिंशतं च षडुत्तराम् ।
प्रदोषो यदि सप्तम्यां त्रिंशत्सप्ताधिका स्मृता ॥ १३८७ ॥

चतुर्थ्यामप्यनध्यायेष्वर्धमष्टोत्तरात् शतात् ।
अनग्निस्सन्ध्ययोर्नित्यं मौनी ग्रामाद्बहिर्वसेत् ॥ १३८८ ॥

त्रयोदशीप्रदोषे स्युर्मौनिनस्सर्व एव हि ।
मुहूर्तद्वयमस्नोन्ते रात्रौ पूर्वार्धमेव च ॥ १३८९ ॥

जपित्वोद्वास्य गायत्रीं नक्षत्रेषूदितेष्वथ ।
कुर्यात् तिष्ठन्नुपस्थानमिममित्यादि मन्त्रतः ॥ १३९० ॥

इममित्यादिमन्त्राणां देवरात ऋषिस्स्मृतः ।
क्रमेण गायत्रीत्रिष्टुप् गायत्री जगती तथा ॥ १३९१ ॥

त्रिष्टुप् चोक्तानि छन्दांसि वरुणो देवता स्मृतः ।
इमं मे वरुणेत्याद्यैरुपस्थाय तु पञ्चभिः ॥ १३९२ ॥

मन्त्रैस्सन्ध्याद्युपस्थानं प्रतीच्यादि च पूर्ववत् ।

सायं सन्ध्यानन्तरकृत्यानि

ततो गत्वा गृहं प्रातः कालवद्धोममाचरेत् ॥ १३९३ ॥

विशेषोत्राग्नये स्वाहेत्याहुतिः प्रथमा स्मृता ।
कालयोस्समिदाधाने भेदो न ब्रह्मचारिणाम् ॥ १३९४ ॥

देवताराधनं कुर्यात् नैवेद्यं च सदा निशि ।
नित्यं पश्येत् प्रभुं श्रीशं विमानं वास्य गोपुरम् ॥ १३९५ ॥

विमानस्थं न प्रदोषे नार्धरात्रे स्ववेश्मनि ।
आस्थानमण्डपे वीथ्यां सर्वदालोकयेद्धरिम् ॥ १३९६ ॥

गच्छेन्नोत्सवसेवार्थं दिव्यस्थानं वनात् गृही ।
आचरन्नित्यकर्माणि गृह एव वसेत् गृही ॥ १३९७ ॥

नित्यकर्माविरोधेन गच्छेद्वा दर्शनोत्सुकः ।
न गच्छेत् यत्र मार्गे स्यात् विलोपो नित्यकर्मणाम् ॥ १३९८ ॥

दिव्यस्थाने वसेद्वापि तत्र पापानि नाचरेत् ।
कृतानि यदि पापानि पुण्यक्षेत्रे विजानता ॥ १३९९ ॥

गत्वा वाराणसीं तत्र प्रायश्चित्तं समाचरेत् ।
रात्रावपि सदा वैश्वदेवं च बलिकर्म च ॥ १४०० ॥

विना पञ्च महायज्ञानतिथीनपि पूजयेत् ।
रात्रौ विशेषादतिथीन् यथाशक्त्यभिपूजयेत् ॥ १४०१ ॥

पथ्यं मितं च भुञ्जीत रात्रौ हरिनिवेदितम् ।
मन्त्रेणर्तं त्वा सत्येन भेदोऽस्ति परिषेचने ॥ १४०२ ॥

यस्मिन् दिने तु श्राद्धं स्यात् तत्पूर्वेद्युश्च पर्वणि ।
प्रत्याब्दिकस्य चान्येद्युः श्राद्धपारणवासरे ॥ १४०३ ॥

स्थालीपाकस्य पूर्वेद्युर्न कुर्याद्रात्रिभोजनम् ।
फलमूलपयोऽपूपभक्ष्याणामपि भक्षणे ॥ १४०४ ॥

पुनर्भोजनदोषस्स्यात् न वृद्धाशक्तरोगिणाम् ।
भोजनं मैथुनं निद्रां स्वाध्यायमपि सन्ध्ययोः ॥ १४०५ ॥

न कुर्वीत निशायान्तु यामादूर्ध्वं च भोजनम् ।
प्राणाग्निहोत्रमन्त्रांस्तु विलुप्ते भोजने जपेत् ॥ १४०६ ॥

मध्ययामद्वये नक्तं न वेदाध्ययनं चरेत् ।
न सिञ्चयेत् गोमयाम्बुभ्यां गृहं नक्तं न चाहरेत् ॥ १४०७ ॥

उभे ते समिधं चापि गोमूत्रं तु न सन्ध्ययोः ।
उच्चैस्संभाषणं नक्तं विवादमपि नाचरेत् ॥ १४०८ ॥

अदण्डश्चासहायश्च त्रियामायां न संचरेत् ।
अध्वानं वृक्षमूलं च शून्यालयमरेर्गृहम् ॥ १४०९ ॥

नदीतटाककूलं च न विशेदञ्जसा निशि ।
क्षीरधान्यौषधीरग्निमथो बीजानि वारि च ॥ १४१० ॥

यत्किंचिद्द्रव्यमादाय नक्तं दद्यान्न केवलम् ।
न खण्डयेत् स्त्री कूश्माण्डं दीपं न शमयेत्पुमान् ॥ १४११ ॥

नक्तं शयानं स्वगृहे शक्तितः पूजयेत् गृही ।
शयितश्चेदनभ्रंस्तु गृहस्थो दोषभाग्भवेत् ॥ १४१२ ॥

भोजनानन्तरं नक्तं स्वाध्यायं किंचिदाचरेत् ।
यावद्भुक्त्वार्द्रपाणिस्स्यात् तावन्नाध्ययनं चरेत् ॥ १४१३ ॥

योगविधिः

ततस्समाप्य स्वाध्यायं योगं संकल्प्य तं चरेत् ।
यथाप्रज्ञं तत्प्रकारस्संग्रहेणोच्यतेऽधुना ॥ १४१४ ॥

योगस्याङ्गानि सन्त्यष्टौ यमः प्राङ्नियमस्ततः ।
आसनं चासु यामश्च प्रत्याहारश्च धारणा ॥ १४१५ ॥

ध्यानं समाधिरेतेषामुच्यन्ते लक्षणानि च ।

ब्रह्मचर्यमहिंसा च सत्यं क्रोधापरिग्रहः ॥ १४१६ ॥

एते यमास्स्युस्सन्तोषश्शौचं मन्त्रजपस्तथा ।
स्वाध्यायस्त्वपि चास्तिक्यं नियमाः परिकीर्तिताः ॥ १४१७ ॥

उपलिप्ते शुचौ गुप्ते दर्भानास्तीर्य भूतले ।
वस्त्राजिने तदुपरि स्तृणुयादेतदासनम् ॥ १४१८ ॥

प्राणायामप्रकारश्च पूर्वमेव समीरितः ।
इन्द्रियाणां प्रसक्तानां विषयेष्वनिवर्तिनाम् ॥ १४१९ ॥

निवर्तनं यन्मनसा प्रत्याहारस्य ईरितः ।
दुर्निग्रहस्य मनसश्चञ्चलस्यास्थिरस्य च ॥ १४२० ॥

ब्रह्मण्यचञ्चलत्वेन स्थापनं धारणा मता ।
पौनःपुन्येन तत्रैव स्थितेन मनसा हरेः ॥ १४२१ ॥

समस्तावयवध्यानं ध्यानमित्यभिधीयते ।
अचञ्चलस्य मनसो निवाताचलदीपवत् ॥ १४२२ ॥

अप्रच्युतिर्भगवतस्समाधिरभिधीयते ।
एतैरष्टभिरङ्गैश्च सहितं परमात्मना ॥ १४२३ ॥

मनसो वाऽस्ति संयोगः सयोगस्सद्भिरीरितः ।
नाभिकन्दसमुद्भूतं शुद्धस्फटिकसंनिभम् ॥ १४२४ ॥

द्वादशाङ्गुलविस्तीर्णमष्टपत्रसमन्वितम् ।
अष्टाङ्गुलं तस्य नालमुन्मुखं हृदयाम्बुजम् ॥ १४२५ ॥

ध्यात्वा तत्कर्णिकामध्ये कालमेघसमद्युतिम् ।
किरीटहारकेयूरनूपुराङ्गदभूषितम् ॥ १४२६ ॥

प्रसन्नवदनाम्भोजं मन्दस्मेरं मनोहरम् ।
आजानुबाहुं पद्माक्षं सीतासौमित्रिसंयुतम् ॥ १४२७ ॥

सव्येतरकरभ्राजज्ज्ञानमुद्रं कृपानिधिम्।
सव्यजानुलसत्सव्यकरं वीरासनाश्रितम्॥ १४२८॥

पीताम्बरं कोमलाङ्गं कोटिकन्दर्पसुन्दरम्।
श्रीरामचन्द्रं ध्यात्वैवं मन्त्रं तस्य षडक्षरम्॥ १४२९॥

जपित्वा तस्य नामानि कीर्तयित्वा च तद्गुणान्।
यावन्निद्रा समायाति तावद्योगं समाचरेत्॥ ११४३०॥

निद्रान्तरे प्रबुद्धश्च हरिनामानि कीर्तयेत्।
पुनर्निद्रामनुभवेच्चिन्तयन् भगवद्गुणान्॥ १४३१॥

ततश्शयीत शयने प्रोक्षिते माधवं स्मरन्।

शयनस्त्रीसंगमादिक्रमः

पादौ प्रक्षाल्य संमृज्य शुष्काङ्घ्रिश्शयनं चरेत्॥ १४३२॥

चत्वरे शून्यभवने श्मशाने देवतालये।
आकाशे भिन्नशय्यायां वृक्षमूले शुचिस्थले॥ १४३३॥

देवतानां गुरूणां च गवां धान्यस्य चोपरि।
न स्वपेदशुचिर्नग्न आर्द्रवासा उदक्शिराः॥ १४३४॥

न शयीत च दर्भेषु विना दीक्षां व्रतानि च।
शयीत प्राक्शिराः स्वस्मिन् गृहे प्रत्यक्शिराः पथि॥ १४३५॥

श्वसुरस्य गृहे न्यस्य गृहे वा दक्षिणा शिराः।
सुवेषया दयितयाऽरोगया शुद्धचित्तया॥ १४३६॥

भार्यया संविशेत् सार्धं स्वयं चैवं गुणान्वितः।
यस्मिन् दिने रजो दृष्टमृतुः षोडश रात्रयः॥ १४३७॥

चत्वारो रात्रयस्त्वाद्या वर्ज्या स्त्रीगमने स्मृताः।
स्त्रियमन्यासु संगच्छेत् सकृद्वा द्वादशस्वपि॥ १४३८॥

तत्रापि वर्जयेत् षष्ठीमष्टमीं च चतुर्दशीम्।
व्यतीपातं च संक्रान्तिं पर्वणी श्राद्धवासरम्॥ १४३९॥

जन्मर्क्षं बुधवारं च तथा व्रतदिनानि च ।
मैथुनं नाचरेन्मध्यरात्रे सन्ध्याद्वये दिवा ॥ १४४० ॥

प्रवासाद्दागतस्यैषु गन्तुर्दोषो न विद्यते ।
अनृतौ च स्त्रियं गच्छेत्तयैव प्रार्थितो यदि ॥ १४४१ ॥

विण्मूत्रोत्सर्जनं भुक्तिं मैथुनं च रहश्चरेत् ।
ऋतौ नोपैति भार्यां यो योऽयोनौ रेत उत्सृजेत् ॥ १४४२ ॥

करोति गर्भध्वंसं यः भ्रूणहा सप्रकीर्तितः ।
पुत्रे जाते न दोषः स्यात् ऋतावगमनेऽपि वा ॥ १४४३ ॥

एकदैव स्त्रियं गच्छेदेकस्यां निशि सर्वदा ।
अनृतौ तु ब्रह्मसूत्रं निवीतं पृष्ठभागतः ॥ १४४४ ॥

कृत्वा गत्वा स्त्रियं शौचं मूत्रोक्तद्विगुणं चरेत् ।
उपवीत्येवर्तुकाले मैथुनन्तु समाचरेत् ॥ १४४५ ॥

तत्रापि गमने त्वाद्ये प्रत्यृतुस्नानमाचरेत् ।
सर्वत्र मैथुने मौनं दम्पत्योरुभयोः स्मृतम् ॥ १४४६ ॥

शौचं च मूत्रशौचोक्तद्विगुणं तूभयोस्समम् ।
धारणं चान्यवस्त्रस्य तस्मिन्काले तयोस्समम् ॥ १४४७ ॥

सम्यक् प्रक्षालितेनापि तेन मैथुनवाससा ।
न कर्तव्यानि कर्माणि दम्पतिभ्यां कदाचन ॥ १४४८ ॥

आमैथुनं त्वेकशय्या पृथक् शय्या ततस्तयोः ।
न गच्छेद्गर्भिणीमष्टमासादूर्ध्वं विशेषतः ॥ १४४९ ॥

धातुक्षयो रोगवृद्धिरश्रीकः कर्मविप्लवः ।
सौभाग्यायुर्यशोनाशः पुसां स्त्रीष्वतिसंगिनाम् ॥ १४५० ॥

देवालयार्कवाय्वग्निब्राह्मणानामपां गवाम् ।
देवानामप्यभिमुखं चरणौ न प्रसारयेत् ॥ १४५१ ॥

धान्यगोदेवविप्राणां न शयीतोन्नतस्थले ।
शृण्वन् श्रोत्रसुखां वाचं गायतां भगवद्गुणान् ॥ १४५२ ॥

निद्रामनुभवेत् श्रीशपादाब्जन्यस्तमानसः ।
प्रियां भार्यां गुरुं शिष्यं सुहृदं तनयं तथा ॥ १४५३ ॥

विनाऽन्येभ्यो न कथयेत् स्वप्ने दृष्टं शुभं यदि ।
दुस्स्वप्नदर्शने सद्य उत्थायाचम्य च द्विधा ॥ १४५४ ॥

प्रणम्य भगवन्तं तन्नामसंकीर्तनं चरेत् ।
स्तोत्रैस्स्तुत्वोषसि स्नात्वा दुस्स्वप्नानुगुणं ततः ॥ १४५५ ॥

शक्त्या दानं जपं होमं लक्ष्मीरमणपूजनम् ।
तदीयपूजा तस्यैव प्रीत्यै भक्त्या समाचरेत् ॥ १४५६ ॥

मध्ययामद्वयं निद्रामनुभूयोक्तवर्त्मना ।
ब्राह्मे मुहूर्ते सन्त्यज्य निद्रामुत्थाय सत्वरः ॥ १४५७ ॥

संकीर्त्य पूर्ववद्योगं चरित्वा तं समाचरेत् ।
प्रोक्तं मयैवमच्छिद्रपञ्चकालपरायणैः ॥ १४५८ ॥

सद्भिर्भागवतैर्यत्तत्कर्तव्यं कर्म नित्यदा ।
पञ्चकालविधिरेष नित्यदा पञ्चकालभगवत्परायणैः ।
साधुभिस्सततमुक्तमत्सरैर्वीरराघवकृतस्समीक्ष्यताम् ॥ १४५९ ॥

श्रीरामाराधनविधिः पञ्चकालप्रकारतः ॥ १४६० ॥

सीतारामप्रेरितेन मया प्रोक्तो यथामति ।
शाण्डिल्याद्यैर्मुनिश्रेष्ठैः पञ्चकालपरायणैः ॥ १४६१ ॥

प्रोक्ता धर्माः संगृहीता यथामति मयाऽधुना ।
द्रष्टव्यास्सादरं सद्भिः कर्तव्याश्च विमत्सरैः ॥ १४६२ ॥

अत्रानुक्तिदुरुक्त्यादि यद्यस्ति क्षम्यतां च तत् ।
अत्र प्रोक्तेषु धर्मेषु जायते संशयो यदि ॥ १४६३ ॥

रत्नाकरं च शाण्डिल्यस्मृत्यादि च विलोक्यताम् ।

इति योगविधिः । पञ्चकालविधिस्समाप्तः

अथ स्त्रीधर्माः

अथ धर्माः प्रवक्ष्यन्ते स्त्रीणामद्य यथामति ॥ १४६४ ॥

ब्राह्मे मुहूर्ते स्त्री भर्तुः पूर्वमुत्थाय सत्वरा ।
प्रक्षाल्य पादौ हस्तौ च द्विराचम्योपविश्य च ॥ १४६५ ॥

सप्तकृत्वो हरिरिति व्याहरन्ती रमापतिम् ।
ध्यायन्ती वासुदेवादीन् केशवदींश्चं तत्परा ॥ १४६६ ॥

मत्स्यादींश्च चतुर्थ्यन्तं नमोऽन्तमपि कीर्तयेत् ।
श्रीविष्णुचित्तभक्ताङ्घ्रिरेणुगोदादिभिः कृताः ॥ १४६७ ॥

गाथास्संकीर्तयन्त्येव स्तोत्राण्यार्षादृते ततः ।
कृतानि निगमान्तार्यप्रमुखैरपि कीर्तयेत् ॥ १४६८ ॥

अन्तर्बहिश्च सदनं सिञ्चेत् गोमयवारिणा ।
संमार्जन्या मार्जयेच्च कदाचिदुपलेपयेत् ॥ १४६९ ॥

भृग्वारार्क्यर्कवारेषु चतुर्दश्यां तिथावपि ।
विना निमित्तं न गृहं लेपयेत्गोमयाम्बुभिः ॥ १४७० ॥

विण्मूत्रोत्सर्जनं शौचाचमने दन्तधावनम् ।
स्नानं च कुर्यात् पूर्वोक्तक्रमान्मन्त्रविवर्जितम् ॥ १४७१ ॥

उदयानन्तरं स्नानं योषितां समुदाहृतम् ।
अष्टाक्षरविधानेन स्त्रीणां स्नानमुदाहृतम् ॥ १४७२ ॥

स्त्रीभिश्च धार्यं पूर्वोक्तलक्षणं वसनद्वयम् ।
ऊर्ध्वपुण्ड्रं च भगवत्पदाकृत्येव नान्यथा ॥ १४७३ ॥

अन्यथा धारणे चिन्त्यं वचनं द्विजसत्तमैः ।
धृतवस्त्रोर्ध्वपुण्ड्रा स्ती दत्वा चार्घ्यं विवस्वते ॥ १४७४ ॥

गृहं गत्वाग्न्यगारं च होमोपकरणानि च ।
संशोध्य भस्म चोद्धृत्य काष्ठैः प्रज्वाल्य पावकम् ॥ १४७५ ॥

पुष्पाक्षतैस्समभ्यर्च्य भर्त्रा होमे कृते ततः ।
तुषं करीषपिण्डं च निक्षिप्याग्नौ समाहिता ॥ १४७६ ॥

विधानेनाग्निमाच्छाद्य कृत्वा तस्यापि रक्षणम् ।
भगवत्सन्निधिं गत्वा मार्जनं चोपलेपनम् ॥ १४७७ ॥

कृत्वा च रङ्गवल्ल्याद्यैरलङ्कृत्य मनोहरम् ।
निर्मलीकृत्य पात्राणि पूजोपकरणानि च ॥ १४७८ ॥

भगवन्तं संप्रणम्य स्तोत्रैस्स्तुत्वा च मानुषैः ।
द्रामिडैस्संस्कृतैर्वापि गानैस्संतोष्य माधवम् ॥ १४७९ ॥

प्रदक्षिणनमस्कारान् भक्त्या कृत्वा पुनः पुनः ।
बालानां देहसंशुद्धिं कृत्वाऽलङ्कृत्य तांश्च ताः ॥ १४८० ॥

शङ्खचक्रादिरूपाणि भूषणानि च धारयेत् ।
भगवद्वन्दनादीनि कारयित्वा पृथक् पृथक् ॥ १४८१ ॥

पुत्रोऽयं पुत्र्यसौ देव देवायेति निवेदयेत् ।
पितृश्वशुरभर्त्रादीन् संप्रणम्य गुरूनपि ॥ १४८२ ॥

तोयशाकफलादीनां कुर्यादाहरणं ततः ।
शस्त्रेण फलमूलानि निकृत्यालोक्य यत्नतः ॥ १४८३ ॥

कण्टकक्रिमिकीटादि निर्हरेद्वाग्यता सती ।
शाकान्याहृत्य बहुशः संपश्येच्च पुनः पुनः ॥ १४८४ ॥

शाकतण्डुलमुद्गादि चतुः प्रक्षालयेच्च तत् ।
तुलसीपुष्पशाकान्नतण्डुलाम्भःकणानि च ॥ १४८५ ॥

कस्मैचिदपि नो दद्यात् पुरुषानुज्ञया विना ।
पादप्रक्षालनाधर्थं पाकार्थं चाम्बु पावनम् ॥ १४८६ ॥

वस्त्रेण बहुशश्शोध्य स्थापयेच्च पृथक् पृथक् ।
त्रिस्संशोध्याम्बुयागार्थं वाससा शुद्धभाजने ॥ १४८७ ॥

एलादिद्रव्यसंयुक्तं स्थापयेत् शीतलस्थले ।
काककुक्कुटपश्वाद्यैरसंस्पृष्टे शुचिस्थले ॥ १४८८ ॥

उपलिप्ते तिलव्रीहिमुद्गादीनभिताप्य च ।
अङ्गान्यसंस्पृशन्तीभिरजल्पन्तीभिरेव च ॥ १४८९ ॥

मार्जयन्तीभिरन्येन वाससा श्रमवारि च ।
कारयेच्चावहननं कुलस्त्रीभिश्शुचिस्थले ॥ १४९० ॥

निर्मलीकृत्य तान् शुद्धैर्मुसलोलूखलादिभिः ।
भाण्डानि कृत्वा निर्लेपान्यातपे तानि तापयेत् ॥ १४९१ ॥

शर्करास्थिसमेतानि भिन्नानि च परित्यजेत् ।
पूर्वेद्युर्येषु भाण्डेषु कृता स्यात् पचनक्रिया ॥ १४९२ ॥

तेष्वन्येद्युर्न कर्तव्या भाण्डेषु पचनक्रिया ।
तापितेष्वातपाग्निभ्यां पाकं भाण्डेषु चाचरेत् ॥ १४९३ ॥

मासादूर्ध्वं मृन्मयानि पाकभाण्डानि संत्यजेत् ।
उदङ्मुखा प्राङ्मुखा वा पाकं कुर्यात्तु वाग्यता ॥ १४९४ ॥

पचनाग्निं परगृहात् कदाचिदपि नाहरेत् ।
यद्याहरेत् तत्पक्वेन पतिः कर्म करोति चेत् ॥ १४९५ ॥

अग्निदस्य भवेदर्धं तत्फलं स्यात् न संशयः ।
तस्याद्यत्नेन संरक्षेत् पचनाग्निं स्ववेश्मनि ॥ १४९६ ॥

अग्नौ प्रज्वलिते संयक् पचेच्छाकौदनादिकम् ।
नोपशाम्योपशाम्याग्निं न मन्दं न च सत्वरम् ॥ १४९७ ॥

नावतार्यावतार्याध आरोप्यारोप्य वा पचेत् ।
पलाशं बिल्वमश्वत्थं कोविदारं विभीतकम् ॥ १४९८ ॥

मरीचिं तालमुन्मत्तं पारिजातं हरीतकम् ।
कण्टकिद्रुममैरण्डं करञ्जमपि शल्मलीम् ॥ १४९९ ॥

श्लेष्मातकं शिरीषं च तिलमर्कं विषद्रुमान् ।
धूमयोनिं च दुर्गन्धमिन्धने परिवर्जयेत् ॥ १५०० ॥

मरीचितिन्त्रिणीक्षीरजीरकाज्येङ्गुसर्षपैः ।
नालिकेरादिभिर्द्रव्यैर्यथायोगं च संयुतम् ॥ १५०१ ॥

सयूषं वा वियूषं वा व्यञ्जनं साधयेत् सती ।
विदग्धमासुरं प्रोक्तमपक्वं रौद्रमीरितम् ॥ १५०२ ॥

(सयूषम् - मुद्गादिक्वाथरससहितम्)

दैवं सुपक्वं विज्ञेयं संयक् पक्वं पचेत् क्रमात् ।
शाकानि त्रीणि वा द्वे वा विभवेत्वधिकं पचेत् ॥ १५०३ ॥

मुद्गान्नं च गुडान्नं च दध्यन्नमपि पायसम् ।
विशेषदिवसेऽपूपसूपादीनपि साधयेत् ॥ १५०४ ॥

स्वेदाश्रुनासाम्ब्वङ्गानि स्पृष्ट्वा प्रक्षालयेत् करम् ।
पाकभाण्डस्थितं सर्वमोदनव्यञ्जनादिकम् ॥ १५०५ ॥

अलङ्कृतेषूर्ध्वपुण्ड्रैः कृत्वा पात्रान्तरेषु तत् ।
प्रक्षाल्य पाकभाण्डानि न्युब्ज्य तानि ततोऽम्बुभिः ॥ १५०६ ॥

अभ्युक्ष्य पाकशालां च मार्जयित्वा ततः परम् ।
प्रक्षाल्य पादौ हस्तौ च धृत्वा वस्त्रान्तरं ततः ॥ १५०७ ॥

आचम्य भगवद्गेहे दीपं प्रज्वालयेदपि ।
गोमहिष्याज्यतैलैस्तु दीपमारोपयेत् सदा ॥ १५०८ ॥

दीपमैरण्डतैलाद्यैर्भगवत्सन्निधौ त्यजेत् ।
गन्धं पुष्पं धूपदीपौ मधुपर्कनिवेदनम् ॥ १५०९ ॥

पानीयमपि ताम्बूलं तत्तत्काले समर्पयेत् ।
प्रदक्षिणनमस्कारान् कृत्वा देवाय भक्तितः ॥ १५१० ॥

वैश्वदेवादिसमये वह्निशुश्रूषणं चरेत् ।
वर्णिभ्यश्च यतिभ्यश्च भिक्षां दत्त्वाम्बुपूर्वकम् ॥ १५११ ॥

अतिथ्यभ्यागतादीनां पूजां कुर्यात् प्रहर्षिता ।
भर्त्रादीनां भुक्तिदेशे मण्डलं गोमयाम्बुना ॥ १५१२ ॥

निश्छिद्रं चतुरश्रं च कृत्वाऽथ परिषेचयेत् ।
न दद्यादेकहस्तेन सूपान्नव्यञ्जनादिकम् ॥ १५१३ ॥

पक्वानि व्यञ्जनादीनि जलक्षीरघृतानि च ।
दर्व्या दद्यात्तैलपक्वमपक्वमपि हस्ततः ॥ १५१४ ॥

तैलाज्यव्यञ्जनान्नादि हस्ते दद्यात् न किंचन ।
दर्व्यैव दद्यात् लवणं प्रच्छन्नं त्वोदनादिभिः ॥ १५१५ ॥

पायसापूपसूपादि सति दद्यात् पुनः पुनः ।
भर्तृशुश्रूषणं कृत्वा ताम्बूलादिप्रदानतः ॥ १५१६ ॥

स्वयमद्यात् सनियमं भुक्तेषु श्वशुरादिषु ।
जात्यादिदुष्टमन्नादि प्रयत्नेन विवर्जयेत् ॥ १५१७ ॥

पादप्रसारणं हासं रोदनं बहुभाषणम् ।
परित्यजेत् पुमान् स्त्री वा दोषोऽनन्यांश्च भोजने ॥ १५१८ ॥

प्रोक्ता ये नियमाः पुंसां भुक्तौ स्त्रीणां च ते समाः ।
भोजनाद्यन्तयोः पादौ प्रक्षाल्या चमनद्वयम् ॥ १५१९ ॥

कुर्यात् चान्यनिमित्तेषु वाससो धारणादिषु ।
उच्छिष्टं भक्षयेत् ज्येष्ठभ्रातुः पत्युर्गुरोः पितुः ॥ १५२० ॥

श्वश्रूश्वशुरमातृणामप्युच्छिष्टं न भक्षयेत् ।
ततः स्नुषाद्यान् भृत्यांश्च भोजयेत् परिचारकान् ॥ १५२१ ॥

पूर्णमेवोदनं दद्यात् दासानां कर्म कुर्वताम् ।
अक्लेशेन शरीरस्य कुर्यात् कर्माण्यतः परम् ॥ १५२२ ॥

दीपमारोप्य सायाह्ने गृहे देवस्य सन्निधौ ।
देवं प्रणम्य श्वशुरपतिपित्रादिकानपि ॥ १५२३ ॥

विना धात्री तिलादींश्च पक्वान्नव्यञ्जनादिकम् ।
कृत्वा देवाग्निशुश्रूषामग्निसंरक्षणं तथा ॥ १५२४ ॥

भोजयित्वा च भर्त्रादीन् भुक्त्वा पथ्यं मितं लघु ।
पादसंवाहनादीनि कृत्वा भर्तुर्यथाप्रियम् ॥ १५२५ ॥

शयने भर्तृनिर्दिष्टे सुप्ते भर्तरि संविशेत् ।
सुवस्त्रभूषणा भर्तुर्दयिता शुद्धमानसा ॥ १५२६ ॥

आहूता सत्वरं गच्छेत् सुरतार्थं प्रियान्विता ।
नान्यं विचिन्तयेत् चित्ते तस्मिन् काले पतिं विना ॥ १५२७ ॥

यथा प्रियं तथा कुर्यात् भर्तुर्विघ्नं न चाचरेत् ।
भर्त्राहूता च रत्यर्थं ऋतौ स्वस्था न याति या ॥ १५२८ ॥

आर्तवागमनार्थाय या भक्षयति चौषधम् ।
आच्छादयत्यार्तवं या गर्भध्वंसं करोति या ॥ १५२९ ॥

सपत्न्यै या विषं दद्यात् भ्रूणघ्न्यस्ताः प्रकीर्तिताः ।
संमानमवमानं च गृहच्छिद्रं धनं वयः ॥ १५३० ॥

अकृत्यं भर्तृदोषांश्च मैथुनं न प्रकाशयेत् ।
कृते तु मैथुने भर्त्रा शौचं कुर्यात् यथोदितम् ॥ १५३१ ॥

ब्राह्मान्मुहूर्तादारभ्य स्त्रीणां कृत्यमितीरितम् ।
पतिशुश्रूषणादीनि पाकादीनि च नित्यशः ॥ १५३२ ॥

श्रीशकैङ्कर्यबुध्यैव कुर्यात् कर्माणि नान्यथा ।
पतिव्रता पतिप्राणा पतिविन्यस्तमानसा ॥ १५३३ ॥

पतिबन्धुः पतिधना पतिमित्रा पतिप्रिया ।
सधर्मचारिणीभर्तुः स्त्री भवेत् पतिदेवता ॥ १५३४ ॥

बाह्याभ्यन्तरशुचौ चाढ्या सुमुखी प्रियभाषिणी ।
स्वलङ्कृता सुवसना वेषालङ्कारनिस्पृहा ॥ १५३५ ॥

सुगुप्तधनधान्या च कुशला गृहकर्मसु ।
निर्लेपमृष्टभाण्डौघा निस्स्नेहा रसवस्तुषु ॥ १५३६ ॥

डम्भमोहमदासूया क्रोधाहङ्कारवर्जिता ।
दयाक्षान्त्यादिकल्याणगुणयुक्ता जितेन्द्रिया ॥ १५३७ ॥

स्थिरबुद्धिः स्थिरप्रज्ञा दृढभक्तिर्दृढव्रता ।
महाभागवताचार्यश्रीशवन्दनतत्परा ॥ १५३८ ॥

सलज्जावनता हृद्यवेषा मृदुपरिक्रमा ।
अनृतासत्यवचनविवादालस्यवर्जिता ॥ १५३९ ॥

प्रहासरोदनगृहद्वारावस्थानवर्जिता ।
अलुब्धा नास्तिवचनसंत्रस्ता मितभाषिणी ॥ १५४० ॥

अतिथ्यभ्यागतप्रेष्यबन्धुभिक्षुकवत्सला ।
अनाचारविहीना च सदाचारपरायणा ॥ १५४१ ॥

कर्मणा मनसा वाचा भर्तृपूजारता सदा ।
असत्संसर्गसल्लापविहीना छलविग्रहा ॥ १५४२ ॥

जनसङ्घप्रवेशादिसंत्रस्ता चोत्सवादिषु ।
एवमादिगुणोपेता स्त्री भवेत् पतिवल्लभा ॥ १५४३ ॥

नाद्यात् भर्तर्यभुक्ते स्त्री नासीत पतिसंनिधौ ।
दद्याच्च किंचित् कस्यैचित् न तस्यानुमतिं विना ॥ १५४४ ॥

वञ्चयित्वा पतिं तस्य द्रव्यं नापहरेत् सती ।
शठं न्यूनातिरिक्ताङ्गं वेदशास्त्रविवर्जितम् ॥ १५४५ ॥

दरिद्रं रोगिणं मूर्खं दुराचारं च कर्कशम् ।
कुरूपमसमर्थं वा दुर्विनीतं च दुर्मतिम् ॥ १५४६ ॥

उन्मत्तं पतितं वापि देववत् पूजयेत् पतिम् ।
कुर्यात् शुश्रूषणं तस्य पादप्रक्षालनादिभिः ॥ १५४७ ॥

पादौ प्रक्षाल्य तत्तोयं गङ्गातोयसमं पिबेत् ।
भर्त्रा यदुक्तं तत्कार्यं तद्वाक्यं नातिलंघयेत् ॥ १५४८ ॥

स्नानदानोपवासादि तेनैवानुमता चरेत् ।
भक्ष्यं भोज्यं च पेयं च फलमूलादिकं तथा ॥ १५४९ ॥

भर्ता यद्वस्तु नाश्नाति नाश्नीयात् तत्स्वयं सती ।
संतुष्टे संप्रहृष्टा स्यात् दुःखिते दुःखिता भवेत् ॥ १५५० ॥

तस्मिन् क्रुद्धे त्वसंक्रुद्धा सुमनास्तं प्रसादयेत् ।
प्रणम्य संपरिष्वज्य कण्ठे तमवलम्बयेत् ॥ १५५१ ॥

भर्त्सिता निन्दिता वापि ताडिता वापि किंचन ।
आक्रोशं प्रतिवाक्यं च रोदनं च विवर्जयेत् ॥ १५५२ ॥

स्त्रीभ्यः पुंभ्यश्च न वदेत् न निर्गच्छेत् गृहाद्बहिः ।
भवान् ममाद्य प्रभृति पिता भ्राता गुरुस्सुतः ॥ १५५३ ॥

इत्यादिकं च वचनं वदेत् शपथपूर्वकम् ।
गृहकार्याणि निर्वृत्य हरिद्रालेपनादिभिः ॥ १५५४ ॥

शुद्धा सुगन्धकुसुमवस्त्रालङ्कारभूषिता ।
भर्तुस्समीपं संगच्छेत् मन्दस्मितलसन्मुखा ॥ १५५५ ॥

भर्तुस्समीपे न वदेत् अन्येषां गुणवर्णनम् ।
तस्मिन् संभाष्यमाणे तु पश्येत् नान्यत्र तन्मुखात् ॥ १५५६ ॥

शास्त्रादिकौशलं तस्य दृष्ट्वा प्रमुदिता भवेत् ।
सकामं वीक्षिताप्यन्यैः प्रियवाक्यैश्च भूषणैः ॥ १५५७ ॥

प्रलोभिता वा वस्त्राद्यैर्दैन्येन प्रार्थितापि वा ।
रूपयौवनसंपन्नं धनवन्तं विभूषितम् ॥ १५५८ ॥

भर्तुरन्यं नरं दृष्ट्वा विकारं नाप्नुयात् सती ।
पुण्यक्षेत्रोत्सवाद्यर्थं न गच्छेत् पतिना विना ॥ १५५९ ॥

बाला वा युवतिर्वृद्धा स्वतन्त्रा स्यात् न जातुचित् ।
पितृभर्तृसुताधीना त्र्यवस्थानुक्रमात् भवेत् ॥ १५६० ॥

भर्तरि प्रोषिते दीनवदना मलिनाम्बरा ।
गन्धपुष्पाद्यलङ्कारताम्बूलादीनि वर्जयेत् ॥ १५६१ ॥

पुरुषान् प्रेषयित्वास्य प्रवृत्तिं श्रृणुयात् सदा ।
तत्सुखागमनार्थाय पूजयेत् कमलापतिम् ॥ १५६२ ॥

द्विकालभोजनं दन्तधावनं च विवर्जयेत् ।
श्वश्रूमात्रादिवनितासमीपे शयनं चरेत् ॥ १५६३ ॥

पतिकल्पितया वृत्त्या दैन्यमुत्सृज्य वर्तयेत् ।

रजस्वलानियमाः

रजस्वला यदा या स्यात् सा कुर्यात् नियमानिमान् ॥ १५६४ ॥

यस्मिन् वस्त्रे रजो दृष्टं तदेव वसनं त्र्यहम् ।
धारयेत् न च संत्याज्यं नान्यद्वासश्च धारयेत् ॥ १५६५ ॥

शरीरोद्वर्तनं स्नानमभ्यङ्गं दन्तधावनम् ।
गन्धं पुष्पं च ताम्बूलं हासं रोदनमञ्जनम् ॥ १५६६ ॥

रजस्वला सूतिकान्त्यस्पृष्टिं संभाषणं च तैः ।
शूद्रादिस्पृष्टिमलकालङ्घृतिं नखकृन्तनम् ॥ १५६७ ॥

पलाशपत्रभुक्तिं च ह्रस्वपात्रे च भोजनम् ।
बहिः पर्यटनं रज्जुकरणं रात्रिभोजनम् ॥ १५६८ ॥

शकृज्जलाद्याहरणमुद्घोषं वन्दनं कलिम् ।
मैथुनं च दिवा स्वापं विशेषेण विवर्जयेत् ॥ १५६९ ॥

न नदीतरणं कुर्यात् न बहिः पर्यटेत् गृहात् ।
यत्र त्रिरात्रं शयनं भोजनं च कृतं भवेत् ॥ १५७० ॥

चतुर्थदिवसे तत्र खात्वा च चतुरङ्गुलम् ।
त्यक्त्वाऽन्यत्र मृदं तां तु पूरयेदन्यया मृदा ॥ १५७१ ॥

प्रादेशनात्रखननं कृत्वाऽऽपूर्यान्यया मृदा ॥ १५७१ A ॥

शय्योपधानवस्त्रादि रजकाय प्रदापयेत् ।
अथ वा मलवद्वासः पक्त्वा क्षारोदकेन च ॥ १५७२ ॥

वस्त्रशय्यासनादीनि स्वयमेव विशोधयेत् ।
द्वात्रिंशद्भिर्मृत्तिकाभिरद्भिर्गृह्यं विशोधयेत् ॥ १५७३ ॥

तावतीभिर्मृत्तिकाभिः पादौ हस्तौ विशोध्य च ।
नखानि हस्तपादानां अश्मना घर्षयेत् तदा ॥ १५७४ ॥

द्वात्रिंशद्भिश्च गण्डूषैरास्यशुद्धिं विधाय च ।
धात्रीमधूककल्काद्यैः केशानङ्गं विशोध्य च ॥ १५७५ ॥

उद्धृताभिस्तटे देहं प्रक्षाल्याथ विशोध्य तत् ।
ततोऽवतार्य सलिले द्वात्रिंशन्मज्जनं ततः ॥ १५७६ ॥

एकोच्छ्वासेन कृत्वाऽथ ताम्रकांस्यदिभाजनम् ।
संविशोध्याम्लभस्माद्यैर्द्वात्रिंशद्वारमेव च ॥ १५७७ ॥

तस्या वस्त्रासनादीनां तावत्संख्यानिमज्जनम् ।
कृत्वा स्वयं निमज्जेच्च तावत्या संख्यया पुनः ॥ १५७८ ॥

अपश्यन्त्यन्यपुरुषं ध्यायन्ती स्वपतिं धिया ।
दृष्ट्वा सूर्यं नमस्कृत्य तद्गच्छेत् निजमन्दिरम् ॥ १५७९ ॥

स्नाता नार्यन्यपुरुषं यदि पश्येत् प्रमादतः ।
पतिरूपं विवस्वन्तं पश्येत् तद्दोषशान्तये ॥ १५८० ॥

शिशुं न पश्येत् तदहः स्नाता नारी रजस्वला ।
ब्रह्मकूर्चं पिबेत् पञ्चगव्यं वा गोःपयोपि वा ॥ १५८१ ॥

भक्षयित्वाऽन्नकबलं न दोषश्शिशुदर्शने ।
भाण्डदेवोपकरणहोमद्रव्याणि न स्पृशेत् ॥ १५८२ ॥

न कुर्यात् कर्मपाकादि चतुर्थेऽह्नि रजस्वला ।
अन्याभावे पुनस्स्नानं कृत्वा वा तत्समाचरेत् ॥ १५८३ ॥

गर्भिणी स्यात् यदा नारी कृतरक्षा सुभूषिता ।
असती बालविधवा वन्ध्या अपि मृतप्रजाः ॥ १५८४ ॥

नाभिभाषेत संसर्गं ताभिश्च सह वर्जयेत् ।
न कथां श्रृणुयात् क्रूरां न पश्येच्च भयङ्करम् ॥ १५८५ ॥

मुक्तकेशी चिरं न स्यात् न शयीताप्युदक्छिराः ।
नाधितिष्ठेत् तुषामेध्या लोष्टोलूखलभस्मसु ॥ १५८६ ॥

नात्युष्णक्षारगुर्वन्नव्यञ्जनाद्यशनं चरेत् ।
भूमावङ्गारभस्माद्यैर्नखैः काष्ठैश्च लेखनम् ॥ १५८७ ॥

उरश्शिरः प्रहारं च रोदनं धावनं कलिम् ।
शूर्पसंमार्जनीवातरजः पर्यटनं सदा ॥ १५८८ ॥

गात्रभङ्गमधश्शय्यां वृक्षमूले च संस्थितिम् ।
दिवा स्वापं सदा शय्यां सन्ध्याकाले च भोजनम् ॥ १५८९ ॥

खट्वादीपनरच्छायां व्रीहिसंमर्दनादिकम् ।
परान्नभोजनं यात्रामाषाढे मासिचाष्टमे ॥ १५९० ॥

षष्ठे चतुर्थे दशमे गर्भिणी परिवर्जयेत् ।
एवं व्रता यदि स्त्री स्यात् लभेद्दीर्घायुषं सुतम् ॥ १५९१ ॥

अन्यथा गर्भपतनमल्पायुर्वा सुतो भवेत् ।
एतैरन्यैश्च नियमैस्संयुक्ता यदि गर्भिणी ॥ १५९२ ॥

सुतं दीर्घायुषं धीरं श्रोत्रियं भगवत्परम् ।
पितृभक्तं सदाचारं ज्ञानिनं गुणिनं लभेत् ॥ १५९३ ॥

वितन्तुनियमाः

यदा स्यात् भर्तृमरणं ब्राह्मणी चेत्पतिव्रता ।
एकचित्यनुगन्त्री स्यात् क्षत्रियाद्याः पृथक् चितौ ॥ १५९४ ॥

देशान्तरमृतौ तस्य चिताभस्मानलं विशेत् ।
पादुकायुग्ममालिङ्ग्य लभते शाश्वतीं गतिम् ॥ १५९५ ॥

क्षत्रियाद्याः पृथक्चित्यामेवमग्निं विशन्ति चेत् ।
लभन्ते कीर्तिमतुलां प्रतिष्ठां शाश्वतीं गतिम् ॥ १५९६ ॥

अधीरा तु मृते पत्यौ तदा तद्दशमेऽहनि ।
शिरसो मुण्डनं कुर्यात् तदूर्ध्वं च पुनः पुनः ॥ १५९७ ॥

ब्राह्मे मुहूर्ते विधवा समुत्थाय समाहिता ।
नामसंकीर्तनादीनि कृत्वा कर्माणि पूर्ववत् ॥ १५९८ ॥

स्नात्वा पूर्वोक्तविधिना तर्पयेत् पितृतीर्थतः ।
स्वभर्तृतत्पितृपितामहानञ्जलिनोदकैः ॥ १५९९ ॥

गोत्रं शर्म समुच्चार्य द्वितीयान्तं स्वधा नमः ।
तर्पयामीति चोच्चार्य त्रिस्त्रिर्भक्त्यान्वहं चरेत् ॥ १६०० ॥

स्वभर्तृप्रभृतींस्त्रींश्च स्वपित्रादिभ्य एवं च ।
विधवा कारयेत् श्राद्धं नित्यं नैमित्तिकं तथा ॥ १६०१ ॥
(कुर्याद्वेति शेषः ।)

गन्धपुष्पाद्यलङ्कारं स्नानमुष्णेन वारिणा ।
पर्यङ्कशयनं केशधारणं रोदनं सदा ॥ १६०२ ॥

अस्नात्वा भोजनं रात्रिभुक्तिं पूर्वाह्णभोजनम् ।
रस्यवस्तुषु चापल्यं कांस्यपात्रे च भोजनम् ॥ १६०३ ॥

तैलाभ्यङ्गं च ताम्बूलमादर्शवीक्षणं तथा ।
शरीरोद्वर्तनं दन्तधावनं बहुभाषणम् ॥ १६०४ ॥

परापवादं पैशुन्यं निष्ठुरासत्यभाषणम् ।
असतीसंगमक्रोधं विधवाभिश्च संगमम् ॥ १६०५ ॥

पुत्रादिताडनं भर्तृश्वश्रूश्वशुरनिन्दनम् ।
उद्घोषं च दिवा स्वापं मानसं चापि मैथुनम् ॥ १६०६ ॥

असद्वाक्यं च सल्लापं युवाभिः स्नेहसंयुतम् ।
अनाच्छादनमङ्गस्य सदा पर्यटनं बहिः ॥ १६०७ ॥

सदाऽन्यगेहावस्थानं रक्तवस्त्रस्य धारणम् ।
एतानन्यांश्च दोषान् वै विधवा परिवर्जयेत् ॥ १६०८ ॥
स्नानमाराधनं विष्णोस्सदा तन्नामकीर्तनम् ।
रङ्गवल्ल्याद्यलङ्कारं संनिधौ मार्जनं तथा ॥ १६०९ ॥
महाभागवतानां च पादप्रक्षालनाम्भसाम् ।
शिरसा धारणं पानं तत्पूजामासनादिभिः ॥ १६१० ॥
प्रदक्षिणनमस्कारमृष्टान्नादिसमर्पणम् ।
जपमष्टाक्षरादीनां भगवत्स्तोत्रकीर्तनम् ॥ १६११ ॥
शरीरधारणं शाकफलमूलोदनादिभिः ।
सर्वेन्द्रियाणां च जयमेकादश्यामुपोषणम् ॥ १६१२ ॥
पितृपुत्राद्यधीनत्वं काषायाम्बरधारणम् ।
एतानन्यांश्च कुर्वन्ती तीर्थयात्रापरायणा ॥ १६१३ ॥
विष्णोरुत्सवसेवार्थं भगवत्क्षेत्रयायिनी ।
तत्रापि जनसंमर्दप्रवेशातिभयान्विता ॥ १६१४ ॥
पुरुषावयवस्पर्शत्रस्ता च विधवा भवेत् ।
यूनां पुंसां तु युवतिर्विधवा सधवापि वा ॥ १६१५ ॥
संभाषणाङ्गसंस्पर्शपरिहासादिवर्जयेत् ।
तद्विशेषेण रहसि कदाचिदपि नाचरेत् ॥ १६१६ ॥
यद्याचरेत् तदा चित्तं विकारं यात्यसंशयम् ।
तेन भ्रष्टा भवेदेव यद्यपि स्यात् जितेन्द्रिया ॥ १६१७ ॥
न स्मरेत् मनसाऽप्यन्यं युवानं पुरुषं सती ।
मनोदुर्निग्रहं पुंसां स्त्रीणामपि विशेषतः ॥ १६१८ ॥
एवं व्रताः स्त्रियो याः स्युः विधवास्सधवा अपि ।
सर्वपापविनिर्मुक्ताः प्राप्नुवन्ति परं पदम् ॥ १६१९ ॥
स्त्रीणां धर्मस्त्वेवमुक्तो यथामति मयाऽधुना ।
एते समीक्ष्य कर्तव्याः स्त्रीभिरिष्टफलप्रदाः ॥ १६२० ॥

ग्रन्थोपसंहारः

सषोडशशतश्लोकैः द्विचत्वारिंशता युतैः ।
मयैवमधुनाऽकारि सच्चरित्रसुधानिधिः ॥ १६२१ ॥

सत्रिंशद्भिर्नवशतैः कृतोऽभिगमनक्रमः ।
उपादानविधिः पञ्चत्रिंशद्युतशतेन च ॥ १६२२ ॥
त्रिशतेन च विंशत्या श्लोकैरिज्याविधिःकृतः ।
स्वाध्यायविधिरप्युक्तो द्विषष्ट्या श्लोकतल्लजैः ॥ १६२३ ॥
पञ्चचत्वारिंशता च श्लोकै र्योगस्समीरितः ।
सपञ्चाशच्छतश्लोकैः स्त्रीधर्मः परिकीर्तितः ॥ १६२४ ॥
नरसंघोपकृतये नरसंघसमे कलौ ।
वत्सरे कालयुक्त्याख्ये युग्मे मासीन्दुवासरे ॥ १६२५ ॥
समाप्तः श्रीरामतारे सच्चरित्रसुधानिधिः ।
सीतारामः सर्वशक्तः सच्चरित्रसुधानिधिम् ॥
नैध्रुवश्रीनिवासार्यसूनुना समकारयत् ॥ १६२६ ॥
ब्रह्मरुद्रमुखामराधिपवन्दितेन दयालुना
वीरराघवहृद्गतेन रघूद्वहेन सुबोधितम् । १६२७ ॥
नैध्रुवान्वयसंभवेन सदङ्घ्रिपङ्कजसेविना
श्रीनिवासमुनीश्वरांघ्रिसरोजयुग्मषडंघ्रिणा ॥ १६२८ ॥
वीराघवनामधेयवताऽखिलस्मृतिसंग्रहम् ।
पुस्तके लिखितं यथामति सच्चरित्रसुधानिधिम् । १६२९ ॥
पञ्चकालपरायणाः श्रुतिधर्मशास्त्रविशारदाः ।
वीक्ष्य साधु मुदं भजन्त्वनसूयवस्समबुद्धयः ॥ १६३० ॥
निगलैर्मलयैर्नेत्रगानैः प्रीतैः शुभाननैः ।
नामपानैः प्रणीतोऽभिगमनादिविधिर्मुदे ॥ १६३१ ॥
प्रेमेऽब्दे मासि गानज्ञे सेनतारा प्रवासरे ।
श्लोकैः कृतो रविचयैः सच्चरित्रसुधानिधिः ॥ १६३२ ॥

इति वीरराघवाचार्य विरचितः सच्चरित्रसुधानिधिः संपूर्णः ।
श्रीरघुनन्दनपरब्रह्मणे नमः ॥

सच्चरित्रसुधानिधिस्थश्लोकानामर्धानुक्रमणिका

	पृ. श्लो		पृ. श्लो
अकार्यकारी	28/339	अङ्गुष्ठयोः	45/535, 45/538, 46/543
अकाले	5/57, 109/1287	अङ्गुष्ठाग्रेण	17/543/206
अकृते	97/1155	अङ्गुष्ठाभ्यां	45/535
अकृत्सं	131/1531	अङ्गैः	24/292
अकृत्वा	58/693, 64/766	अङ्गोप	18/211
अक्कुध्यन्	89/1049	अचञ्चलस्य	122/1422
अक्लेशेन	130/1522	अच्छिद्र	11/125
अक्षमालाकरां	44/518	अजतातं	71/851
अखण्डितं	118/1378	अजानु	108/1273
अगस्त्य	49/583	अजीर्णे	102/1208
अगुरुं	58/696	अज्ञस्य	4/40
अग्नावत्रं	96/1138	अज्ञातं	24/286
अग्नि	66/780	अज्ञाता	5/55
अग्निदस्य	128/1496	अतःपरं	114/1331
अग्निभस्म	100/1183	अतिथ्यभ्यागत	74/878,130/1512, 132/1541
अग्निभस्म	100/1183	अतिथ्यभ्यागतादिभ्यो	99/1169
अग्निवाय्वर्क	42/499	अतिथ्यभ्यागतौ	98/1162
अग्निश्च	84/994, 119/1382	अतिथ्यभ्यागमनं	98/1157
अग्निं विना	114/1332	अतीते	5/48
अग्निं स्पृष्ट्वा	79/938	अतीत्य	62/739
अग्नीषोमीय	112/1306	अतोऽयं	76/901
अग्नेरापो	41/490	अत्र	76/907, 125/1463
अग्नौ	63/752, 128/1497	अत्रापि	67/799
अघमर्षण	28/334, 3/3620/	अथ धर्माः	126/1464
अङ्गमन्त्रैः	33/389	अथवा	51/608, 61/727, 135/1572
अङ्गं	89/1058	अथ श्रीराम	88/1047
अङ्गानि	128/1489	अथार्जनं	74/877
अङ्गुलीभिः	17/201, 207, 21/248, 41/496, 47/463, 47/559	अथोदुत्तमं	27/319
		अथोपवीती	97/1149
अङ्गुल्या	51/206	अथोपहारं	56/663
अङ्गुष्ठ	26/313, 38/446	अदण्डश्च	121/1409
अङ्गुष्ठं	25/203	अदत्तस्य	10/110

	पृ. श्लो
अद्भिश्च	104/1231
अद्यात्	113/1320
अद्भुतं	51/612
अधश्शरीरं	86/1024
अधीत्य	2/20
अधीयीत	68/813
अधीरा	137/1597
अधो नाभेः	80/955
अधो मुखेन	29/342
अधो वस्त्रं	30/361
अधो वायु	18/222
अधौतं	31/359
अध्यक्ष	74/886
अध्यापनं	74/880, 110/1300
अध्येतव्यं	2/18
अध्वानं	121/1409
अनग्निः	119/1388
अनध्याय	69/821
अनध्यायेषु	68/808, 69/820
अननुष्ठितमेव	5/45
अनन्तरं	41/481
अनन्तादित्य	31/372
अनर्घ	48/577
अनश्नद्भिः	100/1182
अनाचम्य	20/240
अनाचार	132/1541
अनाच्छादनं	137/1607
अनामिका	51/610
अनामिकायां	26/307
अनायासः	11/116
अनाहिताग्निः	78/922
अनिधायैव	20/236
अनिषिद्धान्यन्य	107/1264
अनिषिद्धैः	21/254

	पृ. श्लो
अनुज्ञा	108/1270
अनुज्ञाप्य	23/280
अनुव्रज्य	25/299
अनुषङ्गं	68/811
अनुष्टुप्छन्द	53/633
अनुसन्धाय	90/1070
अनृतासत्य	132/1539
अनृतौ	124/1441, 124/1444
अन्तर्जानुकरं	15/176
अन्तर्जानुकरौ	16/195
अन्तर्बहिश्च	126/1469
अन्तर्लिङ्ग	15/179
अन्ते तिसृणां	92/1096
अन्त्यैः	23/276
अन्नतण्डुल	111/1300H
अन्नव्यञ्जन	113/1327
अन्नं	108/1276, 101/1198
अन्नादिकं	98/1166
अन्नाद्यं	115/1340
अन्नाभावे	96/1135
अन्नोपदंश	101/1200
अन्यच्च	8/88, 81/957
अन्यत्र	85/1014
अन्यत्र	85/1014
अन्यथा	126/1474, 1361/1592
अन्यदेवार्थ	57/680
अन्ययोषित्	8/86
अन्यस्पृष्टौ	80/945
अन्याख्यान	57/674
अन्यानि	72/853, 90/1067
अन्याभावे	135/1583
अन्यायार्जित	23/275
अन्यूनमपि	99/1173
अन्ये	12/128

	पृ. श्लो		पृ. श्लो
अन्येनापि	63/753	अभ्यासं	68/814
अन्ये ब्रह्मादयो	8/90	अभ्युक्ष्य	129/1507
अन्येषां	108/1271	अयाचितं	72/854
अपक्वं	114/1332	अयाज्य	111/1300G
अपचस्याप	108/1275	अयाज्ञीयैः	13/150
अपचारान्	56/673, 58/694	अयोग्यमपि	98/1160
अपरेद्युश्च	69/825	अयोग्येभ्यः	98/1161
अपवित्र	51/601	अमुं	42/495
अपश्यन्त्यन्य	135/1579	अमृतं	100/1191
अपूपफल	98/1167	अमेध्य	14/155, 64/763
अपोह्योष्णं	96/1140	अमेध्यांशं	27/322
अप्रक्षालित	18/213	अमेध्येनापि	63/752
अप्रच्युतः	122/1423	अरत्नि	15/175
अप्रायत्य	27/318	अरिंदर	19/1125
अबुद्धिपूर्वे	39/463, 78/925	अरूक्षार्येषु	7/75
शब्दे नलोत्तरे	76/906	अर्कभार्गव	21/253
अभक्षणं	10/112	अर्घ्यदानस्य	25/301
अभक्ष्यजातं	116/1349	अर्घ्यप्रदान	40/478
अभयाक्ष	42/504	अर्घ्यप्रदानतः	39/460
अभिन्ने	60/716	अर्घ्यप्रदानं	87/1033
अभिमन्त्र्य	33/394, 38/447	अर्चावतार	56/666
अभिवादय	53/628	अर्थार्थं	69/818, 69/821
अभिवाद्य	59/705	अर्थिनामुदकं	103/1228
अभिषिच्य	27/320, 28/338	अर्धप्रसृति	15/180
अभेद्यासु	8/92	अर्धमस्तमिते	38/455
अभोजनं	63/755	अर्धर्चशो	721854
अभोज्यमन्न	101/1203	अर्धं पीत्वा	103/1226
अभोज्यं	112/1306	अर्धोदितं	53635
अभोज्यान्नान्	77/909	अलंकृतं	77/914
अभोज्यमन्नैः	113/1309	अलंकृतेषु	129/1506
अभ्यक्तं	59/709	अलर्क	105/1246
अभ्यङ्गं	82/971	अलुब्धा	1321540
अभ्यङ्गे	20/240, 245	अलोलुपा	7/73
अभ्यर्च्य	91/1075, 92/1091	अवन्ध्यं	117/1368

	पृ. श्लो
अवस्त्रपूतं	114/1338
अविज्ञातान्	98/1162
अविज्ञातोध्वग:	98/1158
अवोक्ष्य	62/734
अशक्तातुर	16/194
अशक्तावुप	39/463
अशक्तौ	19/225, 30/363, 33/398, 36/428, 86/1019
अशब्दयन्	89/1049
अश्रृण्वन्	7/70
अश्नीयात्	115/1340
अश्रद्धया	112/1313
अश्वत्थ	52/621, 64/759
अश्वत्थं	52/620
अश्वत्थोदुम्बर	115/1343
अष्टमे	11/124
अष्टम्यां	107/1261
अष्टाक्षर	126/1472
अष्टाक्षरस्यापि	119/1386
अष्टाक्षरादि	116/1351
अष्टाक्षरेण	32/384, 35/418, 91/1077
अष्टाङ्ग	55/654
अष्टाङ्गुलं	122/1425
अष्टाङ्गुलीनां	45/539
अष्टोत्तरसहस्रं	51/611
अष्टौ	34/404
असच्छास्त्रस्य	7/79
असती	136/1584, 137/1605
असत्प्रतिग्रहं	75/896
असत्यवादिन:	75/887
असत्संसर्ग	132/1542
असद्ध्य:	75/895
असद्वाक्यं	137/1607
असद्विषय	8/88

	पृ. श्लो
असंबद्ध	57/677
असंयुक्तौ	52/616, 100/1187
असाङ्कर्यं	10/113
अस्त्रमन्त्रेण	32/387, 35/415
अस्थिसंचयनात्	77/916
अस्नाता	114/1334
अस्नात्वा	24/291, 137/1603
अस्पृश्य	78/924
अस्य चार्थ:	50/589
अहनि	40/473
अहन्यहनि	103/1223
अहिंसा	9/104
अहुतो	63/750
अहोबिल	16
आकाशे	123/1433
आक्रान्त	57/678
आक्रोशं	133/1552
आखु:	109/1282
आखुकृष्टां	13/144
आगच्छन्तु	28/332
आङ्गीरसो	67/797
आचम्य	67/799, 129/1508
आचरन्नित्य	120/1397
आचामेत्	79/933, 99/1180
आचाराणां	2/15
आच्छादयति	131/1529
आजुह्वान:	64/761
आज्याभ्यभावे	77/919
आज्याभि	101/1197
आज्येन	82/970
आत्मन:	90/1068
आत्मनो	60/711
आत्मनोऽन्तं	46/551
आत्मन्यग्नि	64/763

	पृ. श्लो
आत्ममुद्रा	43/513
आत्मार्थमन्त्रं	98/1160
आदाय	28/338, 32/383
आदित्य	69/827
आदित्यान्तस्स्थितं	33/396
आदित्याभिमुखो	38/449, 99/1174
आदौ	6/63, 11/126, 50/592,
आद्यन्तयो:	6/67, 97/1146
आद्यन्तोङ्कार	50/595, 54/638
आद्यं शठारि	1/4
आधाय	62/738, 64/761
आधार	92/1090
आधारं	49/584
आनन्दाश्रु	72/861
आपत्काले	94/1114
आद्यध्वनि	६४/७५९
आपद्यत्रं	20/238
आपद्यपि	98/1164
आपद्यशक्तौ	13/152
आपस्तम्बेन	39/458
आप:पुनन्तु	87/1031
आपाद	33/389
आपोहिष्ठादि	37/433
आपोहिष्ठादिभि:	28/333, 119/1381
आपोहिष्ठेत्यृच:	87/1027
आपोहीत्यादिभि:	31/368, 37/438
आपोहीदं	31/366
आप्राणाहुति	101/1201
आप्लाव्य	90/1064
आभ्रूमध्यं	38/448
आमैथुनं	124/1449
आयान्तु	112/1312
आयुर्बलं	21/255
आयु: प्रज्ञा	58/695

	पृ. श्लो
आरग्वधं	115/1346
आरनालं	116/1349
आरब्धं कर्म	5/47
आरभ्य	45/540
आरम्भे	118/1369
आरम्भो	95/1130
आराधनार्थं	73/863
आरामोद्यान	14/154
आर्जवं	10/110
आर्तव	131/1529
आर्द्रं	19/226, 29/352
आर्द्रामलक	87/1026
आलिप्य	33/388
आवर्तयेत्	28/335, 41/492
आवर्त्त्य	33/392
आवाहयामि	27/324
आवाहयेत्	43/515
आवाह्य	33/391, 92/1088
आशिषं	101/1196
आशिषा	76/902
आश्रिताभीष्ट	71/845
आश्वयुक्	70/833
आश्वमेधिक	13/147
आश्वासने	77/915
आषाढ	70/831
आषाढे	70/832, 833
आसत्येनेत्यादि	87/1036
आसत्येनोद्वयमिति	87/1037
आसनं	121/1415
आसनारूढ	102/1209
आसने	74/895
आसन्नो	9/97
आसमावर्तनात्	66/786
आसायं	38/454

	पृ. श्लो
आसां	54/641
आसीन	22/261
आसीनः	4/44, 67/800
आसीनो	52/618, 29/344
अस्थान	120/1396
आस्यं	41/486
आस्याम्बु	19/224
आस्ये	47/554, 101/1199
आहिताग्निः	78/922
आहूता	131/1527
आहृत्य	73/867
इङ्गुदीं	21/247
इज्याकाले	118/1375
इज्याभोजनयोः	98/1158
इज्याविधि	3/31
इज्यास्वाध्याय	11/126
इज्यां समाप्य	116/1350
इतरं	32/386
इतरेषां	102/1213
इति तत्रैव	40/468
इति प्रणम्य	27/321
इति प्रबोध्य	71/842
इति प्राप्यर्थ	56/671
इति बुद्ध्या	95/1124
इति मन्त्रेण	27/325, 29/347
इति विज्ञाय	8/91
इति विष्णुं	84/993
इति संतर्प्य	84/997
इति संप्रार्थ्य	13/140
इति स्तुत्वा	95/1123
इतिहास	11/124, 67/797
इत्यनुज्ञाप्य	27/317
इत्यादि	9/98
इत्यादिकं	133/1554

	पृ. श्लो
इत्युक्तं	32/377
इत्युक्त्वा	53/630
इदं तेऽन्याभिः	84/994
इध्मस्तु	65/770
इन्द्रियाणां	10/115 122/1419
इममित्यादि	119/1391
इमं मन्त्रं	84/1002
इमं मे	28/331, 83/984, 120/1392
इष्टकालोष्ट	21/248
ईशान	91/1081, 97/1152
उक्तकाले	40/474
उक्तं च	37/441
उक्ता गुणा	11/120
उक्तार्धशौचं	16/189
उक्त्वा	6/64, 28/329, 47/463, 54/639, 59/702, 86/1025
उग्रगन्धं	72/855
उच्चरेत्	52/615, 67/803
उच्चारणं	50/598
उच्चार्य	29/343, 47/560
उच्चैस्संभाषणं	121/1408
उच्यन्ते	10/104
उच्छिष्टं	130/1520
उत्तरं	85/1011
उत्तरापोशनं	103/1226
उत्तरापोशनात्	103/1230
उत्तानेन	96/1137
उत्तिष्ठ	70/841
उत्थाय	12/131
उत्सवावभृथे	24/291
उत्सार्य	19/223
उदकं	77/920
उदकाञ्जलिना	33/391
उदकुम्भं	90/1066

	पृ. श्लो		पृ. श्लो
उदक्या	18/214	उपस्थानस्य	84/1000
उदक्यादि	112/1311	उपस्थाय	53/636, 54/645, 88/1040
उदक्यायति	108/10274	उपस्पृशेत्	66789
उदक्यां	60/710	उपहारान्	56/662
उदङ्मुखा	128/1494	उपादानबिधिः	139/1622
उदयानन्तरं	126/1472	उपादेयोऽयं	3/23
उदीचीं	13/142	उपानहौ	13/146
उद्घाट्य	71/843	उपास्य	33/399, 38/452
उद्घुष्ट	117/1358	उपास्यं	49/583
उद्घोषं	137/1606	उपौष्यैकदिनं	23/277
उद्देश	61/727	उभे ते	121/1408
उद्धरिण्या	92/1087	उभौ	63/749
उद्धृतात्	22/269	उरश्शिरः	136/1588
उद्धृताभिः	135/1576	उष्णिक्	88/1038
उद्धृत्य	66/788, 97/1156	ऊर्जं वहन्ती	29/342
उन्निद्र	42/503	उदयेऽस्तमये	69/824
उपचारार्थ	101/1200	ऊर्ध्वपुण्ड्रं	126/1473
उपचारैः	89/1056	ऊर्ध्वपुण्ड्राणि	35/407
उन्मत्तस्य	111/1300K	ऊर्ध्वमस्तमयात्	70/829
उन्मत्तं	78/923, 132/1547	ऊर्ध्वमुत्क्षिप्य	96/1144
उपतिष्ठेत्	66/786	ऊर्ध्वं	25/303, 29/352, 35/410
उपनीतो	68/808	ऊर्ध्वा	54/640
उपरागे	113/1321	ऊर्वोस्सप्त	16/190
उपलिप्ते	61/732, 99/1172, 122/1418, 128/1419	ऋग्भिः	31/370, 92/1094, 94/1109
		ऋग्भ्यां	27/323
उपलिप्य	86/1025	ऋग्यजुस्साम	44/527
उपवास	81/963	ऋग्वेदं	44/518
उपवासत्रयं	26/309, 80/955	ऋचं	92/1096, 93/1097
उपवासं	39/459	ऋचां दशानां	92/1095
उपविष्टे	16/189	ऋतमुञ्छशिलं	74/882
उपवीतं	6/62, 3/402	ऋतं च	28/334
उपवीती	28/340, 97/1150	ऋतामृताभ्यां	74/881
उपवीत्येव	124/1145	ऋतुगामि	8/87
उपस्थादीनि	46/552	ऋचौ	67/795

	पृ. श्लो
ऋतौ	124/1442
ऋत्विक्पत्नी	61/722
ऋषि:	17/199, 49/586
ऋष्योऽत्रि:	42/497
एकचित्यनुगन्त्री	136/1594
एकदेश	58/697
एकदैव	124/1444
एकपङ्क्त्यां	113/1316
एकमूलं	106/1250
एकवस्त्रेण	58/691
एकहस्त	57/684
एकहस्तेन	114/1328
एकादश	41/491
एकादशी	107/1261
एकादश्यां	113/1326
एका लिङ्गे	15/184
एकीकृत्य	35/417, 36/419
एकेन	114/1330
एकेन हीन:	2/19
एकैकमक्षरं	117/1360
एकैकार्णं	36/422
एकोच्छ्वासेन	135/1577
एतच्च	31/371
एतच्छौचं	16/193
एतद्विपर्ययो	45/541
एतया	50/592
एतस्य	43/516
एता	109/1289
एतानन्यान्	94/1110
एतानन्यांश्च	89/1051, 138/1608, 138/1613
एतानि	35/414, 76/899
एताभ्योऽन्यां	13/146
एतावान्	93/1077, 93/1105

	पृ. श्लो
एते	122/1417
एतेनोद्वास्य	53/633
एतेष्वन्येषु	82/968
एते समीक्ष्य	138/1620
एतेषु	55/655
एतै:	31/369, 122/1423, 136/1592
एभ्यो	66/781, 75/889
एलादि	18/217, 128/1488
एलालवङ्ग	91/1081
एहि गङ्गे	27/324
एषां	75/891, 107/1258
एवमादि	132/1543
एवमादीनि	8/81
एवमाश्रय	111/1303
एवमाश्रमिणां	86/1018
एवमुक्त:	32/382
एवमेव	54/639
एवं	15/186, 43/506, 512, 515, 49/585, 59/709, 70/838, 85/1009, 86/1017, 103/1223, 136/1519, 138/1619
एवं जपित्वा	53/627
एवं ध्यात्वा	45/531, 48/577
एवं प्रतिदिनं	68/806
एवं भुक्त्वा	103/1224
एवं मनु	3/22
ऐक्षवं	105/1248
ओङ्कारं	41/488, 46/550, 67/801
ओदन	102/1208
ओमित्यनेन	50/590
ओष्ठौ	67/795
औपासनवत्	97/1147
औपासनाग्नि	63/746
औपासनाग्नौ	96/1134

	पृ. श्लो
औपासने	62/744
कटिं प्रक्षाल्य	16/191
कटुतिक्त	103/1221
कण्टक	127/1484
कण्टकि	128/1499
कण्ठे	35/413, 36/430, 42/500, 46/548
कदलीगर्भ	99/1178
कदल्या	99/1175
कनिष्ठा	17/199
कनिष्ठायां	61/728
कनिष्ठिका	41/483, 45/537
कपित्थस्य	107/1263
कपिराक्षसयोः	116/1356
कबले	102/1217
कमलानाथ	44/529
करयोरस्त्र	45/533
कराभ्यां	48/566
करिष्ये	26/315, 37/1030
करेऽञ्जलौ	99/1177
करोति	124/1443
कर्कटे	85/1014
कर्मकाले	19/224
कर्मक्षममपि	5/52, 53
कर्मणा	132/1542
कल्पयित्वा	33/388
कल्पाश्च	67/798
कवाटोद्घाटनं	90/1062
कषायतिक्त	21/251
कस्मैचिदपि	127/1486
काककुक्कुट	128/1488
कायेन	73/866
कारयेच्च	128/1490
कार्कोटको	105/1248
कार्तिके	70/834

	पृ. श्लो
कार्पास	20/246
कालत्रये	50/596, 54/643, 89/1055
कालदुष्टं	107/1265
कालद्वयं	63/754
कालयोः	120/1394
कालस्तु	38/455
कालातिक्रमणे	39/459
कालात्पूर्वं	5/45
कालाश्रय	3/32, 7/75, 106/1251
काले	24/288, 289, 290
कावेर्या	86/1015
काव्यं न	116/1354
काश्यपाङ्गिरसौ	42/497
काष्ठादिनापि	62/734
काष्ठाद्यप्रोक्षितं	65/773
काष्ठैः	21/252
किरीट	48/575, 122/1426
किं च	88/1045
किंचित्	52/616, 84/999, 87/1034
कीर्तयेत्	6/165
कुक्षौ	35/410
कुणिस्स्यात्	109/1286
कुण्डलाभ्यां	118/1371
कुरूपं	132/1546
कुर्यात्	22/260, 40/476, 52/625, 62/743, 86/1017, 87/1030, 1034, 96/1135, 104/1231, 116/1354, 117/1371, 119/1380, 1390, 130/1520, 132/1547
कुलुत्थ	105/1245
कुशकाश	21/250
कुशोऽथ	73/873
कूर्मवत्	55/651
कृतं	25/302

पृ. श्लो

कृतानि 120/1399, 126/1468
कृते 59/701, 703, 77/918, 99/1179, 131/1531
कृतोपकार 110/1296
कृत्वा 12/132, 14/162, 176, 15/183, 20/237, 242, 26/314, 315, 28/339, 32/386, 38/447, 450, 54/641, 59/700, 66/759, 77/918, 87/1029, 90/1065, 99/1179, 104/1241, 124/1445, 127/1478, 131/1524, 135/1578
कृपासमुद्रं 71/844
कृष्टं चेदिति 13/148
कृष्टे गोष्ठे 14/155
कृष्णा 65/778, 70/835
केचित् 64/765
केशवस्त्रोदकं 25/296
केशवादीन् 36/424
केशवार्थं 72/863
केशं भूमिगतं 19/223
केशास्थि 57/676
कैलास 44/526
कैवर्तः 78/926
कोविदारं 21/247
कोशातकीं 115/1347
कौपीनाच्छादनं 33/397
कौसलेय 94/1118
कौसल्या 70/840
कौसुम्भ 80/949
क्रमुकस्य 106/1255
क्रमेण 119/1391
क्रियते 2/16, 3/38
क्रियास्नानं 22/265
क्रियाः 37/443
क्रीतैः 65/771
क्रोधाभावोऽपि 10/107

पृ. श्लो

क्रोशाद्वा 14/159
क्वचित् 73/870
क्षत्रियादिः 75/894
क्षत्रियाद्याः 137/1596
क्षमते 109/1286
क्षान्तिर्द्वन्द्व 10/109
क्षारं छत्रं 18/218
क्षीरधान्य 121/1410
क्षीरसागर 94/1119
क्षीरं च 108/1270
क्षीराणि 108/1272
क्षीरैः पुष्पैः 5/54
क्षीरोद 73/865
क्षुत्वा सुप्त्वा 19/227
क्षुद्रकन्द 106/1249
क्षुद्रधान्यानि 115/1345
क्षुद्रस्याज्ञस्य 94/1113
क्षेममस्त्विति 60/711
क्षौमवस्त्र 42/502
क्षौरं च 20/245
खट्वादीनां 65/775
खट्वादीप 136/1590
खराजयोः 25/297
खरोष्ट्र 77/910
खस्थितं 31/372
खादयां 64/760
खादितं 102/1205
गद्यं वा 12/137
गङ्गाप्रवाहवत् 1/8
गङ्गां 23/279, 33/390, 90/1074
गङ्गे च 28/330
गणयेत् 51/608
गण्डूषकाले 22/260, 104/1232
गण्डूषष्ठीवनं 24/293

	पृ. श्लो
गण्डूषान्	16/192
गच्छेत्	120/1397
गतप्रत्यागतादीनां	86/1016
गत्वा	24/287, 57/681, 82/977, 120/1400
गन्धद्रव्यस्य	19/231
गन्धद्वारां	35/416
गन्धपुष्प	76/899, 134/1561
गन्धं पुष्पं	129/1509, 134/1566
गन्धपुष्पादि	137/1602
गम्यागम्य	110/1297
गर्दभानपि	18/215
गर्भिणीं	136/1584
गर्भिणी	98/1163
गर्भिणीनां	108/1268
गलस्थानां	35/411
गव्यं च	108/1266
गव्याभावे	4/44
गात्रभङ्गं	136/1589
गात्रस्य	50/599
गात्रेषु	32/379
गाथाः	126/1468
गानेन	116/1355
गायकस्य	111/1302
गायत्रं	30/363
गायत्री	37/433, 43/510, 516, 119/1382
गायत्रीं	43/509, 50/593
गायत्र्यष्टशतं	39/460
गायत्र्यष्टसहस्रं	39/464
गायत्र्या	31/364, 39/461, 45/533, 51/605, 54/642
गायत्र्याद्यं	50/594
गायत्र्याः	45/536, 47/561
गायत्र्युदुत्यं	88/1038

	पृ. श्लो
गायत्र्युपासनं	33/399
गायत्र्युष्णिक्	42/498
गुणेषु	10/105
गुदे पञ्चदश	15/177
गुरूनभ्यर्च्य	92/1091
गुरौ	58/689, 690
गुर्वङ्गारक	81/966
गृध्र	77/910
गृहकार्याणि	133/1554
गृहमभ्येत्य	68/807
गृहं गत्वा	54/646, 60/716, 126/1475
गृहं च	60/717
गृहागतानां	10/108
गृहाङ्गणे	14/156
गृहाच्च	13/145
गृहान्	75/897
गृहीत	18/213
गृहीतमपि	29/348
गृहीतास्त्रः	20/239
गृहीतास्त्रो	20/236
गृहीतामल	20/235
गृहीतोदक	14/163
गृहीत्वा	19/234, 86/1020, 101/1198
गृही यथा	89/1048
